# अनिवार्य-संस्कृतभाषाव्याकरणम्

## कक्षा १०

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

# अनिवार्य-संस्कृतभाषाव्याकरणम्

## कक्षा १०

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

प्रकाशकः

**नेपालसर्वकारः**

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

**सानोठिमी–भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति । लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०८०

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति । विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽप्यत्वे आवश्यको दृश्यते । अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते । शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति । शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य संस्कृतभाषाव्याकरणविषयकपाठ्यक्रमस्याधारेण दशम्याः कक्षायाः पाठ्यपुस्तकमिदं विकसितं वर्तते ।

इदं पुस्तकं डा. ध्रुवप्रसादः भट्टराई, उपप्रा. केशवशरणः उपाध्याय, नारायणः घिमिरे, पुरुषोत्तमः घिमिरे- प्रभृतीनां महानुभावानां कार्यदलेन परिमार्जितं सम्पादितञ्चास्ति । अस्य पाठ्यपुस्तकस्य विकासे पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां

शिल्पानामनुसरणं कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः वैकुण्ठप्रसादः अर्याल, प्रा.डा. माधवशरणः उपाध्याय, प्रा.डा. आनन्दप्रसादः घिमिरे, प्रा.डा. ऋषिरामः पौडेल, निश्चलः अधिकारी, रोहिणीराजः तिमिल्सिना, शिवराजः लामिछाने, भीमप्रसादः खतिवडा, गणेशः तिमिल्सिना, केशव भट्टराई, उपेन्द्रः दाहाल, पर्वतः घिमिरे, टुकराजः अधिकारी-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य रूपसज्जा भक्तबहादुरः कार्की इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, सविधिकर्मकराश्च पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपभोगेन अध्यापयितुमध्येतुं कर्म कर्तुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः
**शिक्षाविज्ञानप्रविधिमन्त्रालयः**
**पाठ्यक्रमविकासकेन्द्रम्**

# विषयसूची


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| | **भाषाखण्डः** | |
| प्रथमः | कर्मणैव हि संसिद्धिः | २ |
| द्वितीयः | आहारसंयमः | १२ |
| तृतीयः | नीतिपद्यानि | २२ |
| चतुर्थः | श्रीकृष्णस्य कृपा | २९ |
| पञ्चमः | दुर्व्यसनं नैव जीवनम् | ४२ |
| षष्ठः | प्राणायामो हि भेषजम् | ५७ |
| सप्तमः | विसेमिरा | ७२ |
| अष्टमः | महर्षिः कणादः | ८८ |
| नवमः | मेघदूतांशः | १०२ |
| दशमः | वृत्तलक्षणम् | १०९ |
| | **व्याकरणखण्डः** | |
| प्रथमः | संज्ञाप्रकरणम् | १२० |
| द्वितीयः | अच्सन्धिप्रकरणम् | १२३ |
| तृतीयः | प्रकृतिभावः | १२६ |
| चतुर्थः | हल्सन्धिप्रकरणम् | १२९ |
| पञ्चमः | विसर्ग-स्वादिसन्धिनिदर्शनम् | १३३ |
| षष्ठः | हलन्तपुँल्लिङ्गे - हकारान्तशब्दनिरूपणम् | १३६ |
| सप्तमः | नकारान्तशब्दनिरूपणम् | १४६ |
| अष्टमः | दकारान्तशब्दनिरूपणम् | १५८ |
| नवमः | चकारान्तशब्दनिरूपणम् | १६८ |
| दशमः | हलन्तस्त्रीलिङ्गनिरूपणम् | १८१ |

| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| एकादशः | हलन्तनपुंसकलिङ्गनिरूपणम् | १८८ |
| द्वादशः | अव्यय-निरूपणम् | १९६ |
| | **न्यायखण्डः** | |
| प्रथमः | अनुमानप्रमाणम् | २०२ |
| द्वितीयः | हेत्वाभासः | २१६ |
| तृतीयः | उपमानशब्दप्रमाणे | २२७ |
| चतुर्थः | अवशिष्टपरिच्छेदः | २३५ |
| पञ्चमः | पारिभाषिकपदार्थपरिचयः | २४८ |

# भाषाखण्डः

# कर्मणैव हि संसिद्धिः



अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद् भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥१॥
इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ॥२॥
नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥३॥
कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसङ्ग्रहमेवापि सम्पश्यन् कर्तुमर्हसि ॥४॥
यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥५॥

१.
**अन्वयः**
भूतानि अन्नाद् भवन्ति, अन्नसम्भवः पर्जन्यात् (भवति), पर्जन्यो यज्ञाद् भवति, यज्ञः कर्मसमुद्भवः (अस्ति) ।

**सरलार्थः**

सकलाः प्राणिनोऽन्नाद् जायन्ते । मेघवर्षणेन अन्नोत्पत्तिर्भवति । मेघवर्षणं यज्ञस्याचरणेन सम्भवति । यज्ञश्च कर्माचरणेन भवति । अतः प्राणिनामुत्पत्ति-पालनादिकार्याणि कर्मणैव सम्भवन्तीति हेतुना जगत्सञ्चालनाय कर्म प्रमुखं कारणमस्ति ।

२.
**अन्वयः**

यज्ञभाविता देवा व इष्टान् भोगान् हि दास्यन्ते, तैर्दत्तान् य एभ्योऽप्रदाय भुङ्क्ते, स स्तेन एव ।

**सरलार्थः**

त्वं यज्ञकर्म करोषि चेत् तेन यज्ञकर्मणा देवाः सम्मानिता भवन्ति । सम्मानिता देवास्तुभ्यं त्वदनुकूलं फलं यच्छन्ति । देवैः प्रदत्तान् भोगान् तेभ्योऽर्पणेन विना यदि भुङ्क्ते चेत् त्वं चौरो भवसि । वस्तुतः सकलमपि भोग्यं वस्तु दैवायत्तं वर्तते । अतस्तस्य वस्तुनो भोगस्तेभ्योऽर्पणपूर्वकं खलु कर्तव्य इत्याशयः ।

३.
**अन्वयः**

कश्चिज्जातु क्षणमपि अकर्मकृन्नहि तिष्ठति, हि सर्वः प्रकृतिजैर्गुणैरवशः कर्म कार्यते ।

**सरलार्थः**

कश्चन कदाचिदपि कर्म अनाचरन् स्थातुं न शक्नोति । यतो हि सकलोऽपि मानवसमुदायः प्रकृतिजन्यैर्गुणस्वभावैर्वशङ्गतः सन् कर्मरतो भवति । प्रकृतेः सत्त्वादिगुणाः सर्वानपि कर्मसु प्रवृत्तिं भावयन्तीति भावः ।

४.
**अन्वयः**

जनकादयः कर्मणा एव संसिद्धिमास्थिताः, हि लोकसङ्ग्रहं सम्पश्यन्नपि कर्म कर्तुमेवार्हसि ।

**सरलार्थः**

जनकादयो ज्ञानवन्तो जना अनासक्तिभावेन कर्म कुर्वन्ति स्म । तादृशेन कर्मणा ते परमसिद्धिं प्रापुः । लोकसङ्ग्रहं दृष्ट्वा च कर्मणि तव प्रवृत्तिः खलु समुचिता वर्तते । ज्ञानिभिः सामान्यैर्जनैश्च कर्म कदापि न त्यक्तव्यमिति भावः ।

५.
**अन्वयः**

अर्जुन ! यस्तु मनसा इन्द्रियाणि नियम्य असक्तः कर्मेन्द्रियैः कर्मयोगमारभते, स विशिष्यते ।

**सरलार्थः**

हे अर्जुन ! यो मनुष्यो मनसा इन्द्रियाणि वशीकृत्य फलेऽनासक्तः सन् कर्म करोति, स उत्तमोऽस्ति । फलासक्तिं परित्यज्य अवलम्बिता कर्मशीलता एव उत्तमेति भावः ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| भूतानि - | प्राणीहरू | अकर्मकृत् - | कर्म नगर्नेवाला/कर्म नगरी |
| अन्नसम्भवः - | अन्नबालीको उब्जनी | संसिद्धिम् - | मोक्ष/सफलता |
| पर्जन्यः - | वर्षा गर्ने बादल | लोकसङ्ग्रहम् - | लोकका लागि गर्नुपर्ने कर्म |
| कर्मसमुद्भवः - | कर्मको उत्पत्ति | सम्पश्यन् - | हेर्दै/विचार गर्दै |
| यज्ञभाविताः - | यज्ञद्वारा सम्भावित | इन्द्रियाणि - | इन्द्रियहरू |
| वः - | तिमीहरूलाई | मनसा - | मनले |
| इष्टान् - | चाहेको | नियम्य - | वशमा राखेर |
| अप्रदाय - | नदिएर | कर्मेन्द्रियैः - | कर्मेन्द्रियहरूद्वारा |
| भुङ्क्ते - | भोग गर्छ/खान्छ | असक्तः - | आसक्ति नगरीकन |
| स्तेनः - | चोर | | |

## अभ्यासः

### श्रवणं भाषणञ्च

१. **शिक्षकमुखादधः प्रदत्तानि पदानि श्रुत्वा अनूच्चारयत**

पर्जन्यात्, अन्नसम्भवः, यज्ञात्, यज्ञः, कर्मसमुद्भवः, यज्ञभाविताः, देवाः, वः, इष्टान्, भोगान्, दास्यन्ते, एभ्यः, अप्रदाय, भुङ्क्ते, स्तेनः, नहि, कश्चित्, क्षणम्, तिष्ठति, अकर्मकृत्, कार्यते, अवशः, सर्वः, प्रकृतिजैः, कर्मणा ।

२. **उदाहरणमनुसृत्य अधस्तनपदानि पदच्छेदपूर्वकं श्रावयत**

उदाहरणम् - आस्थिताः = आ + स्थिताः । अन्नसम्भवः = अन्न + सम्भवः ।

कर्मसमुद्भवः, यज्ञभाविताः, कश्चित्, अकर्मकृत्, प्रकृतिजैः, संसिद्धिम्, लोकसङ्ग्रहम्, सम्पश्यन्, नियम्य, आरभते, कर्मयोगम्, विशिष्यते ।

३. **पाठस्य द्वितीयचतुर्थे पद्ये यथालयमनुवाचयत ।**

४. **अधस्तने पद्ये कक्षायां युगपत् प्रवाच्य तत्र आगतानि शतृप्रत्ययान्तपदानि श्रावयत**

नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यन् शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपन् श्वसन् ॥
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥

## ५. पाठाद् गृहीतानि अधस्तनानि पदानि प्रयुज्य एकैकं वाक्यं कक्षयां श्रावयत

तिष्ठति, कर्म, गुणैः, कर्मणा, जनकादयः, सम्पश्यन्, कर्तुम्, मनसा, नियम्य ।

## ६. अनुवाचनपूर्वकं शिक्षकादधस्तनपद्ययोरर्थं श्रुत्वा प्रदत्तानां प्रश्नानामुत्तराणि कथयत

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥

(क) भगवान् कं सृजति ?

(ख) श्लोके कस्य ग्लानिः कथिता ?

(ग) भगवान् कस्य संस्थापनं करोति ?

(घ) श्लोके कस्य अभ्युत्थानं कथितम् ?

(ङ) भगवान् केषां विनाशाय सम्भवति ?

(च) भगवान् कान् परित्रायते ?

## ७. पाठादुदाहरणानि पठित्वा च-पदस्य योगेन पञ्च वाक्यानि श्रावयत ।

## ८. पाठमाधृत्य अधोदत्तानां पदानामर्थं श्रावयत

भूतानि, अन्नसम्भवः, यज्ञात्, यज्ञभाविताः, इष्टान्, एभ्यः, अप्रदाय, स्तेनः, अकर्मकृत्, गुणैः, कर्मणा, इन्द्रियाणि, नियम्य, असक्तः ।

## ९. पाठस्थपदानि प्रयुज्य निर्मितानि नवीनानि वाक्यानि श्रावयत

(क) पर्जन्यः उच्चैः गर्जति ।

(ख) यज्ञः पवित्रं कर्म वर्तते ।

(ग) सर्वे जनाः कर्म कुर्वन्ति ।

(घ) स्तेनः स्तेयकर्मणि निपुणः भवति ।

(ङ) कश्चिज्जनः तत्र आस्ते ।

(च) छात्रः सम्यगध्ययनं कर्तुं चेष्टते ।

(छ) इन्द्रियाणि दश सन्ति ।

(ज) परिश्रमी जनः समाजे विशिष्यते ।

(झ) जनोऽकर्मकृत् जीवितुं न शक्नोति ।

(ञ) मनुष्यो मनसा विचार्य कर्माणि कुरुते ।

**१०. पाठस्य श्रवणानन्तरं विचारितं पाठसन्देशं श्रावयत ।**

## पठनम्

**१. अधस्तनं बोधपाठं प्रथमं सस्वरं तदनु मौनं पठित्वा प्रश्नानुत्तरयत**

भगवद्गीता आनन्दस्य स्रोतोऽस्ति । अस्यां निमज्जनेन प्रतिवारं नवीन आनन्दोऽवाप्यते । इयं ज्ञानस्य, कर्मणः, भक्तेश्च त्रिवेणी अस्ति । ज्ञानमार्गं कर्ममार्गं भक्तिमार्गञ्च निरूपयन्ती भगवद्गीता निष्कामतया एतेषु मार्गेषु प्रवर्तनाय समुपदिशति । गीताशास्त्रं मानवं महामानवं सम्पादयति । इदं संसाररोगस्य औषधं वर्तते । मानवजातेः कृतेऽयं ग्रन्थो बहुमूल्य उपहारोऽस्ति । ग्रन्थोऽयं ज्ञान-विज्ञानयोः सर्वोत्कृष्ट उपदेशो वर्तते । इदं परमरहस्यमयं शास्त्रमस्ति ।

पौरस्त्यैः पाश्चात्त्यैश्च बहुभिर्विद्वद्भिर्भगवद्गीतायाः प्रशंसा विहितास्ति । तेषु प्रसिद्ध इसाइदार्शनिकः थोमसकार्लिले, रुसदेशीयो विद्वान् लियोटोल्सटोय, जर्मनदेशीयो विद्वान् अर्थरस्कोपर्हाउर इत्यादयः प्रमुखाः सन्ति । भगवद्गीता जीवनस्य सर्वासां जिज्ञासानां समाधानं प्रस्तौति । इयं दार्शनिकं सङ्गीतं वर्तते । अयं सार्वभौमस्य ज्ञानस्य ग्रन्थोऽस्ति । भगवद्गीतेयं सर्वोत्तमां साधनां शिक्षयति । ग्रन्थोऽयं समग्रामपि मानवजातिं ज्ञानस्य एकस्मिन् सूत्रे ग्रथितुं प्रभवति । ग्रन्थोऽयं अनुपमेयं ज्ञानभाण्डागारं वर्तते ।

**(अ) प्रश्नान् उत्तरयत**

(क) भगवद्गीता कस्य स्रोतोऽस्ति ?

(ख) भगवद्गीता कैः प्रशंसितास्ति ?

(ग) भगवद्गीता किं किं निरूपयति ?

(घ) भगवद्गीता कस्य औषधं वर्तते ?

(ङ) भगवद्गीता केषां त्रिवेणी अस्ति ?

(च) नवीनानन्दस्य स्रोतः किम् ?

(छ) गीताशास्त्रं कं महामानवं सम्पादयति ?

(ज) भगवद्गीता कीदृशस्य ज्ञानस्य ग्रन्थोऽस्ति ?

(झ) भगवद्गीतायाः प्रशंसा कैर्विहिता ?

(ञ) अस्माभिः कुत्र प्रवर्तनीयम् ?

(आ) **बोधपाठमाधृत्य प्रश्नानुत्तरयत**

(क) 'ज्ञानस्य' इति पदे का विभक्तिः ?

(ख) 'सर्वोत्तमाम्' इति कस्य विशेषणम् ?

(ग) 'शिक्षयति' इति पदस्य कर्तृपदं किम् ?

(घ) 'एकस्मिन्' इति पदस्य विशेष्यं किम् ?

(ङ) 'ज्ञानभाण्डागारम्' इत्यस्य विग्रहः कः ?

(च) 'ग्रन्थोऽयम्' इति पदस्य सन्धिच्छेदं कुरुत ।

(छ) बोधपाठे प्रयुक्तं तुमुन्प्रत्ययान्तमेकं पदं लिखत ।

(ज) 'अतुलनीयम्' इत्यस्य कः पर्याय उपरि प्रयुक्तः ?

(इ) बोधपाठस्य प्रथमस्य अनुच्छेदस्य द्रुतपठनं कृत्वा मित्राणि श्रावयत ।

(ई) बोधपाठस्याधारेण विलुप्तानि पदानि वदत

भगवद्गीता .................. सर्वासां .................. समाधानं प्रस्तौति । .................. दार्शनिकं सङ्गीतं वर्तते । अयं .................. ज्ञानस्य ग्रन्थोऽस्ति । भगवद्गीतेयं .................. साधनां शिक्षयति । ग्रन्थोऽयं .................. मानवजातिं .................. एकस्मिन् सूत्रे ग्रथितुं .................. । ग्रन्थोऽयं .................. ज्ञानभाण्डागारं वर्तते ।

(उ) **भगवद्गीताया वैशिष्ट्यमाधृत्य पञ्च वाक्यानि लिखत ।**

२. **अधस्तनयोर्बोधपद्ययोः लयोच्चारणं मौनपठनं च विधाय अधस्तनकार्यकलापान् कुरुत**

पार्थाय प्रतिबोधितां भगवता नारायणेन स्वयं
व्यासेन ग्रथितां पुराणमुनिना मध्ये महाभारतम् ।
अद्वैतामृतवर्षिणीं भगवतीमष्टादशाध्यायिनीम्
अम्ब त्वामनुसन्दधामि भगवद्गीते भवद्वेषिणीम् ॥

भीष्मद्रोणतटा जयद्रथजला गान्धारनीलोत्पला
शल्यग्राहवती कृपेण वहनी कर्णेन वेलाकुला ।
अश्वत्थामविकर्णघोरमकरा दुर्योधनावर्तिनी
सोत्तीर्णा खलु पाण्डवै रणनदी कैवर्तकः केशवः ॥

**(अ) बोधपद्ययोराधारेण प्रश्नानुत्तरयत**

(क) भगवद्गीता कं द्वेष्टि ?
(ख) भगवद्गीता किं वर्षयति ?
(ग) महाभारतं केन विरचितम् ?
(घ) महाभारतस्य रणनदी कैरुत्तीर्णा ?
(ङ) भगवता गीता कस्मै प्रतिबोधिता ?
(च) महाभारतस्य रणनद्या ग्राहरूपः कः ?
(छ) महाभारतस्य रणनद्या जलरूपः कः ?
(ज) भगवद्गीतायां कति अध्यायाः सन्ति ?
(झ) महाभारतस्य रणनद्यास्तरङ्गरूपः कः ?
(ञ) महाभारतस्य रणनद्यास्तटद्वयरूपौ कौ ?
(ट) भगवद्गीता कस्य ग्रन्थस्य मध्ये वर्तते ?
(ठ) महाभारतस्य रणनद्याः कैवर्तकरूपः कः ?
(ड) वेलाकुलरूपः कः ?
(ढ) महाभारतस्य रणनद्या नीलकमलरूपः कः ?
(ण) घोरौ मकररूपौ कौ ?

**(आ) बोधपद्येऽनुसृत्य प्रश्नानुत्तरयत**

(क) प्रथमे पद्ये सम्बोधनपदे के ?
(ख) द्वितीये पद्ये अव्ययपदं किम् ?
(ग) 'भवद्वेषिणीम्' इत्यस्य विग्रहः कः ?
(घ) कमलस्य कः पर्याय उपरि प्रयुक्तः ?
(ङ) 'कैवर्तकः' इति पदस्य विशेष्यं किम् ?
(च) 'नारायणेन' इति पदस्य विशेषणं किम् ?
(छ) पद्यतः क्तप्रत्ययान्तमेकं पदमन्विषत ।
(ज) 'अद्वैतामृतवर्षिणीम्' इति पदस्य सन्धिच्छेदं कुरुत ।

**(इ) रिक्तस्थानं पूरयत**

पार्थाय ........... भगवता ............... स्वयं
व्यासेन ग्रथितां ........... मध्ये महाभारतम् ।
..................... भगवतीमष्टादशाध्यायिनीम्
अम्ब त्वामनुसन्दधामि .......... भवद्वेषिणीम् ॥

**(ई) भगवद्गीताया वैशिष्ट्यमाधृत्य त्रीणि वाक्यानि लिखत ।**

## लेखनम्

### १. पाठाधारेण रिक्तस्थानं पूरयत

(क) कर्म .................. न त्यक्तव्यम् ।

(ख) .................. कर्माचरणेन भवति ।

(ग) मेघवर्षणं यज्ञानुष्ठानेन .................. ।

(घ) यज्ञकर्मणा देवाः .................. भवन्ति ।

(ङ) .................. भोग्यं वस्तु दैवायत्तं वर्तते ।

(च) ज्ञानवन्तो जना .................. कर्म कुर्वन्ति ।

(छ) कश्चन कर्म .................. स्थातुं न शक्नोति ।

(ज) निष्कामकर्मणा साधकाः परमसिद्धिं .................. ।

(झ) प्रकृतेः सत्त्वादिगुणाः कर्मसु .................. भावयन्ति ।

### २. पाठाधारेण विशेषण–विशेष्यपदे परस्परं मेलयत

| **'अ' खण्डः** | **'आ' खण्डः** |
|---|---|
| सकलाः | वस्तुनः |
| प्रमुखम् | गुणस्वभावैः |
| सम्मानिताः | जनाः |
| त्वदनुकूलम् | प्रवृत्तिः |
| प्रदत्तान् | जनैः |
| तस्य | प्राणिनः |
| प्रकृतिजन्यैः | कारणम् |
| ज्ञानवन्तः | देवाः |
| समुचिता | फलम् |
| सामान्यैः | भोगान् |

### ३. समीचीनकथने 'आम्', असमीचीनकथने च 'न' इति लिखत

(क) मेघवर्षणेन अन्नोत्पत्तिर्भवति ।

(ख) सकलाः प्राणिनो जलाद् जायन्ते ।

(ग) सकलमपि भोग्यं वस्तु दैवायत्तमस्ति ।

(घ) जगत्सञ्चालनाय धनं प्रमुखं कारणम् ।

(ङ) सत्त्वादिगुणाः कर्मसु प्रवृत्तिं भावयन्ति ।

(च) मेघवर्षणं चन्द्रस्य प्रकाशनेन सम्भवति ।

(छ) यज्ञकर्मणा याज्ञिकाः सम्मानिता भवन्ति ।

(ज) ज्ञानवन्तो जना आसक्तिभावेन कर्म कुर्वन्ति ।

(झ) ज्ञानिभिः सामान्यैर्जनैश्च कर्म त्यक्तुं शक्यते ।

(ञ) कश्चन कदाचिदपि कर्म अनाचरन् न तिष्ठति ।

## ४. पाठस्य श्लोकानां श्रुतलेखनं कुरुत ।

## ५. पदानि प्रयुज्य वाक्यानि रचयत

भूतानि, पर्जन्यात्, भवति, यज्ञः, देवाः, भोगान्, भुङ्क्ते, एव, अपि, अर्हसि, आरभत ।

## ६. पाठाद् विपर्ययपदान्यन्विष्य लिखत

**यथा–** अकर्म – कर्म

(क) अनिष्टान् – ...........

(ख) ग्रहीष्यन्ते – ...........

(ग) कर्मकृत् – ...........

(घ) चलति – ...........

(ङ) गृहीतान् – ...........

(च) असिद्धिम् – ...........

## ७. पाठाधारेण प्रश्नानुत्तरयत

(क) किं दैवायत्तं वर्तते ?

(ख) के अन्नाद् जायन्ते ?

(ग) त्वं कथं चौरो भवसि ?

(घ) उत्तमो मनुष्यः कः ?

(ङ) वस्तूनां भोगः कथं कर्तव्यः ?

(च) मेघवर्षणेन कस्योत्पत्तिर्भवति ?

(छ) कैः किं कदापि न त्यक्तव्यम् ?

(ज) मेघवर्षणं कस्याचरणेन सम्भवति ?

(झ) यज्ञकर्मणा के सम्मानिता भवन्ति ?

(ञ) के तुभ्यं त्वदनुकूलं फलं यच्छन्ति ?

(ट) कर्म कथं जगत आधारो वर्तते ?

(ठ) के अनासक्तिभावेन कर्म कुर्वन्ति स्म ?

(ड) सकलोऽपि मानवसमुदायः कथं कर्मरतो भवति ?

(ढ) प्रकृतेः सत्त्वादिगुणाः कान् कर्मसु प्रवृत्तिं भावयन्ति ?

(ण) फलासक्तिं परित्यज्य अवलम्बिता कर्मशीलता कीदृशी भवति ?

८. **पाठस्याधारेण कर्मयोगं पञ्चभिर्वाक्यैर्वर्णयत ।**

९. **कर्मशीलताया लाभं पञ्चभिर्वाक्यैर्वर्णयत ।**

१०. **कर्मत्यागात् सञ्जायमानाः समस्याः सूचीकुरुत ।**

११. **रेखाङ्कितपदाधारेण प्रश्नवाक्यानि निर्मात**

(क) **कर्म** सर्वैः करणीयम् ।

(ख) **श्रीकृष्णः** महान् उपदेष्टा आसीत् ।

(ग) **कर्मणि** प्रवृत्त्या मनुष्याणामुन्नतिर्भवति ।

(घ) **निष्कामं** कर्म आनन्दस्य कारणं भवति ।

(ङ) भगवद्गीतायां **त्रिविधं** कर्म उपदिष्टं वर्तते ।

१२. **स्वकीयानां दैनिककर्मणां सूचीं निर्मात ।**

१३. **भगवद्गीताया विषये एकमनुच्छेदं रचयत ।**

## सर्जनात्मकोऽभ्यासः

१. **भगवद्गीताया द्वितीयाध्यायात् कर्मयोगविषयकान् त्रीन् श्लोकानन्विष्य तदर्थविषये कक्षायां सखिभिः सह विमृशत । स्थूलाक्षरैः प्रतिश्लोकमेकां श्लोकपत्तिञ्च निर्माय कक्षाप्रकोष्ठस्य भित्तौ संस्थापयत ।**

# आहारसंयमः



आहारो भोजनम् । जीवनाय अन्नमपेक्ष्यते । मनुष्यः सामान्यतया भोजनायैव कार्यमाचरति । तदर्थमसौ अनिन्द्यं कर्म करोति- 'आहारार्थं कर्म कुर्यादनिन्द्यमि'ति शास्त्रनिर्देशदिशा । आहारः शरीरस्य पोषणं करोति । उत्तम आहारः शरीरं स्वस्थं विदधाति । शरीरस्य पोषणाय आहारोऽत्यावश्यकः परन्तु आहारेण शरीरस्य केवलं पोषणं न, शरीरं स्वस्थमस्वस्थं वापि भवति । अतः स्वास्थ्यरक्षणाय समुचित आहार आवश्यकः ।

स एव आहारो ग्राह्यः य आहारिणि ऊर्जां जीवनशक्तिञ्च आदधाति । यदि एतद्विषयमुपेक्ष्य केवलं जिह्वातृप्तये आहारः स्वीक्रियते तर्हि तेन शरीरस्य हानिरेव भविष्यति । तादृश आहारः शरीरस्य आवश्यकतां न पूरयति, न च शरीरं स्वस्थीकरोति । शरीरं रोगाणां गृहं सम्पद्यते । कुपोषणं केवलं अन्नस्य अभाव एव नास्ति, न च केवलं न्यूनभोजनेन जायते । आवश्यकतापेक्षया अधिकभोजनेनापि कुपोषणं भवति । आहारस्य असंयमस्य कारणेन च कुपोषणं भवति । सन्तुलित आहारः शरीरस्य रोगप्रतिरोधिकां शक्तिं वर्धयति । दुर्बलेन व्याधिग्रस्तेन च शरीरेण मनुष्यो जीवनस्य किमपि प्रयोजनं सेद्धुं न पारयति । शरीरस्य रोगापन्नत्वस्य मुख्यं कारणमपि आहारस्य असंयमः खलु ।

ये प्रकृत्यनुकूलमाहारं गृह्णन्ति, ते नहि व्याधिं प्राप्नुवन्ति । वने भ्रमन्तः पशवः पक्षिणश्च व्याधियुक्ताः प्रायो न जायन्ते यतस्ते स्वाभाविकतया खादन्ति । तेषां आहारः स्वाभाविकः प्राकृतिकश्च भवति ।

मनुष्यो नैकविधानां तैलानामुपस्कराणाञ्च उपयोगेन नाना प्रकारेण भोजनं सज्जीकृत्य जिह्वानुकूलं सम्पादयति । भोजनं शरीरानुकूलं स्वास्थ्यानुकूलञ्च भवेन्न वेति न चिन्तयन्ति अपि तु जिह्वानुकूलमवश्यं सम्पादनीयमिति तेषां ध्यानं भवति । तादृश आहारो हानिकरः, तस्य सेवी चानेकैः रोगैः पीडितो भवति । तदर्थमनेके चिकित्सालयाः, अनेकानि स्वास्थ्यकेन्द्राणि च रोगिभिः पूरिता दृश्यन्ते ।

पशवः क्षुधां विना न खादन्ति । मनुष्यास्तु मधुरं लभ्यते चेद् अक्षुधार्तोऽपि भक्षयेयुः । शरीरस्य आवश्यकतामविचार्यैव आस्वादनस्य वशङ्गच्छन्ति । यदा तु भोजनं स्वादु भवति, तदा बहु भुञ्जते । यदि स्वादु न भवति, तर्हि तत् त्यजन्ति । तेषां क्षुधा, तदुदरञ्च कदा कियच्च खादितव्यमिति निर्णयं कुरुतः, न तु तज्जिह्वा । आहारस्य असंयमस्य मुख्यं कारणं मनुष्यस्य स्वादलिप्सा, अज्ञानञ्च । आहारे यदि संयमो नास्ति, औषधञ्च कार्यं न करिष्यति । अत एव वैद्या रोगिणमौषधं ददाना वदन्ति- एतस्य औषधस्य पानकालं यावद् एतानि आहारवस्तूनि न खादितव्यानि । तेन शरीरस्य स्वस्थतायै आहारस्य संयमोऽत्यावश्यकः सिद्ध्यति ।

प्राचीनकाले जना गृहे एव खादन्ति स्म, शौचार्थमुदरस्य शोधनार्थं वा बहिर्गच्छन्ति स्म परन्तु अद्यत्वे जना भोजनं कर्तुं बहिर्गत्वा गृहान्तः प्रविश्य उदरं रिक्तीकुर्वन्ति । अत एव साम्प्रतिका जना प्रायो रोगाक्रान्ताः सन्ति । अद्यतनो मनुष्यो जिह्वास्वादमुद्दिश्य भोजनार्थं धावति । रसनेन्द्रियस्य तृप्तये प्रायो भोजनं स्वीकरोति । स गृहाद् दूरमाधुनिकेषु भोजनापणेषु गत्वा बहुविधैरुपस्करैः रसायनैश्च युक्तं भोजनं खादति । भोजने तस्य संयमो नास्ति । आहारः स्वस्थजीवनशैल्या मूलसूत्रमस्ति । न केवलं शरीरम्, अपि तु मनोऽपि आहारस्य संयमेन स्वस्थं भवति । स्वस्थकायः स्वस्थचित्तश्च जनः कार्येषु सफलो भवति । मनःशुद्ध्यर्थमाहारस्य कारणता शास्त्रेण समुपदिष्टा वर्तते- 'आहारशुद्धौ सत्त्वशुद्धिः' इति ।



आहारसंयमेन मनुष्यः शारीरिकरूपेण मानसिकरूपेण च स्वस्थो भवति । वैदिकसंस्कृतौ विशेषासु तिथिषु उपवासस्य नियमो वर्तते । भोजनस्य संयमेन अयं सम्बद्धोऽस्ति । कतिपयेषु दिनेषु एकवारमुदरस्य रिक्तस्थापनञ्च स्वास्थ्यस्य सूत्रं वर्तते । शरीरस्य संरचनाया आधारेण प्राकृतिक आहारो मनुष्याणां कृते उपयुक्तोऽस्ति । मनुष्यः शाकाहारी प्राणी, तस्यकृते शाकाहार एव स्वास्थ्यकरः तस्मिन्नपि संयमयुक्तता आवश्यकी भवति । संयमतायुक्तः शाकाहारस्तस्य शरीरं मनश्च स्वस्थीकरोति । मानसिकं स्वास्थ्यं न केवलं आध्यात्मिकविकासाय अपि तु भौतिकविकासाय अपि आवश्यकम् ।

वैदिकसंस्कृतौ आहारविषये बह्वी चर्चा वर्तते । तत्र आहारस्य प्रकाराणां वर्णनं प्राप्यते । उत्तमस्य, मध्यमस्य, निकृष्टस्य चाहारस्य वर्णनं तत्रावाप्यते । सात्त्विको राजसस्तामसश्च त्रिविध आहारः । आहारः केवलं क्षुधाया न्यूनीकरणस्य विषयो नास्ति । आहारस्य माध्यमेन मनो निर्मीयते । अन्नात् शरीरं भवति । अन्नाद् विचारा निर्मीयन्ते । आहारानुसारेणैव संस्कारा निर्मीयन्ते । अतः कीदृश आहारो ग्रहणीयः ? कियान् ग्रहणीयः ? कियत्कालं यावद् ग्रहणीयः ? आहारार्थं किञ्च ग्रहणीयम् ? आहारविज्ञानानुसारेण एतत्सर्वं निर्धारणीयं भवति । आहारो जीवनमस्ति । आहारः शरीरस्य स्वरूपानुसारेण प्रकृतेर्नियमानुसारेण च भवेत् । आहारनियमानां परिपालनेन समुचितस्याहारस्य ग्रहणमेव आहारस्य संयमो वर्तते ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| जीवनाय - | बाँच्नका लागि | अनिन्द्यम् - | निन्दा नहुने खालको |
| आहारिणि - | आहार गर्ने व्यक्तिमा | ऊर्जा - | बल |
| जीवनशक्तिः - | बाँच्ने शक्ति | उपेक्ष्य - | बेवास्ता गरेर |
| जिह्वातृप्तये - | जिब्रोको तृप्तिका लागि | स्वस्थीकरोति - | स्वस्थ बनाउँछ |
| असंयमः - | अनियन्त्रण | प्रकृत्यनुकूलम् - | प्रकृतिको अनुसार |
| व्याधिः - | रोग | उपस्करः - | मसला |
| जिह्वानुकूलम् - | जिब्रोको अनुसार | हानिकरः - | नोक्सान गर्नेवाला |
| भाण्डागारम् - | भण्डार | चिकित्सालयः - | अस्पताल |
| वन्याः - | जङ्गली | गजाः - | हात्तीहरू |
| व्याघ्राः - | बाघहरू | ऋक्षाः - | भालुहरू |
| चिकित्सायै - | उपचारका लागि | क्षुधा - | भोक |
| मधुरम् - | मिठो | आस्वादनस्य - | स्वादको |
| भुञ्जते - | खान्छन् | त्यजन्ति - | छाडिदिन्छन् |
| स्वादलिप्सा - | स्वादको लोभ | शौचार्थम् - | शौचका लागि |
| रिक्तीकुर्वन्ति - | खाली गर्छन् | साम्प्रतिकाः - | अहिलेका |
| रोगाक्रान्ताः - | रोगले ग्रस्त | रसनेन्द्रियम् - | जिब्रो |
| भोजनापणः - | भोजन तथा आवास गृह | स्वस्थकायः - | स्वस्थ शरीर भएको |

| | | | |
|---|---|---|---|
| स्वस्थचित्तश्च - | स्वस्थ मन भएको | सत्त्वशुद्धिः - | मनको शुद्धता |
| उपवासः - | व्रत | सात्त्विकः - | सत्त्वगुणयुक्त |
| राजसः - | रजोगुणयुक्त | तामसः - | तमोगुणयुक्त |
| त्रिविध आहारः - | तीन प्रकारका आहार | | |

## अभ्यासः

### श्रवणं भाषणञ्च

१. **कक्षायां पाठस्य श्रवणानन्तरं स्वमातृभाषया पाठसारं श्रावयत ।**

२. **कौचिद् द्वौ छात्रौ पाठस्य चतुर्थपञ्चमानुच्छेदौ क्रमेण श्रावयताम् ।**

३. **अधस्तनानि समस्तपदानि शुद्धमुच्चारयत**

जीवनशक्तिः, जिह्वातृप्तये, न्यूनभोजनेन, आवश्यकतापेक्षया, असंयमस्य, रोगप्रतिरोधिकाम्, व्याधिग्रस्तेन, रोगापन्नत्वस्य, प्रकृत्यनुकूलम्, व्याधियुक्ताः, जिह्वानुकूलम्, स्वास्थ्यकेन्द्राणि, चिकित्सालयेषु, अक्षुधार्तः, स्वादलिप्सा, आहारवस्तूनि, रोगाक्रान्ताः, भोजनापणेषु, स्वस्थजीवनशैल्या, स्वस्थकायः, आहारशुद्धौ, सत्त्वशुद्धिः ।

४. **पाठस्य पञ्चमस्यानुच्छेदस्य क्रियापदानि चित्वा एकैकं वाक्यं श्रावयत ।**

५. **आहारविज्ञानस्य विषये पञ्च वाक्यानि कथयत ।**

६. **स्वस्थजीवनस्य प्रयोजनविषये परस्परं विमृशत ।**

७. **मित्रमुखात् पाठस्य अन्तिममनुच्छेदं श्रुत्वा प्रश्नानुत्तरयत**

(क) आहारः कथं भवेत् ?

(ख) आहारस्य त्रैविध्यं किम् ?

(ग) संस्काराः कथं निर्मीयन्ते ?

(घ) आहारस्य माध्यमेन किं निर्मीयते ?

(ङ) वैदिकसंस्कृतौ कस्य विषये बह्वी चर्चा वर्तते ?

(च) केवलं क्षुधाया न्यूनीकरणस्य विषयः को नास्ति ?

## ८. क्रियापदानि श्रुत्वा अनुवाचयत

खादन्ति स्म, गच्छन्ति स्म, रिक्तीकुर्वन्ति, सन्ति, धावति, स्वीकरोति, भवति, गच्छति, खादति, नास्ति, अस्ति, वर्तते, स्वस्थीकरोति, अवाप्यते, निर्मीयते, भवेत् ।

## ९. पाठादुदाहरणानि पठित्वा एवपदस्य योगेन त्रीणि वाक्यानि कथयत ।

## १०. अधोदत्तानां पदानामर्थं श्रावयत

अनिन्द्यम्, जीवनशक्तिः, उपेक्ष्य, स्वस्थीकरोति, प्रकृत्यनुकूलम्, उपस्करः, जिह्वानुकूलम्, हानिकरः, चिकित्सालयः, वन्याः, ऋक्षाः, क्षुधा, भुञ्जते, स्वादलिप्सा, साम्प्रतिकाः, रोगाक्रान्ताः, रसनेन्द्रियम्, भोजनापणः, स्वस्थकायः, अवाप्यते, त्रिविधः ।

## ११. पाठस्थानि पदानि प्रयुज्य निर्मितानि नवीनानि वाक्यानि श्रावयत

(क) दूषित आहारो रोगं वर्धयति ।

(ख) सर्वदा उत्तमं कर्म कर्तव्यम् ।

(ग) आहारेण जीवनशक्तिः प्राप्यते ।

(घ) काले काले उपवासो लाभकरः ।

(ङ) उचित आहार एव औषधं वर्तते ।

(च) शास्त्रं शोभनं व्यवहारं शिक्षयति ।

(छ) भोजनं स्वादु स्वास्थ्यरक्षकञ्च भवतु ।

(ज) चिकित्सालयेषु रुग्णानां सम्मर्दो दृश्यते ।

(झ) स्वस्थं मनः स्वस्थान् विचारान् जनयति ।

(ञ) व्यञ्जनेषु अधिकस्य उपस्करस्य प्रयोगो हानिकरः ।

## १२. पाठं श्रुत्वा अनुभूतं सन्देशं श्रावयत ।

# पठनम्

## १. अधस्तनस्य बोधपाठस्य पठनं विधाय तदनुवर्तिनः प्रश्नानुत्तरयत

रामकृष्णः परमहंसो भगवत्याः काल्या महान् भक्त आसीत् । तस्य शिष्य आसीद् स्वामी विवेकानन्दः । विवेकानन्दस्य च बहवोऽनुयायिनोऽभवन् । तेषु बहवः संन्यासिनश्च अभवन् । स्वामी विवेकानन्द

आहारस्य विषयेऽत्यन्तं सचेता आसीत्। अतोऽसौ संन्यासिनां नूतनस्य संघस्य स्थापनासमये संन्यासिनां कृते काँश्चन नियमान् निर्मितवान् आसीत्। स्वामिनो विवेकानन्दस्य संस्थानेषु सम्प्रति च ते नियमाः परिपाल्यन्ते। तत्र नियमेषु केचन नियमा भोजनसम्बद्धा वर्तन्ते। आहारनियन्त्रणं विना मनो नियन्त्रयितुं न शक्यते इति स्वामी विवेकानन्दो व्यचारयत्। अतः संन्यासिनोऽतिभोजनं वर्जयेयुरिति तत्र नियमो वर्तते। ब्रह्मचर्यस्य पालनेन सहैव आहारसंयमश्च संन्यासिभिः पालनीयः। नो चेत् साधना नहि सफलीभवतीति स्वामी विवेकानन्दः कथयति स्म। साधकानां कृते प्रातःकाले ब्रह्ममुहूर्ते जागरणम्, ध्यानम्, जप इत्येतेषां सम्यक् पालनमत्यावश्यकमिति तस्य चिन्तनम्।

वृत्तपत्रपठनं परिवारजनैः सह सामाजिकसम्बन्धो वा संन्यासिनां कृते न हितकरः। संन्यासिनो धनिकैः सह कथंविधमपि सम्बन्धं न स्थापयेयुः। न कश्चिद् गृहस्थः साधुशयने उपविष्टो भवेत्। भोजनस्य व्यवस्था उभयोः कृते पृथग् एव भवेत्। यदा कदापि संन्यासिनोऽस्य आदर्शस्य तपस्विजीवनस्य यापनाय अयोग्या भवन्ति चेत्तेषां गृहस्थाश्रमे प्रवेशः खलु श्रेयस्करः। संन्यासव्यवस्था न दूषणीया इत्यादयो नियमाः तत्र नियमपत्रे स्वामिना विवेकानन्देन निर्दिष्टाः सन्ति।

### (अ) प्रश्नानुत्तरयत

(क) संन्यासिनः किं वर्जयेयुः ?

(ख) कः साधुशयने उपविष्टो न भवेत् ?

(ग) मनो नियन्त्रयितुं कस्य नियन्त्रणमावश्यकम् ?

(घ) विवेकानन्दस्य कियन्तोऽनुयायिनोऽभवन् ?

(ङ) स्वामी विवेकानन्दः कस्य शिष्य आसीत् ?

(च) रामकृष्णः परमहंसो कस्या भक्त आसीत् ?

(छ) स्वामी विवेकानन्दः कस्मिन् विषये सचेता आसीत् ?

(ज) साधकैः केषां सम्यक् पालनं कार्यम् ?

(झ) विवेकानन्देन संन्यासिनां कृते कदा नियमा निर्मिताः ?

(ञ) सन्यासिनां साधना कथं सफलीभवति ?

### (आ) बोधपाठमाधृत्य प्रश्नानुत्तरयत

(क) 'उभयोः' इति पदे का विभक्तिः ?

(ख) 'अयोग्याः' इति कस्य विशेषणम् ?

(ग) 'भवेत्' इति पदस्य कर्तृपदं किम् ?

(घ) 'स्वामिना' इति पदस्य विशेष्यं किम् ?

(ङ) 'तपस्विजीवनस्य' इत्यस्य विग्रहः कः ?

(च) 'गृहस्थाश्रमे' इति पदस्य सन्धिच्छेदं कुरुत ।

(छ) बोधपाठप्रयुक्तं क्तप्रत्ययान्तमेकं पदं विचित्य वाक्ये प्रयोगं दर्शयत ।

(ज) 'कल्याणकरः' इत्यस्य कः पर्याय उपरि प्रयुक्तः ?

**(इ) बोधपाठस्य अन्तिमस्य अनुच्छेदस्य विलुप्तानि पदानि वदत**

वृत्तपत्रपठनं वा .................. सह सामाजिकसम्बन्धो वा .................. कृते न हितकरः । .................. धनिकैः सह कथंविधमपि .................. न स्थापयेयुः । न कश्चिद् .................. साधुशयने उपविष्टो .................. । भोजनस्य व्यवस्था उभयोः .................. पृथग् एव भवेत् । .................. कदापि संन्यासिनोऽस्य .................. तपस्विजीवनस्य यापनाय अयोग्या भवन्ति चेत्तेषां .................. प्रवेशः खलु श्रेयस्करः । संन्यासव्यवस्था न .................. इत्यादयो नियमाः तत्र नियमपत्रे स्वामिना विवेकानन्देन .................. सन्ति ।

**२. आहारसंयमस्य वैशिष्ट्यमाधृत्य पञ्च वाक्यानि कथयत ।**

## लेखनम्

**१. पाठाधारेण प्रश्नानुत्तरयत**

(क) जीवनाय किमपेक्ष्यते ?

(ख) मनुष्यः सामान्यतः किमर्थं कार्यमाचरति ?

(ग) आहारः कस्य पोषणं करोति ?

(घ) कीदृश आहारः शरीरं स्वस्थं करोति ?

(ङ) शरीरस्य पोषणाय किमावश्यकम् ?

(च) कीदृश आहारो ग्राह्यः ?

(छ) केवलं जिह्वातृप्तये आहारेण किं भवति ?

(ज) केन कारणेन कुपोषणं भवति ?

(झ) किं रोगप्रतिरोधिकां शक्तिं वर्धयति ?

(ञ) शरीरस्य रोगापन्नत्वस्य मुख्यं कारणं किम् ?

(ट) के व्याधिं नहि प्राप्नुवन्ति ?

(ठ) के व्याधियुक्ता प्रायो न जायन्ते ?

(ड) केषां आहारः स्वाभाविकः प्राकृतिकश्च भवति ?

(ढ) मनुष्यो भोजनं कथं जिह्वानुकूलं सम्पादयति ?

(ण) जिह्वानुकूलस्य आहारस्य सेवी कीदृशो भवति ?

## २. पदानि प्रयुज्य वाक्यानि रचयत

आहारसंयमेन, स्वस्थः, वैदिकसंस्कृतौ, उपवासस्य, भोजनस्य, सूत्रम्, शरीरस्य, आहारः, मनुष्याणां कृते, शाकाहारी, मनश्च, आवश्यकम् ।

## ३. समीचीनकथने 'आम्', असमीचीनकथने च 'न' इति लिखत

(क) पशवः क्षुधां विना न खादन्ति ।

(ख) मनुष्यस्तु अक्षुधार्तोऽपि भक्षयेत् ।

(ग) साम्प्रतिका जना प्रायो रोगाक्रान्ता न सन्ति ।

(घ) जिह्वा भोजनस्य इयत्तां कालञ्च निर्धारयति ।

(ङ) पशवः शरीरस्य आवश्यकतामविचार्यैव खादन्ति ।

(च) शरीरस्य स्वस्थतायै आहारस्य संयमोऽत्यावश्यकः ।

(छ) यदा तु भोजनं मधुरं भवति, तदा जना अल्पं भुञ्जते ।

(ज) आहारे यदि संयमो नास्ति, तदापि औषधं कार्यं करोति ।

(झ) आहारस्य असंयमस्य मुख्यं कारणं मनुष्यस्य स्वादलिप्सैव ।

(ञ) चिकित्सालयेषु वन्या ऋक्षाः चिकित्सायै आगच्छन्तो दृश्यन्ते ।

## ४. पाठस्य उपान्तिमस्यानुच्छेदस्य स्वशब्दैः सरलगिरा पुनर्लेखनं कुरुत ।

## ५. पाठस्याधारेण भोजनसंयमस्य लाभान् षड्भिर्वाक्यैर्वर्णयत ।

## ६. पाठस्य प्रथमस्यानुच्छेदस्य श्रुतलेखनं कुरुत ।

## ७. पाठाधारेण रिक्तस्थानं पूरयत

(क) 'आहारशुद्धौ ..................' इति ।

(ख) आहारः .................. मूलसूत्रमस्ति ।

(ग) भोजने मनुष्याणां संयमः .................. ।

(घ) .................. तृप्तये प्रायो भोजनं स्वीकरोति ।

(ङ) मनोऽपि आहारस्य संयमेन .................. भवति ।

(च) .................. स्वस्थचित्तश्च जनः कार्येषु सफलो भवति ।

(छ) मनुष्यः .................. दूरमाधुनिकेषु भोजनापणेषु गच्छति ।

## ८. पाठाधारेण विशेषण-विशेष्यपदे परस्परं मेलयत

| **'अ' खण्डः** | **'आ' खण्डः** |
|---|---|
| अनिन्द्यम् | शक्तिम् |
| स्वस्थम् | शरीरेण |
| ग्राह्यः | कारणम् |
| तस्य | पशवः |
| रोगप्रतिरोधिकाम् | चिकित्सालयाः |
| दुर्बलेन | कर्म |
| मुख्यम् | शरीरम् |
| भ्रमन्तः | आहारः |
| अनेके | मनुष्यस्य |

## ९. पाठादन्विष्य पर्यायपदानि लिखत

**यथा–** बुभुक्षा – क्षुधा

(क) जनः – ........... (ख) गेहे – ...........

(ग) हेतुः – ........... (घ) रुग्णम् – ...........

| | | | | | |
|---|---|---|---|---|---|
| (ङ) रसना | – | ........... | (च) तुन्दम् | – | ........... |
| (छ) निश्चयम् | – | ........... | (ज) अधिकम् | – | ........... |
| (झ) खादेत् | – | ........... | (ञ) देहस्य | – | ........... |

१०. **पाठस्य सारांशं स्वगिरा लिखत ।**

११. **त्रिविधस्य आहारस्य विषये ग्रन्थेषु अन्विष्य दश वाक्यानि लिखत ।**

१२. **पाठमाधृत्य आहारस्य असंयमस्य हानिं वर्णयत ।**

१३. **आहारस्य विषये एकं स्वानुभूतं परानुभूतं वा घटनासन्दर्भं लिखत ।**

१४. **रेखाङ्कितपदाधारेण प्रश्नवाक्यानि निर्मात**

(क) भोजने मनुष्यस्य **संयमः** नास्ति ।

(ख) **स्वस्थचित्तो** जनः कार्येषु सफलो भवति ।

(ग) आहारः **स्वस्थजीवनशैल्या** मूलसूत्रमस्ति ।

(घ) मनोऽपि **आहारस्य संयमेन** स्वस्थं भवति ।

(ङ) मनुष्यो **भोजनापणेषु** भोजनं खादति ।

(च) **रसनेन्द्रियस्य** तृप्तये जनः प्रायो भोजनं स्वीकरोति ।

(छ) मनःशुद्ध्यर्थमाहारस्य कारणता **शास्त्रेण** समुपदिष्टा वर्तते ।

## सर्जनात्मकोभ्यासः

१. **स्वाभिमतानां स्वजीवने पालनीयानामाहारनियमानां सूचीं निर्मात ।**

२. **वैदिकसंस्कृतिविषये एकमनुच्छेदं रचयत ।**

# नीतिपद्यानि

**अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम् ।**
**अयोग्यः पुरुषो नास्ति योजकस्तत्र दुर्लभः ॥१॥**
**अधमा धनमिच्छन्ति धनमानौ तु मध्यमाः ।**
**उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥२॥**
**अवृत्तिव्याधिशोकार्तानुवर्तेत शक्तितः ।**
**आत्मवत् सततं पश्येदपि कीटपिपीलिकम् ॥३॥**
**षड्दोषा हि पुरुषेण हातव्या भूतिमिच्छता ।**
**निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥४॥**
**विद्यार्थं ब्रह्मचारी स्यात् सर्वेषां पालने गृही ।**
**वानप्रस्थः सन्दमने संन्यासी मोक्षसाधने ॥५॥**

१.
**अन्वयः**

अमन्त्रमक्षरं नास्ति, अनौषधं मूलं नास्ति, अयोग्यः पुरुषो नास्ति, (केवलम्) तत्र योजको दुर्लभः (अस्ति) ।

**सरलार्थः –**

प्रत्येकमक्षरं मन्त्ररूपं भवति । अक्षराणि मन्त्रशक्तिसम्पन्नानि भवन्ति परन्तु तस्य मन्त्रस्य साधकस्तु दुर्लभो भवति । एवमेव काऽपि वनस्पतिः औषधशक्त्या हीनो न भवति । सर्वासु वनस्पतिषु न्यूनाधिकरूपेण औषधं भवत्येव परन्तु तं परिचित्य तदुपयोगाय तस्य ज्ञाता आवश्यको भवति । तथैव कोऽपि पुरुषोऽयोग्यो न भवति । सर्वस्मिन् काचित् योग्यता (प्रतिभा) तु भवत्येव किन्तु तस्याः प्रस्फोरणाय सद्गुरुरपेक्ष्यते, स च दुर्लभो भवति । अक्षरेषु मन्त्रशक्तेः, वनस्पतिषु औषधशक्तेः, जनेषु योग्यताशक्तेश्च अन्वेषणं विधाय सत्कर्मसु तेषां योजनं करणीयम् ।

२.
**अन्वयः**

अधमाः (जनाः) धनमिच्छन्ति, मध्यमाः (जनाः) तु धनमानौ (इच्छन्ति), उत्तमाः (जनाः) मानमिच्छन्ति, महतां (जनानाम्) मानो हि धनम् (अस्ति) ।

**सरलार्थः**

संसारे त्रिविधा जना भवन्ति- अधमाः, मध्यमा, उत्तमाश्च । ये सदैव धनमेव कामयन्ते, यत्किमपि कृत्वा धनसङ्ग्रहं कुर्वन्ति, धनार्जनात् परं येषां लक्ष्यं नास्ति, मानार्जनविषये कदापि न चिन्तयन्ति, ते अधमाः कथ्यन्ते । ये जना धनार्जनेन सह मानार्जनाय च प्रवर्तन्ते, स्वाभिमानं स्वसम्मानञ्च परिरक्ष्य सुपथा धनस्यार्जनं यथावश्यकं व्ययञ्च कुर्वन्ति, ते मध्यमाः कथ्यन्ते । ये च जनाः केवलं मानमेव कामयन्ते, धनं लोष्टवद् मत्वा सदैव परोपकाराय स्वजीवनं समर्पयन्ति, ते उत्तमाः कथ्यन्ते । एतेषां उत्तमपुरुषाणां कृते मानो हि धनं भवति । अत एवाऽस्माभिर्महतां जनानां सम्माने सदैव सचेष्टैर्भाव्यम् ।

३.
**अन्वयः**

अवृत्ति-व्याधि-शोकार्तान् (जनान्) शक्तितोऽनुवर्तेत, कीट-पिपीलिकमपि सततमात्मवत् पश्येत् ।

**सरलार्थः**

अस्माभिर्वृत्तिविहीनानाम्, व्याधिपीडितानाम्, शोकार्तानां च जनानां यथाशक्ति रक्षा करणीया । एतादृशेभ्यो जनेभ्यो यथाशक्यं साहाय्यं प्रदातव्यम् । एवमेव सर्वेषां प्राणिनां जीवनं स्वस्य जीवनवदेव मूल्यवद् मत्वा अस्माभिस्तेषु सद्व्यवहारः प्रदर्शनीयः । कीटपिपीलिकादीनां तुच्छप्राणिनामपि प्राणरक्षायै अस्माभिः सदैव प्रयतनीयम् ।

४.
**अन्वयः**

भूतिमिच्छता पुरुषेण निद्रा, तन्द्रा, भयम्, क्रोधः, आलस्यम्, दीर्घसूत्रता (इति) षड्दोषा हातव्या हि ।

**सरलार्थः**

यो जनः स्वजीवने समृद्धिं सफलतां वा कामयते तेन निद्रा, तन्द्रा, भयम्, क्रोधः, आलस्यम्, दीर्घसूत्रता (कार्येषु अशीघ्रता) चेति षड्दोषाः त्यक्तव्या एव । निद्रायाः, तन्द्रायाः, भयस्य, क्रोधस्य, आलस्यस्य, दीर्घसूत्रतायाश्च त्यागेन विना मनुष्यः स्वजीवने साफल्यं नैवाऽधिगच्छति ।

५.
**अन्वयः**

(मनुष्यः) विद्यार्थं ब्रह्मचारी स्यात्, सर्वेषां पालने गृही (स्यात्), सन्दमने वानप्रस्थः (स्यात्), मोक्षसाधने संन्यासी स्यात् ।

**सरलार्थः**

ब्रह्मचर्यम्, गृहस्थः, वानप्रस्थः, संन्यासश्चेति चत्वार आश्रमाः सन्ति । तेषु विद्यार्जनाय ब्रह्मचर्याश्रमो सर्वोपयुक्तो विद्यते अर्थात् विद्यार्थिना ब्रह्मचारिणा भवितव्यम् । जीवनस्य प्रथमचरणे (वयसः प्रथमपादे) ब्रह्मचर्यव्रतं परिपाल्य विद्याध्ययनं विधेयम् । तदनु सर्वेषामाश्रमाणां स्वपरिवारस्य च पालनाय मनुष्येण गृहस्थेन भवितव्यम् । तदनु इन्द्रियाणां दमनाय वानप्रस्थाश्रमोऽवलम्बनीयः । वयसः चरमे पादे मोक्षस्य प्राप्तेर्हेतोः संन्यासी भूत्वा भगवद्भक्तौ, योगसाधनायां च लीनो भवितव्यम् । इत्थं प्रकारेण चतुर्णामाश्रमाणां कृते निर्दिष्टकर्मणां यथाक्रमं सम्पादनेन मनुष्यजीवनं सफलतां याति ।

## शब्दार्थाः

| | |
|---|---|
| अमन्त्रम् - | मन्त्रभिन्न, मन्त्ररहित |
| मूलम् - | जरा, मूल |
| अनौषधम् - | औषधिरहित |
| योजकः - | जोड्ने व्यक्ति |
| दुर्लभः - | दुःखले प्राप्त गर्न सकिने, दुर्लभ |
| अधमः - | नीच, नीच मानिस |
| मध्यमः - | बीचको, मझौला मानिस |
| उत्तमः - | सबभन्दा असल, उत्तम मानिस |
| अवृत्तिः - | काम वा पेसा नभएको मानिस, कामरहितता |
| व्याधिः - | रोग |
| शोकार्तः - | शोकले पीडित, शोकले दुःखी |
| शक्तितः - | शक्तिअनुसार, यथाशक्ति |
| अनुवर्तेत - | समर्थन वा सहयोग गरोस् |
| आत्मवत् - | आफूजस्तै, आफूसमान |
| सततम् - | निरन्तर, लगातार |
| कीटपिपीलिकम् - | किरा र कमिला |
| हातव्या - | त्याग्नुपर्छ, छोड्नुपर्छ |
| भूतिः - | सफलता, समृद्धि |
| इच्छता - | इच्छा गर्ने व्यक्तिद्वारा, चाहने व्यक्तिले |
| तन्द्रा - | उँघ्ने काम, रोग वा निद्राको ताना, हल्का निद्रा वा बेहोसी |

| | |
|---|---|
| दीर्घसूत्रता - | जुम्सोपन, काममा ढिलाइ |
| विद्यार्थम् - | विद्या आर्जनका लागि |
| ब्रह्मचारी - | ब्रह्मचर्य व्रतको पालन गर्ने व्यक्ति, ब्रह्मचर्य आश्रममा रहेको व्यक्ति |
| गृही - | गृहस्थाश्रमी, गृहस्थ आश्रममा रहेको व्यक्ति, जहान-परिवार भएको व्यक्ति |
| वानप्रस्थः - | वानप्रस्थ आश्रममा रहेको व्यक्ति |
| सन्दमने - | इन्द्रियहरूलाई वशमा राख्न वा दबाउन |
| संन्यासी - | संन्यास ग्रहण गरेको व्यक्ति, संन्यास आश्रममा रहेको व्यक्ति |
| मोक्षसाधने - | मोक्ष प्राप्तिका निम्ति |

## अभ्यासः

### श्रवणं भाषणञ्च

**१. श्रुतपूर्वमेकं सुभाषितं कक्षायां संश्राव्य तस्य तात्पर्यमपि निगदत ।**

**२. शिक्षकमनुसृत्य पाठस्थश्लोकानां यति-गति-लयसंयोजनेन आदर्शवाचनं कुरुत ।**

**३. पाठस्थश्लोकेषु प्रयुक्तानि तिङन्तपदानि वदत ।**

**४. अधस्तनपदानामर्थं पाठाधारेण कथयत**

विद्यार्थम्, महताम्, औषधम्, योजकः, दुर्लभः, अनौषधम्, अधमाः, मानः, पालने ।

**५. पाठस्य तृतीयस्य श्लोकस्य सरलार्थं वदत ।**

**६. अधो लिखितं श्लोकं सखिमुखात् श्रुत्वा एकपदेन प्रश्नानामुत्तरं वदत**

संरक्षयेत् प्रयत्नेन सङ्गृहीतं धनादिकम् ।
अर्जने तु महद्दुःखं रक्षणे तच्चतुर्गुणम् ॥

(क) किं प्रयत्नेन संरक्षयेत् ?

(ख) 'धनादिकम्' इति विशेष्यपदस्य विशेषणं किम् ?

(ग) धनस्य रक्षणेऽर्जनात् कतिगुणं दुःखं भवति ?

(घ) सङ्गृहीतं धनं कथं रक्षणीयम् ?

(ङ) 'महद्दुःखम्' इत्यत्र द्वे पदे के ?

७. **पाठस्थानि नीतिपद्यानि कण्ठस्थानि श्रावयत ।**

## पठनम्

१. **अधो लिखितं श्लोकं पठित्वा प्रश्नानुत्तरयत**

स्वजनैर्न विरुद्धयेत न स्पर्धेत बलीयसा ।
न कुर्यात् स्त्रीबालवृद्धमूर्खेषु च विवादनम् ॥

(क) केन सह स्पर्धा न कार्या ?

(ख) कैः सह विरोधो नैव करणीयः ?

(ग) केषु विवादनं नोचितम् ?

(घ) 'स्त्रीबालवृद्धमूर्खेषु' इत्यत्र केषां पदानां समासो विद्यते ? तस्य विग्रहवाक्यञ्च किम् ?

(ङ) 'बलीयसा' इत्यत्र प्रातिपदिकविभक्ती निर्दिशत ।

(च) 'विरुद्धयेत' इत्यत्र धातूपसर्गलकारविभक्तिपुरुषवचनानि निदर्शयत ।

(छ) श्लोकेऽस्मिन् प्रयुक्तानि त्रीणि तिङन्तपदानि कानि ? तेषां स्वशब्दैर्वाक्ये प्रयोगं दर्शयत ।

(ज) श्लोकस्य सरलार्थं त्रिषु वाक्येषु लिखत ।

२. **अधस्तनमनुच्छेदं पठित्वा एकवाक्येन प्रश्नानुत्तरयत**

महापुरुषेषु सम्पत्तौ विपत्तौ चैकरूपता द्रष्टुमनुभवितुञ्च शक्यते । परन्तु सामान्यजनाः चक्रवत् परिभ्रमन्तीभिः सामान्यक्रियाभिरपि प्रभाविता भवन्ति । सामान्यजनाः सौख्यकाले आनन्देन अत्युत्सुका जायन्ते । प्राप्ते कष्टकाले ते निरुत्साहिनः सन्तोऽसहायकतामनुभवन्ति । महापुरुषास्तु यस्यां कस्यामपि अवस्थायां स्वभावं न त्यजन्ति । प्राप्तायां सम्पत्तौ तेषां मनः कमलवत् कोमलं भवति । विपत्तौ च ते विचलिता नैव भवन्ति अपि तु महापर्वतस्य शिलेव नितरां दृढं तिष्ठन्ति । अत एव उक्तमस्ति-

**सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम् ।**
**आपत्सु च महाशैलशिलासङ्घातकर्कशम् ॥**

(क) केषु सम्पत्तौ विपत्तौ चैकरूपता दृश्यते ?

(ख) सामान्यजनाः कैः प्रभाविता जायन्ते ?

(ग) कष्टकाले के निरुत्साहिनो जायन्ते ?

(घ) सम्पत्तौ महापुरुषाणां मनः कीदृशं भवति ?

(ङ) विपत्तौ महापुरुषाः कथं तिष्ठन्ति ?

(च) सामान्यजन-महापुरुषयोः को भेदः ?

३. **श्लोकखण्डानां यथाक्रमं संयोजनेन पूर्णश्लोकं निर्माय पठत**

अमात्यमधिकारिणम्, विश्वस्तमपि सर्वदा, पुत्रं वा भ्रातरं भार्याम्, नात्यन्तं विश्वसेत् कश्चिद् ।

४. **अधस्तनं श्लोकं पठित्वा गुरोर्लक्षणं लिखत**

योऽधीतविद्यः सकलः स सर्वेषां गुरुर्भवेत् ।

न च जात्याऽनधीतो यो गुरुर्भवितुमर्हति ॥

५. **पाठस्यान्तिमं श्लोकं पठित्वा चतुर्ष्वाश्रमेषु मानवैः सम्पाद्यमानानां प्रमुखकार्याणां सूचीं निर्मात ।**

६. **अधस्तनं पद्यं प्रथमं सलयं तदनु मौनं पठित्वा कुलविनाशस्य चत्वारि कारणानि निदर्शयत**

अनृतात् पारदार्याच्च तथाऽभक्षस्य भक्षणात् ।

अगोत्रधर्माचरणात् क्षिप्रं नश्यति वै कुलम् ॥

७. **पाठस्य द्वितीयं श्लोकं तत्सरलार्थञ्च पठित्वा त्रिविधानां मानवानां वैशिष्ट्यं प्रकाशयत ।**

## लेखनम्

१. **पाठस्थश्लोकान् सन्धिविच्छेदपुरःसरमभ्यासपुस्तिकायामनुलिखत ।**

२. **पाठाधारेण रिक्तस्थानं पूरयत**

(क) उत्तमा जनाः ...... इच्छन्ति ।

(ख) आश्रमाः .......... सन्ति ।

(ग) ......... तृतीय आश्रमो विद्यते ।

(घ) भूतिमिच्छता पुरुषेण षड् ........ हातव्याः ।

(ङ) ........... मूलं नास्ति ।

३. **अधस्तनपदानां स्वशब्दैर्वाक्ये प्रयोगं दर्शयत**

अनौषधम्, अक्षरम्, हातव्याः, भूतिः, मध्यमाः, महताम्, आत्मवत्, शक्तितः, तन्द्रा, दीर्घसूत्रता, संन्यासी, ब्रह्मचारी, सततम्, कुर्यात्, विरुद्धचेत ।

**४. अधस्तनस्य श्लोकस्यान्वयं सरलार्थं च लिखत**

अवृत्तिव्याधिशोकार्तानुवर्तेत शक्तितः ।
आत्मवत् सततं पश्येदपि कीटपिपीलिकम् ॥

**५. शिक्षकाद् यथावश्यकं साहाय्यमवाप्य अधस्तनश्लोकस्य भावार्थं प्रकाशयत**

आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम् ।
दानमानापमानं च नवैतानि सुगोपयेत् ॥

**६. पाठाधारेण प्रश्नानुत्तरयत**

(क) योजकस्यावश्यकता कुत्र कुत्र विद्यते ?

(ख) त्रिविधानां जनानां कृते किं किं प्रधानम् ?

(ग) अस्माभिः प्राणिषु कीदृशो व्यवहारः कर्तव्यः ?

(घ) भूतिमिच्छता जनेन किं किं त्यक्तव्यम् ?

(ङ) कीदृशो जनो जीवने साफल्यं लभते ?

(च) विद्यार्जनस्य महत्त्वं पञ्चसु वाक्येषु प्रकाशयत ।

**७. शिक्षकस्य साहाय्येन गृहस्थाश्रमस्य श्रेष्ठत्वविषये अनुच्छेदमेकं रचयत ।**

## सर्जनात्मकोऽभ्यासः

**१. अधस्तनौ श्लोकौ आधृत्य दशानामपराधानां सूचीं निर्मात**

आज्ञोल्लङ्घनकारित्वं स्त्रीवधो वर्णसङ्करः ।

परस्त्रीगमनं चौर्यं गर्भश्चैव पतिं विना ॥

वाक्पारुष्यमवाच्याद्यं दण्डपारुष्यमेव च ।

गर्भस्य पातनं चैवेत्यपराधा दशैव तु ॥


**२. पाठं पठित्वा ज्ञातविषयान् सूत्ररूपेण लिखत ।**

# श्रीकृष्णस्य कृपा

वनवासकाले पाण्डवानां जीवनयापनं काठिन्येन भवति स्म । वने यदा कदा अनेके जनास्तान् मिलन्ति स्म । ततः प्रत्यागत्य हस्तिनापुरं प्राप्तास्ते धृतराष्ट्रं प्रति पाण्डवानां दुःखं वर्णयन्ति स्म । धृतराष्ट्रः स्वस्य भ्रातृजानां पाण्डवानां दुःखवार्तां श्रुत्वा खिद्यते स्म परन्तु दुर्योधनः शकुनिश्च किञ्चित् पृथगेव विचारयन्ति स्म ।

कर्णः शकुनिश्च दुर्योधनस्य चाटुकारितां कुर्वन्ति स्म । अतस्तौ दुर्योधनः कथं सन्तुष्टः स्यादित्येव चिन्तयन्ति स्म । दुर्योधनः सदैव पाण्डवानामापद्ग्रस्तत्वं श्रोतुमिच्छति स्म । एकदा स कर्णं जगाद, "मित्र कर्ण ! अहं पाण्डवान् विपदि स्वचक्षुर्भ्यां द्रष्टुमिच्छामि । अतस्त्वं मातुलः शकुनिश्च एकमुपायं चिन्तयतां यद् वयं वनं गत्वा विपद्ग्रस्तान् पाण्डवान् द्रष्टुं शक्नुमः ।"

कर्ण उवाच, "द्वैतवनेऽस्माकं वशङ्गताः केचन ग्रामाः सन्ति । प्रतिवर्षं तत्र गत्वा पाल्यपशूनां गणना राजकुमाराणां कार्यं भवति । एषा प्रथा चिरकालात् प्रचलितास्ति । अत एव वयं तस्मै कार्याय गन्तुं पितुः सकाशादनुमतिं प्राप्नुयाम ।"



कर्णस्य कथनं श्रुत्वा दुर्योधनः शकुनिश्च अतीव मोदं प्रापुः । राजकुमारा धृतराष्ट्रं प्रति तदर्थमनुमतिं दातुमाग्रहं चक्रुः परन्तु धृतराष्ट्रस्तन्नानुमोदितवान् । दुर्योधनो धृतराष्ट्रमाश्वासयामास यत् ते पाण्डवा यत्र सन्ति, सर्वे तत्र न गमिष्यन्ति, अत्यन्तं सावधानतया कार्यं करिष्यन्तीति । पुत्राशयवशो धृतराष्ट्रोऽनुज्ञां ददौ । विशालेन सैन्यबलेन सह कौरवा राजकुमारा द्वैतवनं प्रति प्रस्थितवन्तः । दुर्योधनः कर्णश्च तादृशे स्थाने शिबिरमस्थापयताम्, यत्र निकटे एव जलाशय आसीत् । ततः पाण्डवानामाश्रमः केवलं चतुःक्रोशं यावद् दूरमासीत् ।

गन्धर्वराजश्चित्रसेनोऽपि स्वस्य परिवारेण सह तस्यैव जलाशयस्य तटे शिबिरं कृतवानासीत् । दुर्योधनस्यानुयायिनो जलाशयं गत्वा तटे पट्टवेश्मनां स्थापनमारब्धवन्तः । तदानीं गन्धर्वराजस्य सेवका दुर्योधनस्यानुयायिन आक्रामन् । दुर्योधनस्य सेवकाः किमपि कर्तुं नाशक्नुवन् । ततस्ते प्राणान् रक्षितुं पलायिताः । दुर्योधनस्तद् ज्ञात्वात्यन्तं क्रुद्धोऽभवत् । स स्वसैन्येन सह तडागं प्रत्यगच्छत् । तत्र प्राप्य गन्धर्वसैनिकैः सह कौरवाः सैनिकाः युद्धं चक्रुः । घोरं युद्धमभवत् । कर्णस्य च रथास्त्राणि भग्नानि । स समरात् पलायितः । एको दुर्योधन एव समाप्तिपर्यन्तं युद्धक्षेत्रे स्थितः । चित्रसेनो दुर्योधनं निगृहीतवान् । अथ तं रज्जुना बद्ध्वा रथे उपविश्य शङ्खवादनेन स्वविजयं घोषितवान् । युधिष्ठिरो दुर्योधनस्य, तत्सहचराणाञ्चापमानं श्रुत्वावदत्, "भ्रातरौ ! एतेऽस्माकं परिवारस्यैव सदस्याः । गच्छतं युवां सम्प्रति । भ्रातरं दुर्योधनं गन्धर्वबन्धनात् कथमपि मोचय ।" युधिष्ठिरस्याज्ञया भीमार्जुनौ गत्वा विकीर्णां कौरवसेनां समयोजयताम् । ते च गन्धर्वेषु निपतिताः । अन्ततो गन्धर्वराजो दुर्योधनं मोचितवान् । एवमपमानिताः कौरवा हस्तिनापुरं प्रत्यागताः ।

पाण्डवानां निर्वासनकाले दुर्योधनो राजसूयं यागं कर्तुमिच्छति स्म परन्तु धृतराष्ट्रयुधिष्ठिरयोः समीपे राजसूययागं कर्तुं तस्याधिकारो नास्तीति पण्डिता अवदन् । अथ ब्राह्मणानामुपदेशमनुसृत्य दुर्योधनो वैष्णवनामकं यज्ञं कृत्वा आत्मानं समतोषयत् । तदा महर्षिर्दुर्वासा दशसहस्रैः शिष्यैः सह दुर्योधनस्य प्रासादमागतः । दुर्योधनस्य अतिथिसत्कारेण ऋषिरतीव प्रसन्नो भूत्वावदत्, "वत्स ! यदि वरमिच्छसि चेद् याचतु ।"

दुर्योधन उवाच, "ऋषिवर ! यथा भवता शिष्यैः सह अतिथित्वेन ममोपरि अनुग्रहः कृतः, तथैव वने मम भ्रातृपाण्डवानुपगत्य तेषामातिथ्यं स्वीकरोतु । भवान् स्वशिष्यैः सह युधिष्ठिरस्य आश्रमं कृपया तदानीं प्राप्नोतु यदा द्रौपदी पाण्डवादीन् तत्परिवारसदस्यान् भोजयित्वा स्वयञ्च भुक्त्वा सर्वे विश्रामरताः स्युः ।" स तत्क्षणमेव दुर्योधनस्य आग्रहं स्वीकृतवान् ।

मुनिर्दुर्वासाः स्वशिष्यैः सह युधिष्ठिरस्य आश्रमं प्राप्नोत् । युधिष्ठिरो भ्रातृभिः सह सशिष्यं मुनिं सम्यक् सत्कृतवान् । तदानीं मुनिरवदत्, "अस्तु ! वयं सर्वे स्नानं कृत्वा आगमिष्यामः । तावत्पर्यन्तं भोजनं सज्जीकृत्य स्थापयन्तु ।" दुर्वासाः शिष्यैः सह स्नानार्थं नदीं प्रति अगच्छत् ।

वनवासस्यारम्भे युधिष्ठिरेण प्रसादितः सूर्यस्तस्मै एकमक्षयपात्रं दत्तवान् आसीत् । द्वादशवर्षपर्यन्तमस्य पात्रस्य माध्यमेन युष्मान् भोजनं दास्यामि परन्तु प्रतिदिनं प्रातःसायं पात्रादस्माद् यदा द्रौपदी भोजनं कृतवती भविष्यति ततः पात्राद् भोजननिःसरणं समाप्तिं गमिष्यतीति च तेन प्रोक्तमासीत् । यदा तु दुर्वासाः स्वशिष्यैः सह तत्र सम्प्राप्तः, तस्मिन् काले सर्वान् परिवारसदस्यान् भोजयित्वा द्रौपद्यपि भोजनं स्वीकृतवती आसीत् । अतस्तस्य प्रातःकालस्य कृते सूर्यप्रदत्तमक्षयपात्रं शून्यमासीत् । द्रौपदी अतीव चिन्तिता बभूव । कञ्चन सहायं न प्राप्य ईश्वरं स्मृतवती । सा श्रीकृष्णस्य परमा भक्ता आसीत् । अतः ईश्वरस्य स्मरणसमकालमेव सहसा तत्र श्रीकृष्णः सम्प्राप्तः । स पाकशालां गत्वा द्रौपदीमवोचत्- "भगिनि कृष्णे ! अहं बहु क्षुधार्तोऽस्मि । किमपि भोजनं यच्छ ।" भोजनस्य समाप्त्याः कारणेन चिन्तापन्ना द्रौपदी ततोऽपि चिन्ताग्रस्ता जाता ।

कृष्ण उवाच, "कृपया तव अक्षयपात्रमानय । पश्य तस्मिन् किमपि अस्ति वा ?" द्रौपदी त्वरया पात्रमानयत् । पात्रस्यान्तरेकस्मिन् भागे अन्नस्य कणो हरितशाकखण्डश्चास्ताम् । श्रीकृष्णोऽन्नकणं शाकञ्चादाय मुखे स्थापयित्वा मनसा उक्तवान्, "एतद् भोजनं भवतु, एतेन तेषां क्षुधानिवृत्तिर्भवेत् ।" एतद् दृष्ट्वा द्रौपदी व्यचारयत्, "कथमहं पात्रमपि सम्यक् न प्रक्षालितवती ! तस्मादेव कारणाद् वासुदेवः तत्रावशिष्टमुच्छिष्टमेव भोजनरूपेण स्वीचकार । धिग् माम् !" तदानीमेव श्रीकृष्णो बहिर्गत्वा भीमसेनमवदत्, "भीम ! शीघ्रं गत्वा मुनिदुर्वाससं शिष्यैः सह भोजनार्थमाह्वय ।

भीमसेनो नदीं प्राप्नोत्, यत्र मुनिर्दुर्वासाः सशिष्यं स्नानार्थं गत आसीत् । तत्र समीपं प्राप्य भीमसेनोऽशृणोद् यत्- शिष्यसमुदायो मुनिं दुर्वाससं प्रति वदन्ति, "गुरुदेव ! वृथा वयं युधिष्ठिरं भोजनं सज्जीकर्तुं कथितवन्तः । अस्माकमुदरन्तु पूर्णमस्ति । अस्मिन् समयेऽस्माकं भोजनस्येच्छा सर्वथा नास्ति ।" दुर्वासाः तत्र प्राप्तं भीमसेनमवदत्, "वयं सर्वे खादितवन्तः । त्वं गत्वा युधिष्ठिरं कथयतु यत् सोऽस्मान् क्षमताम् ।" इत्युक्त्वा स शिष्यैः सह तत एव पलायितः ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| प्रत्यागत्य - | फर्किएर | भ्रातृजानाम् - | भतिजाहरूको |
| दुःखवार्ता - | दुःखको खबर | खिद्यते स्म - | दुःखी हुन्थे |
| चाटुकारिता - | चापलुसी | आपद्ग्रस्तत्वम् - | आपत्तिमा पर्नु |
| द्वैतवने - | द्वैत नामको वनमा | ग्रामाः - | गाउँहरू |
| वशङ्गताः - | नियन्त्रणमा रहेका | पाल्यपशूनाम् - | घरपालुवा जनावरहरूको |
| चिरकालात् - | लामो समयदेखि | मोदः - | खुसी |
| नानुमोदितवान् - | समर्थन गरेनन् | आश्वासयामास - | आश्वासन दिए |
| पुत्राशयवशः | छोराको चाहनाको वशमा परेका | अनुज्ञा - | अनुमति |
| | | सर्वथा - | सबै प्रकारले |

| | | | |
|---|---|---|---|
| चतुःक्रोशम् - | चार कोस | जलाशयः - | तलाउ |
| तटे - | किनारमा | पट्टवेश्मनाम् - | टेन्टहरूको |
| अनुयायिनः - | पछ्यौटेहरू | घोरं युद्धम् - | डरलाग्दो लडाइँ |
| रथास्त्राणि - | रथ र हतियारहरू | भग्नानि - | भाँचिए |
| समरात् - | युद्धबाट | पलायितः - | भागे |
| निगृहीतवान् - | पक्रिए | अथ - | त्यसपछि, अब |
| रज्जुना बद्ध्वा - | डोरीले बाँधेरे | उपविश्य - | बसेर |
| कथमपि - | जसरी भए पनि | निपतिताः - | खनिए |
| अनुग्रहः - | कृपा | भ्रातृपाण्डवानाम् - | दाजुभाइ पाण्डवहरूको |
| प्रसादितः - | खुसी पारिएका | अक्षयपात्रम् - | नाश नहुने भाँडो |
| पाकशाला - | भान्छा | क्षुधार्तः - | भोकले आत्तिएको |
| उच्छिष्टम् - | जुठो | चिन्तापन्ना - | चिन्ताले युक्त |
| त्वरया - | तुरुन्तै | पात्रस्यान्तः - | भाँडाभित्र |
| हरितशाकखण्डः - | हरियो सागको टुक्रा | धिग् माम् - | मलाई धिक्कार छ |
| शिष्यसमुदायः - | चेलाहरूको समूह | उदरम् - | भुँडी, पेट |

## अभ्यासः

### श्रवणं भाषणञ्च

१. **कक्षायां पाठस्य श्रवणानन्तरं स्वशैल्या स्वमातृभाषया कथां श्रावयत ।**

२. **पाठस्य तृतीयचतुर्थानुच्छेदौ क्रमेण पठित्वा कक्षायां श्रावयत ।**

३. **अधस्तनानि समस्तपदानि शुद्धमुच्चारयत**

वनवासकाले, जीवनयापनम्, हस्तिनापुरम्, धृतराष्ट्रम्, भ्रातृजानाम्, दुःखवार्ताम्, चाटुकारिताम्, आपद्ग्रस्तत्वम्, स्वचक्षुर्भ्याम्, विपद्ग्रस्तान्, चिन्तापन्ना, द्रौपदी, ततोऽपि, चिन्ताग्रस्ता, अक्षयपात्रम्, हरितशाकखण्डः, अन्नकणम्, क्षुधानिवृत्तिः, भोजनरूपेण, दुर्वाससम्, भोजनार्थम्, स्नाननदीम्, सशिष्यम्, शिष्यसमुदायः ।

४. **पाठस्य चरमस्यानुच्छेदस्य क्रियापदानि चित्वा एकैकं वाक्यं श्रावयत ।**

५. **महाभारतस्य विषये पञ्च वाक्यानि कथयत ।**

६. **भगवद्भक्तेरावश्यकताया विषये परस्परं विमृशत ।**

७. **मित्रमुखात् पाठस्योपान्तिममनुच्छेदं श्रुत्वा प्रश्नानुत्तरयत**

(क) पात्रस्यान्तः किमासीत् ?

(ख) द्रौपदी कां धिक्कृतवती ?

(ग) द्रौपदी त्वरया किमानयत् ?

(घ) श्रीकृष्णो मनसा किमुक्तवान् ?

(ङ) श्रीकृष्णो भीमसेनं किमवदत् ?

(च) कस्मात् कारणाद् वासुदेव उच्छिष्टमेव भोजनं स्वीचकार ?

८. **अधस्तनक्रियापदानि कक्षायां श्रावयत**

भवति स्म, मिलन्ति स्म, वर्णयन्ति स्म, खिद्यते स्म, विचारयन्ति स्म, कुर्वन्ति स्म, स्यात्, चिन्तयन्ति स्म, इच्छति स्म, इच्छामि, शक्नुमः, उवाच, भवति, अस्ति, प्राप्नुयाम, प्रापुः, अनुमोदितवान्, सन्ति, गमिष्यन्ति, करिष्यन्ति ।

९. **अधोदत्तानां पदानामर्थं श्रावयत**

वनवासस्यारम्भे, प्रसादितः, द्वादशवर्षपर्यन्तम्, भोजननिःसरणम्, स्वशिष्यैः सह, सम्प्राप्तः, परिवारसदस्यान्, आह्वय, प्रातःकालस्य कृते, अक्षयपात्रम्, शून्यम्, सहायः, पाकशालायाम्, क्षुधार्तः, चिन्ताग्रस्ता, अन्नस्य कणः, क्षुधानिवृत्तिः, व्यचारयत्, प्रक्षालितवती, उच्छिष्टम्, धिग् माम्, शीघ्रम्, भोजनार्थम् ।

१०. **अधस्तनानि वाक्यानि कक्षायां श्रावयत**

(क) **यथा** राजा तथा प्रजाः ।

(ख) शुद्धं **भोजनं** चित्तं शोधयति ।

(ग) **दुर्योधनो** दुष्टस्वभाव आसीत् ।

(घ) **द्रौपदी** श्रीकृष्णस्य भक्तिं करोति स्म ।

(ङ) आचार्यः **स्वशिष्यैः** सह भ्रमणार्थं गतः ।

(च) ईश्वरस्य **अनुग्रहं** विना किमपि न भवति ।

(छ) **युधिष्ठिरस्य** कर्तव्यनिष्ठा अवर्णनीया आसीत् ।

(ज) श्रीकृष्ण **उवाच**, "भूतानामस्मि चेतना" इति ।

(झ) पिता सम्यग् विचार्य एव पुत्रस्य **आग्रहं** स्वीकरोतु ।

(ञ) तत्र कार्यक्रमे स्वामिना रामानन्देन **आतिथ्यं** स्वीकृतमासीत् ।

**११. पाठं श्रुत्वा ज्ञातं पाठसन्देशं श्रावयत ।**

## पठनम्

**१. अधस्तनमनुच्छेदद्वयं पठित्वा निर्दिष्टानि कार्याणि कुरुत**

सर्वेषां कृते ज्ञानार्जनमत्यावश्यकम् । अन्नजलादिवत् शिक्षा इदानीमत्यावश्यकी मन्यते । तदर्थमेव सर्वत्र मानवसमाजे विद्यालयस्य स्थापना विहिता दृश्यते किन्तु गृहं जनानां प्रथमा पाठशाला इति सर्वे जानन्त्येव । गृहे एव जन्मन आरभ्य मृत्युपर्यन्तं जना व्यवहारतः परम्परातो वा नैकविधानि कलाशिल्पादिज्ञानानि प्राप्नुवन्ति । तत्रैव व्यक्तित्वविकासाय कार्याणि विधाय भविष्यनिर्माणं च सम्भविष्यति । नवजातशिशुः क्रमशः गृहे एव समाहितो भूत्वा परिवारे समाजे मित्रमण्डले च आत्मानं व्यवस्थापयति । संसारे कथं प्रवर्तनीयमिति च स गृहादेव विजानाति । इत्येव न, जीवनस्य महत्ता का इति अववोधनाय गृहे एव समुचितः परिवेशः प्राप्यते । अतो गृहं महती संस्था मन्यते ।

गृहे एव मानवजीवनं सुरक्षितं व्यवस्थितं च भवति । अत्र अन्नादिखाद्यं वस्तु, शिक्षा, स्वास्थ्यम्, सामूहिकोन्नतिः, संस्कारः, सभ्यता चेत्यादीनि जीवनोपयोगिवस्तूनि स्वतः उपलभ्यन्ते । गृहपरिसरे एव कश्चिद् बालः सामाजिकीकरणस्यावसरं लभते । पारिवारिकैः सदस्यैः सह उषित्वा रममाणो जनः सुखदुःखहर्षप्रेमादिभावनाभावितः सन् गृहमेव संसारं मनुते । कर्तव्याकर्तव्यबोधाय मर्यादाशिक्षणाय, संस्कारसभ्यतादिभिः सम्पन्नो भूत्वा जीवनाय गृहातिरिक्तो नान्य उत्तमो विद्यालयो भवितुं शक्नोति । अतो गृहमेव मानवानां प्राथमिकी चरमा च आवश्यकता ।

**(क) अधस्तनानां प्रश्नानामुत्तराणि लिखत**

(अ) नवजातः शिशुः कथं कुत्र आत्मानं व्यवस्थापयति ?

(आ) गृहं कीदृशी संस्था ?

(इ) गृहे किं किं वस्तु प्राप्यते ?

(ई) किमर्थं जनो गृहमेव संसारं मनुते ?

(उ) गृहस्य सर्वोत्तमविद्यालयत्वे को हेतुः ?

**(ख) अधस्तनानां समस्तशब्दानां विग्रहं कुरुत**

मानवसमाजे, कलाशिल्पादिज्ञानानि, भविष्यनिर्माणम्, सुखदुःखहर्षप्रेमादिभावनाभावितः, व्यक्तित्वविकासाय, सामूहिकोन्नतिः, कर्तव्याकर्तव्यबोधाय, संस्कारसभ्यतादिभिः, गृहातिरिक्तः

**(ग) अधस्तनानि भाषिककार्याणि कुरुत**

(अ) एकार्थवाचकं पदयुग्मद्वयमन्विष्य लिखत ।

(आ) 'उषित्वा' इत्यस्य प्रकृतिप्रत्ययौ कौ ।

(इ) 'ता' प्रत्ययान्तानि त्रीणि तद्धितान्तपदानि अन्विष्य तेषां प्रकृतिप्रत्ययविभागं कुरुत ।

(ई) 'प्राप्नुवन्ति, मन्यते, मनुते' एतेषां तिङन्तपदानां धातुलकारपुरुषवचनानि निर्दिशत ।

(उ) 'गृहे एव मानवजीवनं सुरक्षितं व्यवस्थितं च भवति' वाक्यमिदं भाववाच्ये परिवर्तयत ।

## २. शल्यतन्त्रविषयकं प्रदत्तं गद्यांशमधीत्य निर्दिष्टकार्याणि कुरुत

प्रजासृष्टेः प्राग्ब्रह्मणा प्रणीत आयुर्वेदे लक्ष्यं श्लोका आसन् । ब्रह्माणमनु दक्षाश्विनीकुमारेन्द्राणां परम्परायां धन्वन्तरिणा ब्रह्मनिर्मितः स एवायुर्वेदः साक्षात्कृतः । मनुष्याणामायुषः क्षीणतां बुद्धेर्ह्रसमानत्वं च विलोक्य धन्वन्तरिणा तस्य शल्यतन्त्रादयोऽष्टौ विभागाः कृताः । ते चाष्टौ विभागाः स्वस्य धन्वन्तरिशिष्यैः सुश्रुतादिभिः पृथक् पृथगधीताः । त एवाष्टौ विभागाः स्वास्थ्यसंरक्षकस्यायुर्वेदस्याष्टाङ्गत्वेन प्रसिद्धाः सन्ति- शल्यतन्त्रम्, शालाक्यतन्त्रम्, कायचिकित्सा, कौमारभृत्यम्, अगदतन्त्रम्, रसायनतन्त्रम्, वाजीकरणतन्त्रम्, भूतविद्या चेति । एतेषु प्रथमस्य शल्यतन्त्रस्याध्ययनं धन्वन्तरिशिष्येण महर्षिणा सुश्रुतेन विहितम् । ततस्तेनैव सर्वप्रथमं शल्यतन्त्रस्य वैचारिकाधारभूतसिद्धान्तानां प्रतिपादनं विहितम् । अतः शल्यतन्त्रस्य प्रणेता सुश्रुतो मन्यते । सुश्रुतसिद्धान्तानाधृत्यैव प्राचीनकाले शल्यक्रियादीनां सम्पादनं विधीयते स्म । यद्यपि सुश्रुतसंहितायां कर्ण-कण्ठ-शिरोरोगाणाम्, प्रसूतितन्त्रस्य, चिकित्साविज्ञानस्य च विषयाः प्रतिपादिताः सन्ति, तथापि विशेषेण शल्यचिकित्सायां सुश्रुतसंहिताया अवदानं विशिष्टं वर्तत इति सुश्रुतसंहितायाः शल्यतन्त्राधारग्रन्थत्वं विद्वद्भिरङ्गीकृतमस्ति । सुश्रुतेन सुश्रुतसंहितायां वर्णितः शवच्छेदनविधिरधुना 'पोस्टमार्टम'नाम्ना विकसितो वर्तते चेत् नासासन्धानविधिरधुना

'प्लास्टिकसर्जरी'नाम्ना विकसितो वर्तते । सुश्रुतेन तत्र शल्यचिकित्सकानां गुणा अपि वर्णिताः सन्ति, शल्यक्रियायै यन्त्राणां प्रयोगोपायः प्रशिक्षितोऽस्ति, यन्त्राणां गुणा अवगुणाश्च निर्धारिताः सन्ति ।

शल्यं शरीरगता पीडाऽस्ति । तच्छल्यं परिभाषयन् डल्हणः प्रवदति-

**अतिप्रवृद्धं मलदोषजं वा शरीरिणां स्थावरजङ्गमानाम् ।**
**यत्किञ्चिदाबाधकरं शरीरे तत्सर्वमेव प्रवदन्ति शल्यम् ।**

एतदनुसारेण शरीरान्तःप्रवृद्धानां शारीरिकाणां मानसिकानां वा दोषाणां कारणेन, तृणकाष्ठादिभिर्बाह्यैः स्थावरैर्जङ्गमैर्वा वस्तुभिः कृतस्य व्रणस्य कारणेन वा शरीरे जाता या कापि पीडा शल्यं कथ्यते । तस्या एव पीडाया निदानविषयकं शास्त्रं शल्यतन्त्रमस्ति । 'तत्र शल्यं नाम विविधतृणकाष्ठपाषाणपांशुलोहलोष्टास्थिबालनखपूयस्रावदुष्टव्रणान्तर्गर्भशल्योद्धरणार्थम्, यन्त्रशस्त्रक्षाराग्निप्रणिधानव्रणविनिश्चयार्थञ्च' इति सुश्रुतसूत्रानुसारेण शल्यतन्त्रं तृण-काष्ठ-पाषाण-धूलिकण-लोहखण्ड-मृत्तिका-अस्थिखण्ड-केश-नखादीनां कारणेन जातायाः पीडायाः, पूयभरितव्रणजपीडायाः, रक्तस्रावकृतायाः पीडायाः, दूषितव्रणकृतपीडायाः, अन्तःपीडाया गर्भकृतपीडायाश्च यन्त्र-शस्त्र-क्षार-अग्निकर्मादिभिर्निवारणविधिबोधकं शास्त्रमस्ति । एतच्छास्त्रं व्रणानामवस्थानिश्चयं च बोधयति ।

**(क) एकपदेनोत्तरयत**

(अ) प्रजासृष्टेः प्राग्ब्रह्मणा प्रणीत आयुर्वेदे कति श्लोका आसन् ?

(आ) आयुर्वेदस्य कियन्तो विभागाः सन्ति ?

(इ) शल्यतन्त्रस्य प्रणेता कः ?

(ई) कस्य शल्यतन्त्राधारग्रन्थत्वं विद्वद्भिरङ्गीकृतमस्ति ?

(उ) किं नाम शल्यम् ?

**(ख) एकवाक्येनोत्तरयत**

(अ) केषां परम्परायां धन्वन्तरिणा ब्रह्मनिर्मित आयुर्वेदः साक्षात्कृतः ?

(आ) किमर्थं धन्वन्तरिणाऽऽयुर्वेदस्य शल्यतन्त्रादयोऽष्टौ विभागाः कृताः ?

(इ) शल्यतन्त्रस्य प्रथमोऽध्येता कः ?

(ई) सुश्रुतेन सुश्रुतसंहितायां वर्णितः को विधिरधुना 'पोस्टमार्टम'विधिः कथ्यते ?

(उ) सुश्रुतेन सुश्रुतसंहितायां वर्णितो नासासन्धानविधिरधुना केन नाम्ना विकसितो वर्तते ?

(ऊ) सुश्रुतसूत्रानुसरेण कीदृशी पीडा शल्यं कथ्यते ?

**(ग) शल्यतन्त्रविषयके सुश्रुतसंहिताग्रन्थे के विषयाः सन्ति ? तस्य शल्यतन्त्राधारग्रन्थत्वं च कथं सिद्ध्यति ? स्वभाषयाऽनुच्छेदमेकं रचयत ।**

**(घ) शल्यतन्त्रं कीदृशं शास्त्रमस्ति ?**

**(ङ) निर्देशानुसारेण भाषिककार्याणि कुरुत**

(अ) 'प्राग्ब्रह्मणा', 'शल्यतन्त्रादयोऽष्टौ' इत्यनयोः सन्धिविच्छेदं कुरुत ।

(आ) 'प्रणेता', 'अवदानम्' इत्यनयोः पदयोर्धातूपसर्ग-प्रत्ययान् निदर्शयत ।

(इ) 'ततस्तेनैव सर्वप्रथमं शल्यतन्त्रस्य वैचारिकाधारभूतसिद्धान्तानां प्रतिपादनं विहितम् ।' वाक्यमिदं कर्तृवाच्ये परिवर्तयत ।

(ई) 'नाम्ना', 'शल्यक्रियायै' इत्यनयोर्विभक्तिनिर्देशं कुरुत ।

(उ) 'तच्छल्यं परिभाषयन् डल्हणः प्रवदति ।' इति वाक्यमनद्यतनभूतकाले परिवर्तयत ।

(ऊ) गद्यांशाभ्यन्तरे वर्तमानस्य पद्यस्य छन्दो विनिश्चित्य तल्लक्षणं च लिखत ।

## लेखनम्

### १. पाठाधारेण रिक्तस्थानं पूरयत

(क) वने ........... अनेके जनाः ........... मिलन्ति स्म ।

(ख) वनवासकाले ........... जीवनयापनं ........... भवति स्म ।

(ग) ........... शकुनिश्च किञ्चित् ........... विचारयन्ति ........... ।

(घ) धृतराष्ट्रः ........... भ्रातृजानां पाण्डवानां ........... श्रुत्वा खिद्यते स्म ।

(ङ) ........... प्रत्यागत्य ........... प्राप्तास्ते धृतराष्ट्रं प्रति ........... दुःखं वर्णयन्ति स्म ।

### २. पाठाधारेण विशेषण-विशेष्यपदे परस्परं मेलयत

| **'अ' खण्डः** | **'आ' खण्डः** |
|---|---|
| केचन | धृतराष्ट्रः |
| एषा | सैन्यबलेन |
| तस्मै | राजकुमाराः |
| पुत्राशयवशः | ग्रामाः |
| विशालेन | प्रथा |
| कौरवाः | कार्याय |
| भ्रातरम् | ऋषिः |
| महर्षिः | सूर्यः |
| प्रसन्नः | दुर्योधनम् |
| प्रसादितः | दुर्वासाः |

३. **समीचीनकथने 'आम्', असमीचीनकथने च 'न' इति लिखत**

(क) द्रौपदी अतीव प्रसन्ना बभूव ।

(ख) सहसा तत्र श्रीकृष्णः सम्प्राप्तः ।

(ग) दुर्योधनः शैवनामकं यज्ञं कृतवान् ।

(घ) द्रौपदी बलरामस्य परमा भक्ता आसीत् ।

(ङ) दुर्योधनो राजसूयं यागं कर्तुमिच्छति स्म ।

(च) श्रीरामः पाकशालां गत्वा द्रौपदीमवोचत् ।

(छ) दुर्वासाः शिष्यैः सह स्नानार्थं नदीं प्रत्यगच्छत् ।

(ज) कञ्चन सहायं न प्राप्य द्रौपदी ईश्वरं स्मृतवती ।

(झ) सूर्यो युधिष्ठिराय एकमक्षयपात्रं दत्तवान् ।

(ञ) युधिष्ठिर एकाकी सशिष्यं मुनिं सम्यक् सत्कृतवान् ।

(ट) महर्षिर्दुर्वासा दशसहस्रैः शिष्यैः द्रुपदस्य प्रासादमागतः ।

(ठ) मुनिर्दुर्वासाः स्वशिष्यैः सह युधिष्ठिरस्य आश्रमं प्राप्नोत् ।

४. **पाठस्य द्वितीयानुच्छेदस्य श्रुतलेखनं कुरुत ।**

५. **पदानि प्रयुज्य वाक्यानि रचयत**

सेवकाः, ततः, ज्ञात्वा, सह, तत्र, सैनिकाः, घोरम्, समरात्, अथ, रथे, शङ्खम्, अपमानम्, गच्छ, सम्प्रति, बन्धनात्, भीमार्जुनौ, च, निपतिताः, मोचितवान्, कौरवाः ।

६. **पाठाधारेण प्रश्नानुत्तरयत**

(क) दुर्योधनः कर्णं किं जगाद ?

(ख) दुर्योधनः कमाश्वासयामास ?

(ग) धृतराष्ट्रः किमर्थं खिद्यते स्म ?

(घ) धृतराष्ट्रः किं नानुमोदितवान् ?

(ङ) राजकुमाराणां कार्यं किं भवति ?

(च) के दुर्योधनस्य अनुयायिन आक्रामन् ?

(छ) कौरवा राजकुमारा कुत्र प्रस्थितवन्तः ?

(ज) दुर्योधनः सदैव किं श्रोतुमिच्छति स्म ?

(झ) जना धृतराष्ट्रं प्रति किं वर्णयन्ति स्म ?

(ञ) कौ दुर्योधनस्य चाटुकारितां कुरुतः स्म ?

(ट) किं श्रुत्वा दुर्योधनः शकुनिश्च मोदं प्रापुः ?

(ठ) चित्रसेनः स्वस्य शिबिरं कुत्र कृतवान् आसीत् ?

(ड) द्वैतवनस्य केचन ग्रामाः कस्य वशङ्गता आसन् ?

(ढ) दुर्योधनः कर्णश्च कीदृशे स्थाने शिबिरमस्थापयताम् ?

(ण) वनवासकाले पाण्डवानां जीवनयापनं कथं भवति स्म ?

**७. पाठस्य प्रथमानुच्छेदस्य स्वशब्दैः सरलगिरा पुनर्लेखनं कुरुत ।**

**८. भगवद्भक्तेर्महत्त्वं पञ्चभिर्वाक्यैर्लिखत ।**

**९. पाठादन्विष्य पर्यायपदानि लिखत**

| | | | |
|---|---|---|---|
| **यथा-** | अरण्ये | – | वने |
| | (क) कष्टेन | – | ........... |
| | (ख) निवर्त्य | – | ........... |
| | (ग) आपदि | – | ........... |
| | (घ) आकर्णयितुम् | – | ........... |
| | (ङ) प्रतिवत्सरम् | – | ........... |
| | (च) हर्षम् | – | ........... |
| | (छ) कर्म | – | ........... |
| | (ज) ह्रदः | – | ........... |
| | (झ) पटशालायाम् | – | ........... |
| | (ञ) रुष्टः | – | ........... |

१०. **पाठस्थायाः कथायाः कथानकं लिखत ।**

११. **कथायाः स्रोतोग्रन्थस्य महाभारतस्य विषये दश वाक्यानि लिखत ।**

१२. **कथामाधृत्य दुर्योधनस्य चरित्रं वर्णयत ।**

१३. **महाभारतस्य अन्यां काञ्चन कथामन्विष्य स्वभाषया विलिख्य समुचितं शीर्षकं दत्त ।**

१४. **रेखाङ्कितपदाधारेण प्रश्नवाक्यानि निर्मात**

(क) भीमसेनो **नदीं** प्राप्नोत् ।

(ख) **अस्माकम्**उदरन्तु पूर्णमस्ति ।

(ग) स **शिष्यैः** सह तत एव पलायितः ।

(घ) दुर्वासा **भीमसेनम्**अवदत् ।

(ङ) अस्माकं **भोजनस्य** इच्छा सर्वथा नास्ति ।

(च) शिष्यसमुदायो **मुनिं दुर्वाससं** प्रति वदन्ति ।

(छ) मुनिर्दुर्वासाः सशिष्यं **स्नानार्थं** गतः ।

(ज) **वयं** युधिष्ठिरं भोजनं सज्जीकर्तुं कथितवन्तः ।

## सर्जनात्मकोऽभ्यासः

१. **पञ्चभिर्वाक्यैः प्रदत्तं चित्रं वर्णयत ।**



## २. प्रदत्तानि सूत्राण्याधृत्य लघुकथां रचयत

(क) शीतस्य भीषणः प्रकोपः ।

(ख) सम्राट् चन्द्रगुप्तः ।

(ग) निर्धनेभ्यः कम्बलानां वितरणं भवेदिति तस्य निश्चयः ।

(घ) प्रधानमन्त्रिणे चाणक्याय तस्य कार्यभारप्रदानम् ।

(ङ) भृत्यैः कम्बलानां तस्य कुटीरे स्थापनम् ।

(च) रात्रौ तत्र केषाञ्चन चौराणामागमनम् ।

(छ) कम्बलान् चोरयितुं तस्य कुटीरे तेषां प्रवेशः ।

(ज) चाणक्यस्य तत्र कम्बलं विना हि शयनम् ।

(झ) चौराणां पदध्वनिं श्रुत्वा चाणक्यस्य व्युत्थानम् ।

(ञ) चाणक्यं प्रति चौराणां प्रश्नः- भवतां समीपे कम्बलानां राशिरस्ति तथापि भवान् कम्बलं विनैव स्वपिति ?

(ट) चाणक्यस्योत्तरम्- कम्बलाः केवलं निर्धनानां कृते वितरणार्थम् । यद्यहमेतेष्वेकं स्वीकरोमि तर्हि अहमपि चौरो भवामि ।

(ठ) तस्योत्तरेण नतमस्तकैश्चौरैस्तस्य पादयोः पतित्वा क्षमायाचना ।

# दुर्व्यसनं नैव जीवनम्

(प्रातश्चायपानं कुर्वन् गृहाङ्गणे आतपं सेवमानस्य कपिलस्य गृहे तद्ग्रामवासी बाल्यकालिकः सखा विश्वनाथः आकृत्या मलिनमुखो हताश इव भीत इव च दृश्यमानः सम्प्राप्नोति ।)

**कपिलः** सखे ! म्लानवदनो वर्तसे ? किमभवत् ? आगच्छ, आसन्द्यां तिष्ठ । (विश्वनाथ आसन्दीमुपतिष्ठति)

**विश्वनाथः** (अधः पश्यन्) कपिल, समय सर्वान् परिवर्तयति इति तव कथनं कदाचिन्मया छात्रकाले एवाऽङ्गीकृतं भवेत् तर्हि इदानीं ममैषा दशा न भवेत् ।

**कपिलः** (सविस्मयम्) त्वया किं कथ्यमानं वर्तते, अहं तु किमपि न ज्ञातवान् किल । सुस्पष्टं ब्रूहि । का दशा त्वयि आपतिता ?

**विश्वनाथः** किं किं वदेयम् ? किमपि कुत्रापि समीचीनं नास्ति ।

(रक्तशाटीवसना कुसुमशोभितकेशपाशा प्रदीप्तवदना कपिलस्य पत्नी मन्दिरा चायं गृहीत्वा आयाति ।)

**मन्दिरा** (कपिलाय चायं ददती) भ्रातः ! चायं गृह्यताम् । (पत्युर्निकटमुपस्थाय) बहुकालेन अद्येह भवतो दर्शनं जातम् । तत्रापि प्रभाते । सर्वत्र परिवारे मङ्गलं वर्तते किम् ?

**कपिलः** मन्दिरे ! एतस्य आगमनेन यथा संप्रसन्नोऽस्मि तथैवैतस्य दीनतया भृशं दुःखितोऽस्मि ।

**मन्दिरा** अहमपि भ्रातुर्मुखमण्डलं विलोकमाना एनं व्यथितमनुभवामि । भ्रातः ! का वार्ता ?

**विश्वनाथः** छात्रकाले बहुशः सखायो महता श्रमेणाऽपठन् । ते सर्वे सम्प्रति व्यवसायिनः, सर्वकारस्य कर्मचारिणः, शिक्षकाः, प्रहरिणः, चिकित्सकाश्च अभवन् । (कपिलं पश्यन्) त्वं सर्वकारस्य सचिवो वर्तसे । पितुः सम्पत्तौ अभिमानं गृहीत्वा मयाऽध्ययनं तु तदैव त्यक्तम् । इदानीं पूर्वजप्राप्ता धनभूम्यादिचलाचलसम्पत्तयोऽपि विनष्टिङ्गताः ।

**कपिलः** किम् किम् ? कथम् विनष्टाः तावन्त्यस्तव सम्पत्तयः ?

**विश्वनाथः** (दीर्घं निःश्वस्य) अलसो भूत्वा दुःसङ्गत्या च यदा मया अध्ययनं त्यक्तं तत एव ममाऽधोगतिः प्रारब्धाः । त्वं तु जानासि एव, ततोऽहमात्मानं स्वतन्त्रं स्वच्छन्दं च मन्यमानः त्वत्तुल्यानां सन्मित्राणां मान्यजनानां च हितोपदेशं तिरस्कृत्य धूमपाने मद्यपाने च प्रवृत्तोऽभवम् ।

**कपिलः** सत्यमुक्तम् । आम्, तदानीमभिमानान्धस्त्वं हितैषिणां वचनं तृणवदुपेक्षितवान् ।

**विश्वनाथः** कपिल ! धनाभिमानो जनानां विनाशस्य कारणम् । स जनान् सम्पूर्णतया विनाशयति । इदानीं मम सा एवावस्था वर्तते । (मन्दस्वरेण) मच्चिन्तया मत्कृतदुष्कर्मसमुद्भूतया लोकलज्जया च अकाल एव पिता मे मृतः ।



**मन्दिरा** किन्तु भवतः पिता तु हृदयाघातेन देहमत्यजदित्यस्माभिः श्रुतमासीत् ।

**विश्वनाथः** (क्षणं मौनीभूय) अहमध्ययनमत्यजम्; दुर्मित्रैः सह गत्वा मद्यमानं प्रतिदिनमकरवम्; मातापित्रोः वचनमुदलङ्घयम् । मद्व्यवहारेण स्वकीया सामाजिकी प्रतिष्ठा लाञ्छिता, अपकीर्तिश्च जातेति मत्वा आत्मानं धिक्कुर्वन् चिन्तया हृदयाघातोऽभवत् । स एव पितुः मरणहेतुः ।

**मन्दिरा** भ्रातः ! 'गते शोको न कर्तव्यः' इति कवयः प्रवदन्ति । इदानीं चिन्तया को लाभः । धैर्यं ध्रियताम् ।

**कपिलः** बहुवारं मम पार्श्वे समागत्य तव चिन्ता तेन कृता । मया त्वं प्रत्येकं सङ्गतौ व्यवहारपरिवर्तनाय प्रकथितः । किन्तु तदानीमस्मदीयं वचनं त्वया नैव हृदि कृतम् । परिणामतः पिता पुत्रचिन्तयैव दिवङ्गतः । असतः परिणामोऽप्रिय एव भवति ।

**विश्वनाथः** सत्यं भाषितम् । मृते पितरि मम पारिवारिको व्यवहारः सर्वतोभावेन क्षयङ्गतः । पितुरसामयिकेन निधनेन अर्बुदग्रस्ता मम माता हृदयरोगिणी जाता । मातुः औषधोपचाराय धनानि प्रयुक्तानि । आत्मानं विलासिनं कृत्वा धनार्जनाय अकृतश्रमेण मया पैतृकी सम्पत्तिः समाप्ता । न हि पितुर्जीवनं रक्षितुमहं समर्थः, न च सेवया मातरं सन्तुष्टयितुम् । प्रत्युत

पूर्वजानामात्मनश्च सामाजिकी प्रतिष्ठा मया भस्मसात् कृता । धिङ् माम् (रोदिति) ।

**मन्दिरा** विलासप्रिया बुद्धिर्जनानां विवेकं क्षयीकरोति; धनानि विनाशयति; पारिवारिकीं समृद्धिं धुलीसात् करोति; सामाजिकीं प्रतिष्ठां च दूषयति ।

**कपिलः** साधूक्तम् । विलासिता किल आत्मोन्नतिं बाधते । सखे ! तवापि सैव स्थितिर्जाता ।

**मन्दिरा** (विश्वनाथेन पीतं चायवर्तनमुत्थाप्य) विनाशकाले विपरीतबुद्धिरिति लोकोक्तिः श्रूयते । विपरीतबुद्ध्या भवत इव मम मातृग्रामे प्रतिवेशिन्या भगिन्या अपि महान् क्षयो जातः ।

**कपिलः** (साश्चर्यम्) मातृग्रामे ! का भगिनी ! कस्या विषये ब्रुवाणाऽसि ?

**मन्दिरा** विद्यालयस्य मम सहपाठिनी मातृगृहस्य प्रतिवेशिनी भगिनी तारा । भवान् अपि तां जानाति इति मन्ये । पुत्रान् पाठयितुं काष्ठमण्डपं निवसन्ती सा द्यूतगृहे द्यूतं क्रिडयन्ती स्वपरिवारस्य पितुश्च सर्वां सम्पत्तिं व्यनाशयत् ।

**कपिलः** एवम् । सा त्वधुना गृहविरहिता भर्त्रा परित्यक्ता निःसहाया सती धराननगरे भोजनालये कार्यं कुर्वाणा अस्तीति श्रुतवान् अस्मि ।

**विश्वनाथः** ममाप्यवस्था न तद्भिन्ना ।

**मन्दिरा** न, भवान् तु सम्प्रत्यपि सपरिवारो वर्तते । गृहं वर्तते; किञ्चिद् धनमस्ति । पतनमार्गं परित्यज्य पुनः समुन्नतये प्रवर्तितुं भवान् शक्नोति । किन्तु सा । सा तु भर्त्रा, सन्तत्या धनादिना च हीना एकाकिनी पश्चात्तापरताः वर्तते ।

**कपिलः** सुशिक्षिता सत्परिवारा अपि सा कुसङ्गत्या द्यूते संलग्ना जाता । परिवारैः सह स्वस्य दुःसङ्गतिं दुष्कृतिं च गोपयित्वा द्यूते रममाणा सा इदानीं स्वकर्मफलभुञ्जाना वर्तते इत्यहं गतवर्षे श्वशुरालये श्वशुरमुखात् श्रुतवान् ।

**विश्वनाथः** सर्वा प्रारब्धकृता क्रीडैषा ।

**मन्दिरा** नैषा प्रारब्धकृता क्रीडा अपि तु अभिमानजाऽविवेककृतकर्मणः परिणतिरित्यहं मन्ये ।

(तदानीमेव कपिलस्य माता देवकी सम्प्राप्नोति । मन्दिरा स्वाऽऽसन्द्यां तां संस्थाप्य स्वयं तु भूमौ वस्त्रासने तिष्ठति । विश्वनाथस्तां प्रणौति ।)

**देवकी** विश्वनाथमपि इह पश्यामि । बहुकालादत्र युष्माकं संवादः प्रचलन् वर्तते । कस्मिन् विषये युष्माकं वार्ता सम्पद्यमाना वर्तते ? मामपि श्रावयत ।

**कपिलः** अभिमानवशाद् इदानीं निर्धनतां दुरवस्थां च प्राप्तोऽयं विश्वनाथः स्वव्यथामत्र श्रावयितुं समागतः । आवामेनं सान्त्वयन्तौ स्वः ।

**विश्वनाथः** मातः ! अहं तु स्वकर्मणा स्वयमेव विनष्टः ।

**देवकी** जानामि । अहं सर्वं जानामि । तव सन्तानहितैषिणौ मातापितरौ त्वामधिकं पाठयितुमिच्छतः स्म किन्तु त्वया अध्ययनं परित्यक्तम् । सन्मार्गे नेतुमिच्छतः स्म किन्तु त्वया कुमार्गोऽवलम्बितः । तव व्यवहारेण तौ भृशं दीनतां गतौ । पिता तु चिन्तयैव मृतः । माता मनसा देहेन च रुग्णा अभवत् ।

**विश्वनाथः** अहं मातापित्रोरपराधी अस्मि । मम कर्मणस्तु पश्चात्तापोऽपि नास्ति ।

**देवकी** पुत्र विश्वनाथ ! यत्कृतं न तत् परिवर्त्यते किन्तु इतस्त्वया सदाचारिणा नीतिमता कर्तव्यकर्मिणा च भाव्यम् । साम्प्रतिकः साध्वाचारः पूर्वकृतदुराचारजां पीडां न्यूनीकरोति । विकृतिर्दुःखास्पदा वर्तते । कदाचिद् मयापि विकृत्याः परिणामोऽनुभूतः ।

**कपिलः** कीदृशः परिणामः ? कदाऽनुभूतो मातः !

**देवकी** त्वं तदानीं द्विहायन आसीः । मातुलेयस्य भ्रातुर्विवाह आसीत् । विवाहे जनान् स्वाऽऽढ्यतां प्रदर्शयितुमहं सर्वाणि स्वर्णभूषणानि धृत्वा गन्तुमना अभवम् । तव पित्रा तथाकरणे निषिद्धयापि मया आपादमस्तकं भूषणानि धृतानि । विवाहे नृत्यादिक्रमे मम भूषणानि चौरेणाऽपहृतानि । ततो मया आभूषणप्रदर्शनं सर्वदा परित्यक्तम् । भूषणादेः प्रदर्शनमपि विकृतिरेवास्तीति तत एवाहं ज्ञातवती ।

**मन्दिरा** मातुर्जीवनस्यायं प्रसङ्गोस्माभिः इदानीमेव श्रुतः । वस्त्रालङ्कारादिप्रदर्शनमपि नोचितम् किन्तु प्रायः जना तथा कुर्वन्ति । अतश्चौर्याद्यप्रियघटनाः समाजे घटमानाः सन्ति ।

**कपिलः** सामाजिकी विकृतिः का इति विचार्य तन्निवारणे अस्माभिरेव सचेष्टैर्भाव्यम् । विश्वनाथ ! त्वमपि विकृत्या सर्वस्वरहितो वर्तसे । इतस्त्वया वर्षोत्तरकालिको मेघ इव पुनः सर्वस्वप्राप्तये प्रयतनीयम् ।

**देवकी** एवं पुत्र । त्वया पुनः समुन्नतये सत्कार्याणि विधातव्यानि ।

**मन्दिरा** किन्तु मातः ! इदानीं भ्राता विश्वनाथ आत्मग्लानिना व्यथितोऽस्ति । मातुरौषधोपचाराय च धनहीनो वर्तते । इदानीं स कथमात्मानं मातरं परिवारं च नियन्त्रयितुं सञ्चालयितुं च शक्नुयाद् इत्यस्माकं चिन्ताविषयः ।

**कपिलः** इत एषः सन्मार्गे यास्यतीति अहमपि विश्वस्तोऽस्मि । सम्प्रत्येतस्य जीविका कथं स्यात् इति मे चिन्ताविषयः ।

**देवकी** तात ! भगवतः कृपया त्वयि धनस्य मनसश्च दरिद्रता नास्ति । सचिवपदमवस्थाय सर्वकारस्य कार्यं कुर्वन् वर्तसे । तव बालसखा एषो विश्वनाथो दुरवस्थां सहमानोऽस्ति । एषस्त्वया उद्धर्तव्यः ।

**मन्दिरा** मातः ! भवता मम मनसो भावो निगदितः । मातुरुपचारार्थं जीविकायै व्यवसायादिकं कर्तुं च अस्माभिः कृतः सहयोगो भ्रातुर्विश्वनाथस्य कृते समुपयोगी भवेत् । (पतिमुखं विलोक्य) किं विचारयति भवान् ?

**कपिलः** अहमपि सख्युः सहायतायै कृतनिश्चयोऽस्मि ।

**विश्वनाथः** (दीनवचसा) मया जीवने एकोऽपि जनो नैवोपकृतः । अभिमानस्य शैलशिखरं समारूढेन मया आत्मसुखमेव सर्वदा हृदीकृतम् । अद्याहं स्वकर्मणा स्वयमेव पीडितोऽन्यैर्निन्दितस्तिरस्कृतश्चास्मि । एतस्यां स्थितौ त्वत्तः सहयोगस्य वचनं प्राप्य नितरां प्रसन्नोऽस्मि ।

**देवकी** पुत्र ! मैवं वद । उत्सवे व्यसने च यः सहैव भवति स एव वास्तविकः सखा भवति । एष मम पुत्रः कपिलस्तव हितैषी वर्तते । त्वयि सहायताप्रदानमेतस्य कर्तव्यमस्ति । (कपिलं दृष्ट्वा) पुत्र कपिल ! दुर्व्यसनं नैव जीवनम् । दुर्व्यसनेन आत्मनः परिवारस्य च जीवनं दुःखगर्ते पातयन् एष इदानीमात्मानं परिवारं च उद्धर्तुमिच्छति । अस्यां स्थितौ त्वया एतस्य सहायतायै प्रतिबद्धता प्रकटिता । साधु पुत्र साधु । अहं नितरां तुष्टा अभवम् ।

**विश्वनाथः** अहमत्र मातुरुपचाराय कानिचन रूप्यकाणि मिलत्येवेति धिया समागत आसम् किन्तु तानि याचयितुमसमर्थ इव अभवम् । कपिल ! त्वत्तुल्यः सखा अन्यः कोऽपि भवितुं नार्हति । यतः प्रार्थनमन्तरापि त्वं मम हृद्गतं भावमवज्ञाय सहयोगार्थं सज्जोऽभवः ।

**देवकी** पुत्र ! इतः कुलस्य धनस्य विद्याया रूपस्य वा अभिमानो नैव प्रदर्शनीयः । एवंविधोऽभिमानः सामाजिकीं विकृतिं जनयति । अनैतिकं कर्म मनुष्याणां पतनस्य मूलं कारणमिति सर्वदा बोद्धव्यम् ।

**विश्वनाथः** एवम् । अहं तु इतः सामाजिकविकृत्या निराकरणाय सामूहिकं यत्नं करोमि; तदर्थं जनान् प्रबोधयामि ।

**कपिलः** सुखिनं समृद्धं च समाजं निर्मापयितुं सामाजिकविकृतीनामपनोद आवश्यकः । अत तथाकरणे मम तत्रापि सहयोगो भविष्यत्येव । (सर्वे हसन्ति)

**मन्दिरा** भवन्तो वार्तालापं कुर्वन्तु । अहं तु भोजनपचनादिकार्यार्थं गच्छामि । भ्रातः ! अहं भोजनं भवतः कृतेऽप्यत्रैव पाचयामि । (मौनीभूय शिरः कम्पयति । मन्दिरा तु चायवर्तनादिकं गृहीत्वा गच्छति)

**देवकी** अहमपि बधूसहायतायै गच्छामि । सखायौ वार्तां कुरुताम् । (सापि गच्छति । कपिलः विश्वनाथश्च मिथः संवदन्तौ तत्रैव तिष्ठतः ।)

## शब्दार्थाः

| | |
|---|---|
| आसन्द्याम् - | कुर्सीमा |
| म्लानवदनः - | मलिन मुख भएको |
| रक्तशाटीवसना - | रातो सारी लगाएकी |
| कुसुमशोभितकेशपाशा - | कपालमा फूल सिउरेकी |
| प्रसन्नवदना - | उज्यालो मुख भएकी |
| पूर्वजप्राप्ता - | पुर्खाबाट प्राप्त |
| धनधान्यादिचलाचलसम्पत्तयः - | धन, धान्यलगायत चल र अचल सम्पत्ति |
| विनष्टिङ्गताः - | नाश भएको |
| अभिमानान्धः - | अभिमानका कारण विवेक हराएको |
| मत्कृतदुष्कर्मसमुद्भूतया - | आफूले गरेका निन्दित कर्मबाट प्रकट भएका |
| मातृगृहे - | माइती गाउँमा |
| प्रतिवेशिन्याः - | छिमेकीको |
| स्वकर्मफलभुञ्जाना - | आफ्नो कर्मको फल पाएकी |
| रुग्णा - | रोगी |
| पूर्वकृतदुराचारजाम् - | पहिले गरेका दुराचारबाट जन्मिएका |
| दुःखास्पदा - | दुःख बस्ने स्थान |
| स्वाढ्यताम् - | आफ्नो सम्पन्नता |
| आपादमस्तकम् - | शिरदेखि पाउसम्मको पूरै शरीर |
| वर्षोत्तरकालिकः - | वर्षा भइसकेपछिको समयमा हुने |
| अपनोदः - | हटाउने काम |

## अभ्यासः

### श्रवणं भाषणञ्च

**१. कायिकं वाचिकं च भावमनुसृत्य पाठस्थं संवादं साभिनयं पठत ।**

**२. आभूषणादिप्रदर्शनं कथं विकृतिं जनयति ? देवक्याः उदाहरणं पुरस्कृत्य वदत ।**

**३. त्रिचतुरैस्तदधिकैर्वा शब्दैर्निर्मितानि समस्तपदानि पाठादन्विष्य कथयत । तेषां शुद्धोच्चारणं विधाय सखीन् श्रावयत च ।**

**४. शब्दार्थान् कथयत**

अङ्गीकृतः, दीनतया, लोकलज्जया, हृदयाघातः, निःसहाया, परिणतिः, कर्तव्यकर्मिणा, हीनधनः, समारूढेन, इदृग्विधः ।

**५. प्रदत्तानां विशेषणपदानां विशेष्यपदं पाठानुसारं कथयत**

बहुशः, सामाजिकी, अर्बुदग्रस्ता, प्रतिवेशिनी, प्रारब्धकृता, सन्तानहितैषिणौ, दुःखास्पदा, एवंविधः ।

**६. मित्रमुखात् पाठप्रयुक्तानि पृथक् पृथक् पञ्च क्रियापदानि श्रुत्वा तेषां धातोर्नाम कथयत ।**

**७. 'साध्वाचारः पूर्वकृतदुराचारजां पीडां न्यूनीकरोति' इति देवक्याः कथने तव सहमतिर्विमतिर्वा ? तार्किकं स्वविचारं कक्षायां प्रकटयत ।**

**८. पाठात् कानिचन दश कृतन्दपदानि अन्विष्य कक्षायां सहपाठिनः श्रावयत ।**

**९. अधस्तनपदानि प्रयुज्य एकैकं वाक्यं मिथः श्रावयत**

आसन्न्याम्, भृशम्, मे, दुर्मित्रैः, ध्रियताम्, अपकीर्तिः, रक्षितुम्, स्वपरिवारस्य, एकाकिनी, गतवर्षे ।

**१०. अधस्तनानां संवादानां वक्तृनाम वदत**

(क) विलासिता किल आत्मोन्नतिं बाधते ।

(ख) अहं तु स्वकर्मणा स्वयमेव विनष्टः ।

(ग) भवता मम मनसो भावो निगदितः ।

(घ) तदानीमभिमानान्धस्त्वं हितैषिणां वचनं तृणवदुपेक्षितवान् ।

(ङ) कुलस्य धनस्य विद्याया रूपस्य वा अभिमानो नैव प्रदर्शनीयः ।

## ११. अधस्तनमनुच्छेदं पठित्वा कांश्चन पञ्च प्रश्नान् निर्मात

आत्मना कृतेन कर्मणा आत्मोन्नतिः, समाजहितम्, राष्ट्रविकासाय च योगदानं भवति चेत् तादृशं कर्म सुकृतिर्निगद्यते । सुकृतिरेव संस्कृतिरूपेण परिवर्त्यते । अतोऽस्माकं संस्कृतिरस्मान् परोपकाराय प्रेरयति । सर्वजनसुखाय सर्वजनहिताय विहितं कर्म शान्तिकरं पुण्यदं च भवतीति धिया अस्माकं पूर्वजा वापीकूपतडागादेः खननम्, धर्मशालानिर्माणम्, यज्ञादयश्च कुर्वन्ति स्म । स्वार्थप्रेरितं कर्म अनुष्ठानकाले सुखदमिव प्रतिभाति किन्तु परिणामे तदेव कर्म अस्मान् आमरणं कण्टकवत् पीडयति । अतः स्वस्य परेषां च कृते कष्टदं निन्दितं कर्म विकृतिरस्ति । चौर्यम्, हिंसा, मद्यादिषु स्वधनस्य अपव्ययः, समाजेऽशान्तिसम्पादनम्, कृतघ्नता, राज्यद्रोहः, जातीयवैमनस्यसम्पादनं चेत्यादि कर्म सर्वेषां कृतेऽनुचितम् । एतादृशमेव कर्म विकृतिरस्ति । विकृतिः समाजस्योन्नतिमवरुणद्धि; सामाजिकीं जातीयां चैकतां क्षयीकरोति; तत्कर्तारं जनं चाधोगतिं नयति । अतोऽस्माभिः सामाजिकीं विकृतिं निराकरणाय प्रयतनीयम् ।

## १२. पाठमाधारीकृत्य पदेनैकेनोत्तराणि वदत

(क) को म्लानवदनो वर्तते ?

(ख) कस्य पिता मृतः ?

(ग) पतनस्य कारणं किम् ?

(घ) मन्दिरा कस्य पत्नी ?

(ङ) कस्य प्रतिवेशिनी द्यूतक्रीडां करोति स्म ?

(च) कपिलः सर्वकारस्य कस्मिन् पदे कार्यरतो वर्तते ?

(छ) चौरो देवक्याः किमचोरयत् ?

(ज) सामाजिकविकृतिनिराकरणाय कः प्रतिबद्धो जातः ?

## १३. पुत्रो यथाकालं भोजनं न करोति । रुचिरं सुस्वादुभोजनमेव याचते । अतः स कृशः शक्तिहीनः प्रायः अस्वस्थश्च वर्तते । स सम्प्रति भोजनाय आसने उपविष्टोऽस्ति किन्तु तस्य भोजने रुचिर्नास्ति । अस्यां स्थितौ मातुः पुत्रस्य पितुश्च मध्ये जायमानं वार्तालापं परिकल्प्य कक्षायां साभिनयं संवादं कुरुत ।

## १४. अधस्तनं पद्यं पठित्वा तद्भावबोधपुरःसरमुत्तरं वदत

**शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा ।**

**कृतं फलति सर्वत्र नाकृतं भुज्यते क्वचित् ॥**

(क) सुखाय कीदृशं कर्म विधातव्यम् ?

(ख) दु:खस्य कारणं किम् ?

(ग) कृतं फलति सर्वत्र' इत्यस्य तात्पर्यं किम् ?

(घ) शुभाशुभकर्मण: फलयो: को भेद: ?

(ङ) सर्वै: किं भुज्यते ?

## पठनम्

### १. तुल्यार्थबोधकशब्दयो: परस्परं मेलनं कुरुत

| | |
|---|---|
| हताश: | त्रपा |
| दशा | जनकथनम् |
| प्रभाते | कैतवम् |
| लज्जा | उषाकाले |
| लोकोक्ति: | अनुताप: |
| द्यूत: | निराश: |
| पश्चात्ताप: | सखा |
| गोपयित्वा | अलङ्कार: |
| हितैषी | अवस्था |
| भूषणम् | आच्छाद्य |

### २. मन्दिराप्रोक्तमधस्तनकथनं पठित्वा तस्य भावार्थं सरलतया कक्षायां श्रावयत

विलासप्रिया बुद्धि: जनानां विवेकं क्षयीकरोति; धनानि विनाशयति; पारिवारिकीं समृद्धिं धुलीसात् करोति; सामाजिकीं प्रतिष्ठां च दूषयति ।

### ३. अधस्तनमनुच्छेदं मौनं पठित्वा तत्रत्यानि पञ्च मुख्यविषयवस्तूनि सारिण्यां दर्शयत

मानवोचितधर्माणां सम्यक् परिपालनमेव मानवता । इयञ्च परेषां सुखदु:खयो: सहभागी भूत्वा कर्तव्याचरणाय जनान् प्रेरयति । वस्तुतस्तु स एव आदर्शो मानवो निगद्यते य: परेषां दु:खमात्मनो दु:खं मनुते; परेषां सुखमात्मन: सुखं मत्वा रमते । वसुधैव कुटुम्बकमिति भावनया परोपकाराय

लोककल्याणाय परतापहरणाय च प्रयतमानो जनो मानवधर्माचरणे एव सुखमनुभवति । एवंविधो जनो नहि सर्वत्र सम्प्राप्यते । यतो हि साम्प्रतिकेषु मानवसमाजेषु स्वार्थान्धता दरीदृश्यते । स्वार्थप्रेरितो जनो मानवधर्मस्य मर्यादां संरक्षितुं न प्रभवति । लोभमोहादिवशगो मानवो स्वार्थसाधनाय हिंसादीनि गर्हितकर्माणि विधातुं शक्नुवन्ति । मानवताया विरोधिन एते 'परोपकारः कः ? मानवजीवनस्योद्देश्यं किम् ? मानवसेवा का ? इति न जानन्ति; न च जिज्ञासन्ति । विद्वेषभावनया जीवतामेतेषां जीवनं कदापि शान्तं सन्तोषकरं न भवति । महात्मा गौतमबुद्धोऽहिंसायाः त्यागस्य शान्तेश्च मार्गं प्रदर्शयन् मानवानामेव न, समग्रप्राणिजातस्य सेवायां मानवसमाजं प्रेरितवान् । सर्वान् आत्मवत् समीक्ष्य जीवनं जीवितव्यमिति धिया विहिते कर्मणि मानवता संरक्षिता भवति । यत्र मानवता सजीवा तत्रैव मानवजीवनं रममाणं भवति । मानवतायां सत्यां कोऽपि जनो नहि क्षुधया रोगेण शोकेन च मृतो भवति; न च मानवसमाजे वैमनस्यं दरीदृश्यते । अतो मानवसमाजस्य सर्वविधोन्नतये मानवतायाः संरक्षणाय प्रवर्धनाय परिपालनाय च सर्वैः प्रयतमानैर्भवितव्यम् ।

४. **'समयः सर्वान् परिवर्तयति' इति विश्वनाथस्य कथनं साध्वसाधु वा ? विमृशत ।**

५. **देवक्याः संवादान् लेख्यचिह्नानुकूलान् पठित्वा तस्याश्चरित्रं चित्रयत ।**

६. **अधस्तनं पद्यद्वयं तद्भावार्थं च पठित्वा उत्तरं दत्त**

न तन्मित्रं यस्य कोपाद् बिभेति

यद् वा मित्रं शङ्कितेनोपचर्यम् ।

यस्मिन् मित्रे पितरीवाश्वसीत

तद् वै मित्रं सङ्गतानीतराणि ॥

**भावार्थः** – यस्य कोपाद् वयं बिभीमः; यस्य सेवाकरणे मनसि शङ्का समुदेति, तन्मित्रं भवितुं नार्हति । पितृवद् यस्मिन् वयं विश्वस्ता भवितुं शक्नुमः, तदेव मित्रम् । सङ्गतिं प्राप्ता अन्ये जनास्तु केवलं मित्रनामधेया एव ।

(क) कः मित्रं भवितुं नार्हति ?

(ख) कस्मिन् वयं विश्वस्ता भवितुं शक्नुमः ?

(ग) कीदृशा जना मित्रनामधेया एव ?

७. **'साम्प्रतिकः साध्वाचारः पूर्वकृतदुराचारजां पीडां न्यूनीकरोति' इति कथनस्य तात्पर्यं सखिभिः सह विमृश्यताम् ।**

## ८. अधस्तनं चित्रं विलोक्य तस्य वर्णनं कुरुत



## ९. अधोदत्तं पद्यं तद्भावार्थं च पठत

विवादो धनसम्बन्धो याचनं चातिभाषणम् ।

आदानमग्रतः स्थानं मैत्रीभङ्गस्य हेतवः ॥

**भावार्थः** – परिस्थितिवशाज्जातः पारस्परिको वादविवादः, धनार्थं सम्पादितः सम्बन्धः, भूयोभूयः कस्यापि वस्तुनो याचनम्, निष्प्रयोजनं बहुभाषणम्, ऋणरूपेण धनग्रहणम्, मित्राद् अग्रगमनञ्चेति मित्रताभङ्गस्य हेतवः सन्ति ।

## १०. अधस्तनं बोधपाठं पठित्वा निर्दिष्टकार्याणि कुरुत

जलविन्दुनिपातेन क्रमशः पूर्यते घटः ।

स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ॥

प्राप्तस्य अल्पस्यापि वस्तुनः संरक्षणाय विवर्धनाय च सञ्चयस्य भूमिका महत्त्वपूर्णा भवतीति वयं जानीमः । अल्पमपि वस्तु यदि निरन्तरं सञ्चितं स्यात् तर्हि तदेव जलविन्दुनिपातेन पूरितो घट इव

बहूपयोगि जायते । सञ्चयो विद्याया धर्मस्य समयस्य च करणीयः किन्तु वयं धनस्यैव सञ्चयेऽधिकं प्रयतामहे ।

वयं महता दुःखेन धनानि प्राप्नुमः । यदि तस्य सञ्चयो न क्रियते चेत् चञ्चलस्वभावानि धनानि क्षणेन समाप्तिं गच्छन्ति । अतो वयं विपत्तौ प्राप्तायां धनाभावाद् विपत्तिप्रतिरोधायाऽसमर्था सन्तः यत्र तत्र सहायतां याचमानाः प्रधावामः । यदि स्वल्पं स्वल्पं धनं बहुकालात् सञ्चितं स्यात्तर्हि विपत्तौ धनान्वेषणे क्वचिदपि धावनस्य आवश्यकता न भवेत् । सञ्चितं तदेव स्वल्पं स्वल्पं धनं वृद्धिं गत्वा अस्माकमावश्यकतापूर्तये सहयोगि भवति । अत आर्जनमल्पं वा भवेत्, महद् वा भवेत्, सञ्चयः सर्वदा कर्तव्यः ।

धनाढ्योऽपि जनो दुर्भाग्यवशाद् निर्धनतां प्राप्नोति । दुःखानि कदाचिदपि जीवने आपतितुं शक्नुवन्ति । एवंविधे प्रतिकूलकालेऽस्माभिः कृतः सञ्चयोऽस्मान् उद्धरति । अतो धनस्य मितव्ययः कर्तव्यः । मितव्ययिता कृपणता नोच्यते । समुचिता कृपणता अनावश्यकाद् व्ययाद् धनस्य सञ्चये सहयोगिनी भवतीत्यस्माभिर्बोद्धव्यम् । समुचितोपभोगाय यदि धनानां सम्प्रयोगो न विधीयते चेत् सा तु कृपणतैव । विद्यार्थिभिस्तु ज्ञानस्य समयस्य च सञ्चये विशेषतः प्रयतनीयः ।

**(क) प्रश्नानुत्तरत**

(अ) केषां वस्तूनां सञ्चय आवश्यकः ?

(आ) धनानि कथं समाप्तिं गच्छन्ति ?

(इ) वयं कदा किमर्थं यत्र तत्र प्रधावामः ?

(ई) का कृपणता ?

(उ) प्रदत्तपाठस्य शीर्षकं किं भवेत् ?

**(ख) प्रश्नानुत्तरत**

(अ) प्रदत्तपद्यस्य भावार्थं लिखत ।

(आ) विद्यार्थिना कस्य सञ्चयः कर्तव्यः ? तर्कयत ।

(इ) प्रदत्तपाठस्य एकस्मिन् अनुच्छेदे एकतृतीयांशशब्दैः सारांशं लिखत ।

**(ग) अधस्तनानि भाषिककार्याणि कुरुत**

(अ) आत्मनेपदस्य द्वे, परस्मैपदस्य च द्वे तिङन्तपदे विचित्य लिखत ।

(आ) 'उद्धरति' इति क्रियाया लङ्लकारे सर्वाणि रूपाणि लिखत ।

(इ) कानिचन पञ्च नपुंसकलिङ्गबोधकानि पञ्चैव स्त्रीलिङ्गबोधकानि पदानि अन्विष्य लिखत ।

(ई) 'धनाढ्योऽपि जनो दुर्भाग्यवशाद् निर्धनतां प्राप्नोति' इत्यस्य कर्मवाच्ये परिवर्तनं कुरुत ।

## लेखनम्

### १. अधस्तनानां पदानां विपरीतार्थबोधकानि पदानि लिखत

प्रातः, सम्पत्तिः, त्यक्तम्, तिरस्कृत्य, दुर्मित्रैः, बहुकालात्, मलिनवदनः, विकृतिः, इदानीम्, समुपयोगी ।

### २. पदानि प्रयुज्य वाक्यानि रचयत

सुस्पष्टम्, गृह्यताम्, भ्रातः, हितोपदेशः, तृणवत्, पुत्रचिन्तया, रक्षितुम्, एकाकिनी, परिणतिः ।

### ३. पाठात् त्रिचतुरपदैः जातानि समस्तपदानि अन्विष्य शिक्षकसहायतया तद्विग्रहं च कुरुत ।

### ४. कोष्ठकस्य सङ्केतमनुसृत्य रिक्तस्थानं पूरयत

(क) विद्यार्थिनः पाठं .............. विद्यालयमगच्छन् । (पठ्+तुम्)

(ख) माता जलं .............. मह्यं दत्तवती । (आ+दा+य)

(ग) कृषकः फलानि .............. वर्तनेषु स्थापयति । (एक+कृ+य)

(घ) पर्यटका हिमालयं .............. प्रसन्ना जाताः । (दृश्+त्वा)

(ङ) .............. कार्यं भवान् एव करोतु । (भवत्+ईय)

### ५. संस्कृतेऽनुवादं कृत्वा लिखत

(क) म तिमी देख्दा असाध्यै रमाउँछु ।

(ख) जो धेरै बोल्छ त्यो मलाई मन पर्दैन ।

(ग) तिमी समाजका विकृतिहरू हटाउन कोसिस गर ।

(घ) मानिस मनले सुन्दर हुन्छ न कि धनले ।

(ङ) सबैको खुसीमा सुख मान्ने मानिस दुर्लभ हुन्छन् ।

(च) समाजमा हरेक मानिस शान्ति र समृद्धि चाहन्छन् ।

## ६. अधस्तनानां प्रश्नानां पाठाधारेण सङ्क्षेपेण उत्तराणि लिखत

(क) विश्वनाथस्य मुखमालिन्ये कारणं किम् ?

(ख) कपिलविश्वनाथयोः सम्बन्धः कीदृशो दृश्यते ?

(ग) विश्वनाथः कथं दुष्कर्मसु प्रवृत्तः ?

(घ) विश्वनाथस्य सम्पत्तिः कथं क्षयङ्गता ?

(ङ) विश्वनाथस्य पिता केन हेतुना मृतः ?

(च) तारायाः परिवारस्य दुर्गतये को हेतुः ?

(छ) कुमार्गी विश्वनाथः कथं परिवर्तितः ?

(ज) पर्वोत्सवादिषु भूषणादिप्रदर्शनं किमर्थं विकृतिर्मन्यते ?

(झ) समाजाद् विकृतेर्निर्मूलनाय किं कर्तव्यम् ?

(ञ) कपिलः किमर्थं विश्वनाथस्य सहयोगं कर्तुमैच्छत् ?

## ७. सरलसंस्कृतभाषया भावं विशदीकुरुत

(क) असतः परिणामोऽप्रिय एव भवति ।

(ख) अनैतिकं कर्म मनुष्याणां पतनस्य मूलं कारणम् ।

## ८. पाठस्थ–संवादात् कः सन्देशो लभ्यते ? लिखत ।

## ९. 'सामाजिकविकृतीनां निराकरणाय विद्यार्थिनां भूमिका' इति विषयसम्बद्धं नातिदीर्घं निबन्धं विलिख्य शिक्षकं दर्शयत ।

## १०. उदाहरणमनुसृत्य प्रदत्तं वाक्यं वाक्यद्वये विश्लेषयत

**यथा–** मम दौहित्री यशोदा मयि स्निह्यति ।

यशोदा मम दौहित्री अस्ति । सा मयि स्निह्यति ।

(क) पुष्परसप्रिया भ्रमरा उद्यानेषु भ्रमन्ति ।

(ख) साधवस्तीर्थस्थलानि गत्वा भगवदर्चनं कुर्वन्ति ।

(ग) मम प्रियसखा प्रमेशो मां नीत्वा नगरमगच्छत् ।

(घ) वीराः सैनिकाः स्वदेशस्य रक्षणाय सर्वदा सज्जा भवन्ति ।

(ङ) माता गृहमागत्य मह्यं फलानि अददात् ।

११. **वाक्यगतामशुद्धिं संशोध्य पुनर्लेखनं कुरुत**

(क) सुशीला गृहकार्यं यथासमये करोति ।

(ख) मदीयो भगिनी मां लेखनीमददात् ।

(ग) रामस्य साकं त्वमपि पठ ।

(घ) प्राणरक्षको वायू मन्दं वहति ।

(ङ) देवः सदा भक्तान् रक्षन्ति ।

१२. **विश्वनाथ इव अनेके युवानः सम्प्रति निर्विवेकिनो भूत्वा पतनमार्गे गमिष्यमाणा दृश्यन्ते । तान् सन्मार्गे आनेतुं कथं शक्यते ? युक्त्या स्वमतं प्रकटयत ।**

## सर्जनात्मकोऽभ्यासः

१. **निर्दिष्टविषये त्रीणि तदधिकानि वा पात्राणि परिकल्प्य संवादं लिखत**

(क) वनसुरक्षा

(ख) सामाजिकसञ्जालस्य सदुपयोगः

# प्राणायामो हि भेषजम्

'योगश्चित्तवृत्तिनिरोधः' इति योगसूत्रमाधृत्य यदि योगस्य परिभाषणं विधीयते, तर्हि योगश्चित्तवृत्तेर्निरोधेन जीवात्मनः परमात्मनि योगविधिर्वर्तते । अस्मत्पूर्वजैर्ऋषिभिर्योगबलेनैव परमात्मा साक्षात्कृतः, संसारो नियमितः, अनेकाः सिद्धयश्च प्रदर्शिताः । ऋषीणां योगविधीनां सङ्कलनेन योगसूत्राणि निर्माय दर्शनत्वेन पश्चात् पतञ्जलिना यद् योगदर्शनं प्रणीतम्, तद् वस्तुतः परमात्मनः प्राप्तेर्मार्गप्रदर्शकं वर्तते । योगाभ्यासश्चित्तवृत्तेः स्वच्छतां सम्पाद्य मुक्तेर्मार्गमुद्घाटयतीत्यस्माकं विश्वासो वर्तते । यद्यप्यद्य मुक्तिसम्पादनमधिकानां जनानामभीष्टं न भवति, तथापि स्वास्थ्यसंरक्षणाय योगस्योपयोगं बहवो जनाः कुर्वन्ति । पूर्वं भारतवर्षस्य निधित्वेन वर्तमानस्य योगदर्शनस्याद्य विश्वस्यैवामूल्यसम्पत्त्वं सिद्धं वर्तते, यतो हि संयुक्तराष्ट्रसङ्घेनैव जुनमासस्य एकविंशं दिनं योगदिवसत्वेनोद्घोषितमस्ति ।

'यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि' इति योगसूत्रानुसारेण योगस्य यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारः, धारणा, ध्यानम्, समाधिश्चेत्यष्टावङ्गानि वर्तन्ते । योगस्याष्टास्वङ्गेषु चतुर्थमङ्गं वर्तते प्राणायामः । अद्यत्वे विश्वस्मिन् विश्वे प्राणायामः प्रसिद्धो वर्तते । श्वसनप्रक्रियाया नियमेन जनानां स्वास्थ्यसंवर्धनाय प्राणायामो हितकारी वर्तते । अतो विश्वस्य बहुषु देशेषु जनाः प्राणायामस्याभ्यासं कुर्वन्ति ।

'प्राणस्यायामः' इति विग्रहे षष्ठीतत्पुरुषसमासेन प्राणायामशब्दो निष्पद्यते । अत्र 'आयाम'शब्दो भावार्थे घञ्प्रत्ययविधानेन निष्पन्नोऽस्ति । अनेन विग्रहेण प्राणस्य शरीरान्तःसञ्चारिणो वायोर्निरोधः प्राणायाम उच्यते । पुनः 'प्राणा आयम्यन्ते येन' इत्यर्थे करणार्थे घञ्प्रत्ययविधानेनापि 'प्राणायाम'शब्दो निष्पद्यते । विग्रहेणानेन प्राणायामः प्राणानां नियमनपद्धतित्वेन सूचितो वर्तते । 'तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः' इति योगसूत्रानुसारेण आसनसिद्धेरनन्तरं श्वासप्रश्वासयोर्यथोचितं गतिविच्छेदः प्राणायामः कथ्यते । हठयोगिनामनुसारेण पिङ्गलानाड्यां प्रवहतः प्राणवायोरिडानाड्यां प्रवहताऽपानवायुना योगः प्राणायाम उच्यते । प्राणवायोर्निरोधेन वयं तं शरीराभ्यन्तरमेव किञ्चित्कालं स्थिरं कर्तुं शक्नुमः । तथा प्राणवायुं गृहीत्वा शरीराभ्यन्तरमेव तस्य नियमनं प्राणायामो वर्तते । नासापुटमाध्यमेन प्राणवायुग्रहणं श्वासोऽस्ति चेत् प्राणवायोर्निष्कासनं प्रश्वासोऽस्ति । श्वासप्रश्वासयोर्गतेः स्वेच्छया चालनं प्राणायामो वर्तते ।

शरीरान्तःसञ्चारी वायुः प्राणः कथ्यते । प्राणोऽस्य पाञ्चभौतिकस्य देहस्य संरक्षको वर्तते । प्राण एव अस्मद्देहं जीवितं कारयति । प्राणहीनत्वे तु देहः शवो जायते । अतः प्राणिनो जीवनमरणयोः सम्बन्धः प्राणाधारित एव । शरीरस्य सर्वेऽप्यवयवाः प्राणेन सम्बद्धा भवन्ति । स प्राण उपाधिभेदात् पञ्चविधो वर्तते- प्राणः,

अपानः, समानः, उदानः, व्यानश्चेति । तत्र हृदि वर्तमानः प्राणः कण्ठादारभ्य हृदं यावत् कार्यं करोति । अस्माकं फुफ्फुसं स एव सञ्चालयति, येन समग्रमपि शरीरं चेतनां प्राप्नोति । अपानस्तु गुदे वर्तमानः सन् नाभिमारभ्य पादाङ्गुष्ठं यावत् कार्यं करोति । नाभिमण्डले स्थित्वा हृदमारभ्य नाभिं यावत् क्रियाशीलो वायुः समान उच्यते । कण्ठदेशे वर्तमान उदानो वायुः कण्ठादुपरि वर्तमानानामङ्गानां सञ्चालनं करोति । व्यानाख्यः पञ्चमो वायुः शरीरस्य सर्वेषामपि तन्तूनाम्, ग्रन्थीनाम्, मांसपेशीनाम्, नाडीनां च सञ्चालनं करोति । एष सर्वशरीरव्यापी वर्तते । प्राणानामुपाधीनमरकोश एवं निर्धारयति- 'हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले । उदानः कण्ठदेशे स्याद्व्यानः सर्वशरीरगः ॥' प्राणायामः शरीराभ्यन्तरे वर्तमानानेतान् पञ्च प्राणान् व्यवस्थाप्यास्मच्छरीरं स्वस्थं स्फूर्तं च करोति ।

अस्माकं फुफ्फुसे सप्तकोटिसङ्ख्यकानि छिद्राणि वर्तन्ते । सामान्यरूपेण गृहीतः श्वासः केवलं पञ्चकोटिसङ्ख्यकेषु छिद्रेषु प्राप्नोति । श्वासस्याप्राप्त्या अवशिष्टः फुफ्फुसभागो निष्क्रियतां प्राप्नोति, येन क्षयरोगादीनामुत्पत्तिः सम्भवति । प्राणायामेन फुफ्फुसस्य सर्वेषु छिद्रेषु श्वासस्य प्राप्तिर्जायते । येन सबलः सन् फुफ्फुसः शरीरस्य प्रत्यवयवं प्राणवायुं प्रापयति । प्रत्यवयवं प्राप्तः प्राणवायुः शरीरावयवेषु शुद्धानां रक्तानां सञ्चारं विदधाति । तेनैव शरीरस्य स्वास्थ्यं सबलं जायते ।

अस्माकं शरीरे द्विसप्ततिसहस्रसङ्ख्यका नाड्यो वर्तन्त इति विज्ञा वदन्ति । तासु नाडीषु कस्याञ्चिदपि नाड्यां वायुप्रवाहो यदि सम्यङ्न जायते, तर्हि शरीरे रोगा उत्पद्यन्ते । आहारादीनां कारणेनोत्पन्ना विविधा विकारा नाडीषु प्राणवायोः प्रवाहमसन्तुलितं विदधति । यमनियमाभ्यां युतेन जनेन प्राणायामे विहिते शरीरस्य नाडीषु क्षणं प्राणवायोः प्रवाहनिरोधो जायते । निरुद्धप्रवाहस्य प्राणवायोः पुनःसञ्चलने नाडीषु वर्तमाना विकारा अपगच्छन्ति, नाड्यश्च शुद्धा जायन्ते । अतो नाडीशोधनं प्राणायामस्य मुख्यं प्रयोजनमस्ति ।

आहारादीनामशुद्ध्याऽधुना स्वास्थ्यसंरक्षणमतीव दुष्करं वर्तते । स्वास्थ्यसंरक्षणार्थमाधुनिका जना अनेकानुपायानन्विषन्तो विद्यन्ते । अस्मत्पूर्वजैर्महर्षिभिः प्रतिपादिता ध्यान-योग-प्राणायामा आधुनिकैरपि तदर्थमेवाङ्गीकृताः सन्ति । शरीरस्यारोग्यतायै, मनसः शान्तये स्थैर्याय चेम एवोपाया अधुना विज्ञैरवलम्ब्यन्ते । तेषूपायेष्वपि सरल उपायः प्राणायाम एव । प्राणायामार्थं स्थानस्य समयस्य परिस्थितेश्च नियतता न भवति । प्राणायामो यस्मिन् कस्मिन्नपि समये, यस्मिन् कस्मिन्नपि स्थाने यस्मिन् कस्मिन्नप्यासने सारल्येन कर्तुं शक्यते ।

अधुना धनमनुधावन्तो जना न कदाचिदानन्दमनुभवन्ति । मनसश्चञ्चलतायाः कारणेनाजीवनं सुखमन्विषद्भिस्तैर्न कुत्रचिच्छर्म लभ्यते । सुखाय मनसः स्थैर्यं प्रमुखो हेतुरस्ति । विज्ञैः कथितमस्ति- 'चले वाते चलं चित्तं निश्चले निश्चलं भवेत्' इति । यस्य प्राणवायौ नियन्त्रणं नास्ति, स मनः स्थिरं विधातुं न शक्नोति । यश्च प्राणवायुं यथेच्छं नियन्त्रयति, तस्य मनोऽवश्यं स्थिरं भवति । स्थिरस्य मनसश्चिन्तनं फलदायि भवतीत्यस्माकं पूर्वजा ऋषयः प्रमाणम् ।

साफल्यं सर्वेषामपेक्षितं भवति । शरीरेण विहितानां कर्मणां मनसा चिन्तितानां विचाराणां च साफल्यं यः कोऽपि वाञ्छति । साफल्यार्थं शरीरे मनसि चोर्जसोऽपरिहार्यत्वं भवति । ऊर्जोहीनानां विचारः कर्म च साफल्यं नाधिगच्छति । वैज्ञानिकानां मते प्राणवायोर्माध्यमेनैवास्माभिर्भक्षितानामन्नादीनां पाचनं जायते, तेन मनःशरीरयोरूर्जोलाभश्च भवति । शरीरे प्राणवायोर्मात्रा यदि वृद्धिङ्गच्छति, तर्हि विकृतानामन्येषां वायूनां मात्रा न्यूनायते । एवं सति पाचनप्रणाल्या उत्कर्षेण मनःशरीरे आधिक्येनोर्जो लभेते । शरीरे प्राणवायोर्मात्राया वृद्धये प्राणायाममन्तरेण नास्त्युपायः । प्राणायामस्य नियमिताभ्यासेन शरीरं सामान्यावस्थातोऽधिकं प्राणवायुमधिगच्छति । तेन शरीरान्तर्वर्तमानानां विकाराणां बहिर्निष्क्रान्तिर्जायते । विकाराणां निष्क्रान्त्या शरीरं स्फूर्तं भवति, मनसश्चाञ्चल्यं न्यूनायते, स्मृतिशक्तिः प्रवर्धते, मनसि सच्चिन्तनमुत्पद्यते, रचनात्मकतां प्रत्यग्रेसरतायै उत्साहश्चोद्भवति । यत्र एतादृशा गुणा भवन्ति, ततः साफल्यं कथं पलायितुं शक्नोति ? अतः प्राणायामः सकलसाफल्योपायो वर्तत इति निश्चप्रचम् ।

प्राणायामो जनं शारीरिकरूपेण मानसिकरूपेण च सबलं करोति । शरीरस्य मनसश्च सबलत्वे रोगप्रतिरोधिका शक्तिः प्रवर्धते । तेन सामान्या रोगादयोऽस्मान् पीडयितुं न शक्नुवन्ति । अद्यत्वे महामारीरूपेण दृश्यमानायाः कोरोनासमस्यायाः प्रभावन्यूनीकरणाय च शरीरे रोगप्रतिरोधकशक्तेर्वृद्धिः परमावश्यकी वर्तते । पुनश्च कोरोनाऽस्माकं श्वासप्रश्वासयोरेव समस्यामुद्भावयति । श्वासप्रश्वासयोर्नियमनाय प्राणायामादृते कोऽस्त्यन्य उपायः ? अतः कोरोनादीनां दुष्प्रभावन्यूनीकरणे प्राणायामः प्रमुखोपायत्वं भजते । प्राणायामेन श्वासप्रश्वासयोर्नियन्त्रणं विधायैव मुनयः सहस्रं वर्षाणि जीवन्ति स्म । अधुनाऽस्माकमायुष्यक्षयस्य प्रमुखं कारणं श्वासप्रश्वासयोरनियन्त्रणमेव । यदि वयं मुनय इव श्वासप्रश्वासयोर्नियन्त्रणं कर्तुं पारयामश्चेदवश्यमस्माकमायुष्यमपि सुदीर्घं भविष्यति । अतो मुनिभिः कथितमस्ति-

**यावद्वायुः स्थितो देहे तावज्जीवनमुच्यते ।**
**मरणं तस्य निष्क्रान्तिः तस्माद्वायुं निरोधयेत् ॥**

प्रक्रियाधारेण पूरकः, कुम्भकः, रेचकश्चेति प्राणायामस्त्रिविधो भवति । नासाच्छिद्रतः श्वासस्यान्तःप्रग्रहणं पूरकः कथ्यते । हठयोगिन एतमाभ्यन्तरवृत्तिं कथयन्ति । कुम्भकोऽपि बाह्याभ्यन्तरभेदाद् द्विविधो वर्तते । पूरकेण गृहीतस्य श्वासस्य किञ्चित्कालमन्तर्निरोध आभ्यन्तरः कुम्भकः कथ्यते चेत् श्वासस्य रेचनानन्तरं किञ्चित्कालं श्वासस्याग्रहणं बाह्यः पूरकः कथ्यते । हठयोगिनः कुम्भकमेतं स्तम्भवृत्तिं कथयन्ति । अन्तःप्रगृहीतस्य श्वासस्य बहिःप्रक्षेपणं रेचकः कथ्यते । हठयोगिन एतं बाह्यवृत्तिं कथयन्ति । इमानेव त्रीन् प्रकारानाधृत्य विज्ञैः प्राणायामस्यानुलोमविलोम-नाडीशोधन-भ्रामरी-भस्त्रिकादयोऽनेका विधयः प्रतिपादिताः सन्ति । सम्यगाचरिताः सर्वेऽपि प्राणायामविधयो जनानां स्वास्थ्यसंरक्षणं कुर्वन्तीति बोद्धुं वयमद्यापि योगिनां जीवनचर्यां विलोकयितुं शक्नुमः ।

अस्माकं पूर्वजास्त्रैकालिकसन्ध्याया आचारं प्रस्तुत्य प्रतिसन्ध्यं प्राणायामस्य व्यवस्थां च कृतवन्त आसन् । त्रिवारं कृतः प्राणायामः शरीरस्य सकलान् दोषान् निराकरोतीत्यग्निपुराणमेवं निर्दिशति- 'त्रिभिः शरीरं सकलं प्राणायामैर्विशुद्ध्यति ।' याज्ञवल्क्योऽपि प्राणायामेन शरीरगतानां दोषाणां विनाशो भवतीत्यत्र

स्वमतमेवमुपस्थापितवानस्ति- 'यथा पर्वतधातूनां दोषान् दहति पावकः । एवमन्तर्गतञ्चैनः प्राणायामेन दह्यते ॥' आसनानि स्थूलशरीरस्यैव विकृतीः पीडाश्चापाकुर्वन्ति परं सूक्ष्मशरीरस्य वासनाकुण्ठाऽविद्यादीन् दोषानपाकर्तुं प्राणायाम एव प्रभवति । प्राणायामः शनैःशनैरन्तःकरणवृत्तीः क्षीणा विधाय सच्चिदानन्दरूपे परमात्मनि जीवमुत्प्रेरयति ।

शरीरावयवेषु वर्तमानानां मलानाम्, मनोगतानां दोषाणाम्, अन्तःकरणगतानां दुर्वृत्तीनां च निराकरणे प्राणायाम एव क्षमो भवतीत्यत्र नास्ति काचन संशीतिः । मलनिर्गमने शरीरं शुद्धं भवति, दोषनिःसरणे मनो निर्दुष्टं भवति, दुर्वृत्तीनामपगमनेऽन्तःकरणं सद्वृत्तं भवति । एतेन मनुष्याणां शरीरं स्वस्थं भवति, मनः स्फूर्तं भवति, अन्तःकरणं च सत्कर्मोन्मुखं भवति । अनन्तरं मनुजाः स्वास्थ्येन, उत्साहेन, आचारेण च सबला जायन्ते । अतो मानवानां कृते सर्वविधसमस्यानां निराकरणभेषजं प्राणायाम एवास्ति ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| निरोधः - | रोक्नु, रोकाइ | निधिः - | सम्पत्ति |
| नासापुटः - | नाकको प्वाल | अवयवः - | अङ्ग |
| उपाधिः - | ठाउँ | फुफ्फुसः - | फोक्सो |
| दुष्करम् - | गर्न गाह्रो, कठिन | स्थैर्यम् - | स्थिर भएर रहनु |
| शर्म - | सुख | ऊर्जः - | शक्ति |
| अधिगच्छति - | पाउँछ | अन्तरेण - | बाहेक |
| चाञ्चल्यम् - | चुलबुलेपन | पारयामः - | सक्छौँ |
| सद्वृत्तम् - | असल चरित्र भएको | | |

## अभ्यासः

### श्रवणं भाषणञ्च

१. **अधः प्रदत्तानि पदानि सख्युर्मुखाच्छ्रुत्वाऽनूच्चारयत**

चित्तवृत्तेर्निरोधेन, योगसूत्राणि, मुक्तेर्मार्गम्, योगस्याष्टास्वङ्गेषु, स्वास्थ्यसंवर्धनाय, षष्ठीतत्पुरुषसमासेन, सर्वशरीरव्यापी, व्यवस्थाप्य, अस्मच्छरीरम्, पञ्चकोटिसङ्ख्यकेषु, निरुद्धप्रवाहस्य, शरीरान्तर्वर्तमानानाम्, बहिर्निष्क्रान्तिः, सकलसाफल्योपायः, रोगप्रतिरोधिका, प्रभावन्यूनीकरणाय,

## २. स्वयमुच्चार्यानूच्चारयितुं सखीन् निर्दिशत

शरीरान्तःसञ्चारिणः, गतिविच्छेदः, पिङ्गलानाड्याम्, प्राणवायुग्रहणम्, पाञ्चभौतिकस्य, पादाङ्गुष्ठम्, स्वास्थ्यसंरक्षणार्थम्, सारल्येन, सुखमन्विषद्भिः, स्थैर्यम्, ऊर्जोहीनानाम्, वृद्धिङ्गच्छति, आयुष्यक्षयस्य, स्तम्भवृत्तिम्, भस्त्रिका, वासनाकुण्ठाऽविद्यादीन्, दुर्वृत्तीनाम्, सत्कर्मोन्मुखम् ।

## ३. शिक्षकमुखात् पाठस्य प्रथममनुच्छेदं श्रुत्वा योगस्य महत्त्वं कथयत

## ४. पाठगतं चतुर्थमनुच्छेदं सख्युर्मुखाच्छ्रुत्वा प्रदत्तवाक्यानामसत्यत्वं निराकुरुत

(क) शरीरान्तःसञ्चारी वायुः समीरः कथ्यते ।

(ख) प्राणहीनत्वे तु देहो रुग्णो जायते ।

(ग) प्राण उपाधिभेदाच्चतुर्विधो वर्तते ।

(घ) अस्माकं फुप्फुसमपानं सञ्चालयति ।

(ङ) समानो नाभिमारभ्य पादाङ्गुष्ठं यावत् कार्यं करोति ।

(च) नाभिमण्डले स्थित्वा हृदमारभ्य नाभिं यावत् क्रियाशीलो वायुरुदान उच्यते ।

(छ) समानो वायुः कण्ठदेशे तिष्ठति ।

(ज) सर्वशरीरव्यापी वायुरपानः कथ्यते ।

(झ) प्राणायामः शरीराभ्यन्तरे वर्तमानं समानमेव वायुं व्यवस्थापयति ।

## ५. अधस्तनं श्लोकं सलयमुच्चारयत

हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले ।<br>
उदानः कण्ठदेशे स्याद्व्यानः सर्वशरीरगः ॥

## ६. पाठस्य सप्तमस्यानुच्छेदस्य नेपालीभाषायामर्थं कथयत ।

## ७. पाठस्यैकादशमनुच्छेदमाधृत्य प्राणायामप्रकारान् स्वभाषया वर्णयत ।

## ८. पाठं श्रुत्वा प्रदत्तान् प्रश्नानुत्तरयत

(क) संयुक्तराष्ट्रसङ्घेन कतमं दिनं योगदिवसत्वेनोद्घोषितमस्ति ?

(ख) योगस्याष्टास्वङ्गेषु कतममङ्गं वर्तते प्राणायामः ?

(ग) श्वासप्रश्वासयोर्गतेः स्वेच्छया चालनं किं वर्तते ?

(घ) पाञ्चभौतिकस्य देहस्य संरक्षकः कः ?

(ङ) अस्माकं फुप्फुसे कति छिद्राणि वर्तन्ते ?

(च) निरुद्धप्रवाहस्य प्राणवायोः पुनःसञ्चलने किं जायते ?

(छ) आहारादीनामशुद्ध्याऽधुना किमतीव दुष्करं वर्तते ?

(ज) सुखाय कः प्रमुखो हेतुरस्ति ?

(झ) विकाराणां निष्क्रान्त्या शरीरं कीदृग्भवति ?

(ञ) अधुनाऽस्माकमायुष्यक्षयस्य प्रमुखं कारणं किम् ?

(ट) हठयोगिनः कुम्भकं किं कथयन्ति ?

(ठ) कीदृशः प्राणायामः शरीरस्य सकलान् दोषान् निराकरोति ?

(ड) दोषनिःसरणे मनः कीदृग्भवति ?

## ९. पाठं श्रुत्वा प्रदत्तकार्यं कुरुत

'यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टाङ्गानि इति योगसूत्रानुसारेण योगस्याष्टावङ्गानि विद्यन्ते । एतेषां बहिरङ्गान्तरङ्गभेदेन द्विविधत्वं कल्पितमस्ति पतञ्जलिना । तदनुसारेण यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारश्चेति पञ्च बहिरङ्गानि सन्ति चेद् धारणा, ध्यानम्, समाधिश्चेति त्रीणि अन्तरङ्गानि कथ्यन्ते । धारणाध्यानसमाधीनाममन्तःकरणेन साकमेव सम्बन्धो विद्यत इति तेषामन्तरङ्गत्वं सुनिश्चितं भवति । 'त्रयमेकत्र संयमः' इति कथयता महर्षिणा पतञ्जलिना एषामन्तरङ्गाणां संयमपदेन समाहारो विहितोऽस्ति । अत्र योगस्याष्टानामेवाङ्गानां सामान्यः परिचयः प्रस्तूयते-

**यमः –** 'देहेन्द्रियेषु वैराग्यं यम इत्युच्यते बुधैः' इत्यनुसारेण स्वशरीरे इन्द्रियादीनां विषयेषु च वैराग्यं यमः कथ्यते । 'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः' इति योगसूत्रानुसारेण अहिंसायाः, सत्यस्य, अस्तेयस्य, ब्रह्मचर्यस्य, अपरिग्रहस्य च पालनं यमः कथ्यते । यमस्य पालनेन बाह्यशुद्धिर्भवति ।

**नियमः –** 'अनुरक्तिः परे तत्त्वे सततं नियमः स्मृतः' इत्यनुसारेण परमात्मन्यनुराग एव नियमः कथ्यते । 'शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः' इत्यनुसारेण शौचम्, सन्तोषः, तपः, स्वाध्यायः, ईश्वरप्रणिधानं च नियमाः सन्ति । नियमपालनेन अन्तःशुद्धिर्भवति ।

**आसनम् –** 'स्थिरसुखमासनम्' इत्यनुसारेण सुखपूर्वकं दीर्घकालपर्यन्तमुपवेश आसनमुच्यते । पद्मासनम्, सिध्दासनम् इत्यादीन्यनेकान्यासनानि सन्ति । द्वन्द्वसहिष्णुता,

प्राणायामयोग्यता, अनात्मवस्तुनि उदासीनता च आसनशुध्देः फलानि वर्तन्ते । आसनानामभ्यासेन चित्तं स्थिरं भवति, शरीरं च सुखं प्राप्नोति ।

**प्राणायामः** – 'तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः' इत्यनुसारेण स्वेच्छया श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायाम उच्यते । पूरकः, कुम्भकः, रेचकश्चेति प्रथमतः प्राणायामस्त्रिविधो वर्तते । पुनरनुलोमविलोम-भस्त्रिका-भ्रामर्यादयो बहवः प्राणायामा योगविद्भिः प्रतिपादिताः सन्ति । स्वास्थ्यसंरक्षणं प्राणायामस्य प्रयोजनमस्ति ।

**प्रत्याहारः** – 'स्वविषयसम्प्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः' इत्यनुसारेण विषयेऽनासक्तानामिन्द्रियाणां चित्तरूपेऽवस्थितिः प्रत्याहारः । इन्द्रियाणां तद्विषयेभ्यो निवर्तनमन्तर्मुखीकरणञ्च प्रत्याहारो वर्तते । प्रत्याहारेण मनोनिग्रहो जायते ।

**धारणा** – 'देशबन्धश्चित्तस्य धारणा' इत्यनुसारेण एकस्मिन् स्थाने चित्तस्य स्थिरीकरणं धारणा कथ्यते । नाभिचक्रे, नासाग्रे, हृदयपुण्डरीके वा चित्तस्यैकाग्र्यविधानं धारणास्ति । चित्तस्य निश्चलीकरणायासो धारणया जायते ।

**ध्यानम्** – 'तत्र प्रत्ययैकतानता ध्यानम्' इति योगसूत्राधारेण गङ्गाप्रवाहवत् तैलधारावद्वाऽविच्छिन्नरूपेण ध्येयवस्तुनि चित्तस्य संयोगो ध्यानम् । धारणा विच्छिन्नरूपेण विभिन्नेषु देशेषु भवति, ध्यानन्तु अविच्छिन्नरूपेणैकस्मिन् स्थाने भवति । अतो ध्येयस्य कस्मिन्नपि स्थानविशेषे प्रावाहिकरूपेणावस्थानं ध्यानमुच्यते । ध्यानेन चित्तं ध्येयवस्तुनि स्थिरं जायते ।

**समाधिः** – 'ध्यानस्य ध्येयाकारे तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ।' इति सूत्रानुसारेण ध्यातुर्ध्येयरूपेण प्रतीतिः समाधिरुच्यते । समाध्यवस्थायां ध्येयरूपस्यैव भानं भवति, स्वस्वरूपस्य भानं न भवति, ध्यानस्य च विस्मृतिर्जायते । अतः स्वस्वरूपस्य परमात्मनः स्वरूपे परिणामः समाधिरस्ति । उक्तं च भागवते- 'सर्वे मनोनिग्रहलक्षणान्ताः परो हि योगो मनसः समाधिः' इति । सच्चिदानन्दप्राप्तिः समाधेः प्रयोजनं वर्तते ।

**(क) प्रदत्तान् प्रश्नानुत्तरयत**

(अ) कानि योगस्यान्तरङ्गानि ?

(आ) के यमाः ?

(इ) को नियमः कथ्यते ?

(ई) आसनसूत्रं किम् ?

(उ) प्राणायामस्य प्रयोजनं किम् ?

(ऊ) कः प्रत्याहारो वर्तते ?

(ए) किन्नाम धारणा ?

(ऐ) ध्यानेन किं जायते ?

(ओ) स्वस्वरूपस्य कुत्र परिणामः समाधिरस्ति ?

**(ख) रिक्तस्थानं पूरयत**

(अ) योगस्य .......... अङ्गानि विद्यन्ते ।

(आ) स्वशरीरे इन्द्रियादीनां विषयेषु च वैराग्यं ....... कथ्यते ।

(इ) नियमपालनेन ........ भवति ।

(ई) आसनानामभ्यासेन .......... स्थिरं भवति ।

(उ) प्रथमतः प्राणायामः ........... विधो वर्तते ।

(ऊ) ......... मनोनिग्रहो जायते ।

(ए) एकस्मिन् स्थाने चित्तस्य ......... धारणा कथ्यते ।

(ऐ) ......... अविच्छिन्नरूपेणैकस्मिन् स्थाने भवति ।

(ओ) ध्यातुर्ध्येयरूपेण प्रतीतिः ........ उच्यते ।

१०. **अधस्तनं पद्यं तदर्थं च शिक्षकमुखाच्छ्रुत्वा प्राणायामविषये वदत**

धर्म इष्टं धनं नृणां यज्ञोऽहं भगवत्तमः ।

दक्षिणा ज्ञानसन्देशः प्राणायामः परं बलम् ॥

## पठनम्

१. **पाठस्य सर्वानप्यनुच्छेदान् सस्वरं पठत ।**

२. **पाठस्य मौनपठनेनाबुद्धार्थानां पदानां चिह्नाङ्कनं कृत्वा तदर्थान् शिक्षकं प्रति पृच्छत ।**

३. **पाठस्य द्वितीयानुच्छेदस्य वारं वारं द्रुतपठनं विधाय पठनगतिवर्धनाभ्यासं कुरुत ।**

४. **प्रदत्तं पाठगतं श्लोकं यतिगत्यादिनिर्धारणेन सलयं पठत**

यथा पर्वतधातूनां दोषान् दहति पावकः ।

एवमन्तर्गतञ्चैनः प्राणायामेन दह्यते ॥

**५. पाठगतस्याधस्तनस्यानुच्छेदस्य मौनपठनं विधाय प्राणायामस्य स्वास्थ्यसबलकरणत्वं स्वभाषया प्रतिपादयत**

अस्माकं फुप्फुसे सप्तकोटिसङ्ख्यकानि छिद्राणि वर्तन्ते । सामान्यरूपेण गृहीतः श्वासः केवलं पञ्चकोटिसङ्ख्यकेषु छिद्रेषु प्राप्नोति । श्वासस्याप्राप्त्या अवशिष्टः फुप्फुसभागो निष्क्रियतां प्राप्नोति, येन क्षयरोगादीनामुत्पत्तिः सम्भवति । प्राणायामेन फुप्फुसस्य सर्वेषु छिद्रेषु श्वासस्य प्राप्तिर्जायते । येन सबलः सन् फुप्फुसः शरीरस्य प्रत्यवयवं प्राणवायुं प्रापयति । प्रत्यवयवं प्राप्तः प्राणवायुः शरीरावयवेषु शुद्धानां रक्तानां सञ्चारं विदधाति । तेनैव शरीरस्य स्वास्थ्यं सबलं जायते ।

**६. पाठस्य नवममनुच्छेदं पठित्वा प्रदत्तान् प्रश्नानुत्तरयत**

(क) यः कोऽपि किं वाञ्छति ?

(ख) केषां कर्म साफल्यं नाधिगच्छति ?

(ग) विकृतानां वायूनां मात्रा कथं न्यूनायते ?

(घ) केन शरीरं सामान्यावस्थातोऽधिकं प्राणवायुमधिगच्छति ?

(ङ) विकाराणां निष्क्रान्त्या किं किं जायते ?

**७. अधस्तनं पद्यमर्थबोधेन सलयं पठित्वा तद्भावार्थं स्वभाषया प्रकाशयत**

एकाक्षरं परं ब्रह्म प्राणायामः परं तपः ।

सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते ॥

**८. पाठगतस्य प्रदत्तस्यानुच्छेदस्य पठनं कृत्वा सन्धिस्थलानि निश्चित्य सन्धिविच्छेदपूर्वकं पुनः पठनं विधत्त**

प्राणायामो जनं शारीरिकरूपेण मानसिकरूपेण च सबलं करोति । शरीरस्य मनसश्च सबलत्वे रोगप्रतिरोधिका शक्तिः प्रवर्धते । तेन सामान्या रोगादयोऽस्मान् पीडयितुं न शक्नुवन्ति । अद्यत्वे महामारीरूपेण दृश्यमानायाः कोरोनासमस्यायाः प्रभावन्यूनीकरणाय च शरीरे रोगप्रतिरोधकशक्तेर्वृद्धिः परमावश्यकी वर्तते । पुनश्च कोरोनाऽस्माकं श्वासप्रश्वासयोरेव समस्यामुद्भावयति । श्वासप्रश्वासयोर्नियमनाय प्राणायामादृते कोऽस्त्यन्य उपायः ? अतः कोरोनादीनां दुष्प्रभावन्यूनीकरणे प्राणायामः प्रमुखोपायत्वं भजते । प्राणायामेन श्वासप्रश्वासयोर्नियन्त्रणं विधायैव मुनयः सहस्रं वर्षाणि जीवन्ति स्म । अधुनाऽस्माकमायुष्यक्षयस्य प्रमुखं कारणं श्वासप्रश्वासयोरनियन्त्रणमेव । यदि वयं मुनय इव श्वासप्रश्वासयोर्नियन्त्रणं कर्तुं पारयामश्चेदवश्यमस्माकमायुष्यमपि सुदीर्घं भविष्यति । अतो मुनिभिः कथितमस्ति-

**यावद्वायुः स्थितो देहे तावज्जीवनमुच्यते ।**

**मरणं तस्य निष्क्रान्तिः तस्माद्वायुं निरोधयेत् ॥**

## ९. पाठस्य षष्ठमनुच्छेदं पठित्वा रिक्तस्थानं पूरयत

(क) अस्माकं शरीरे ...........सङ्ख्यका नाड्यो वर्तन्ते ।

(ख) कस्याञ्चिदपि नाड्यां वायुप्रवाहो यदि सम्यङ्न जायते, तर्हि शरीरे ..... उत्पद्यन्ते ।

(ग) .............. कारणेनोत्पन्ना विविधा विकारा नाडीषु प्राणवायोः प्रवाहमसन्तुलितं विदधति ।

(घ) यमनियमाभ्यां युतेन जनेन प्राणायामे विहिते शरीरस्य नाडीषु क्षणं प्राणवायोः ........ जायते ।

(ङ) .............. प्राणायामस्य मुख्यं प्रयोजनमस्ति ।

## १०. प्रदत्तं गद्यांशं पठित्वा निर्दिष्टकार्याणि कुरुत

स्वास्थ्यरक्षण आयुर्वेदस्य प्राधान्यमभिलक्ष्यायुर्वेदोऽथर्ववेदस्योपवेदत्वेन प्रथां भजते । मतमिदं चरकसुश्रुतवाग्भटादिभिः प्रमुखायुर्वेदाचार्यैरेव प्रकाशितम् । व्याख्यानकारश्चक्रपाणिरप्येवं वदति- 'आयुर्वेदस्य आयुर्वेदत्वमुक्तं भवति, अथर्ववेदैकशेष एवायुर्वेदः' इति । आयुर्वेदशब्दस्य व्युत्पत्तिं साधयद्भिराचार्यैः प्रकटीकृतम्- 'आयुरस्मिन् विद्यते', 'अनेन वाऽऽयुर्विन्दति' इति । भावप्रकाशटीकाकारोऽप्यायुर्वेदशब्दमेवं विशदीकरोति-

**अनेन पुरुषो यस्मादायुर्विन्दति वेत्ति च ।**

**तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः ॥**

आयुर्वेदस्येतिहासो वैदिककालादेवारभ्यते । विशेषतः क्रिस्तपूर्वचतुर्थशतकादारभ्य क्रिस्तशकस्यैकादशशतकपर्यन्तमायुर्वेदस्योत्कृष्टपरम्परा न केवलं प्रचारे आसन्, अपि तु तत्कालीनेषु प्रख्यातेषु नालन्दा, विक्रमशीला, वलभीत्यादिषु विश्वविद्यालयेषु प्रमुखविषयत्वेन पाठ्यन्ते स्म । भारतीयैः सह वैदेशिकच्छात्रा अप्यस्य प्रयोजनं प्राप्तवन्त आसन् ।

चरकाचार्यविरचिता 'चरकसंहिता', सुश्रुताचार्यप्रणीता 'सुश्रुतसंहिता', वाग्भटग्रथितम् 'अष्टाङ्गहृदयम्', माधवकरस्य 'माधवनिदानम्', शार्ङ्गधरस्य 'शार्ङ्गधरपद्धतिः' इत्यादयः आयुर्वेदस्य प्रमुखग्रन्थाः । चरकसंहितायां ३४१ सस्यजन्यद्रव्याणाम्, १७७ प्राणिजन्यद्रव्याणाम्, ६४ खनिजद्रव्याणां चोल्लेखः कृतोऽस्ति । ग्रन्थस्यास्य महत्त्वमभिलक्ष्यास्य नैकानि व्याख्यानानि रचितानि । चरकसंहितायां ८ स्थानानि सन्ति । मूलत एषाऽग्निवेशेन रचिता संहिता । तत्र चरकमहर्षिणा प्रतिसंस्कारः कृतः । ततो दृढबलनाम्नाऽपरेण वैद्येन सम्पूरणं कृतम् । एवमद्य उपलब्धायां चरकसंहितायामेषां त्रयाणां कर्तृत्वं विद्यते ।

आयुर्वेदानुसारेणायुश्चतुर्विधम् - हितायुः, अहितायुः, सुखायुः, दुःखायुश्चेति । उक्तञ्च-

**हिताहितं सुखं दुःखं आयुस्तस्य हिताहितम् ।**
**मानं च तच्च यत्रोक्तं आयुर्वेदः स उच्यते ॥**

मानसिकशारीरकरोगरहितस्य ज्ञानिनः सुदृढवतो मानवस्यायुः सुखायुः । एतद्विपरीतं दुःखायुः । अरिषड्वर्गविजितस्य सर्वभूतहिते रतस्यायुर्हितायुः । तद्विरोधेऽहितायुर्भवति । आयुश्च शरीरेन्द्रियसत्त्वात्मसंयोगः । इत्थं हि शरीरं तु नानाविधाधिव्याधीनामागारमेव । अतो व्याध्युपसृष्टानां व्याधिपरिमोक्षः, स्वस्थस्य स्वास्थ्यरक्षणं चायुर्वेदस्य द्वे प्रयोजने ।

**(क) प्रदत्तान् प्रश्नानुत्तरयत**

(अ) आयुर्वेदः कस्य वेदस्योपवेदः ?

(आ) आयुर्वेदपदस्य व्युत्पत्तिः का ?

(इ) कदा आयुर्वेदस्य परम्परा प्रचारे आसीत् ?

(ई) वाग्भटग्रथितो ग्रन्थः कः ?

(उ) चरकसंहितायां कियतां द्रव्याणामुल्लेखः प्राप्यते ?

(ऊ) चरकसंहितायास्त्रयः कर्तारः के ?

(ए) आयुर्वेदानुसारेणायुषश्चातुर्विध्यं प्रदर्शयत ।

(ऐ) शरीरं केषामागारम् ?

(ओ) आयुर्वेदस्य द्वे प्रयोजने के ?

(औ) किं नामायुः ?

**(ख) परस्परं मेलयत**

| | |
|---|---|
| हितायुः | मानसिकशारीरकरोगरहितस्यायुः |
| अहितायुः | मानसिकशारीरकरोगसहितस्यायुः |
| सुखायुः | अरिषड्वर्गविजितस्यायुः |
| दुःखायुः | अरिषड्वर्गपराजितस्यायुः |

**(ग) गद्यांशाभ्यन्तरे वर्तमानयोः पद्ययोराशयं प्रकटयत ।**

**(घ) निर्देशानुसारेण भाषिककार्याणि कुरुत**

(अ) 'प्रथाम्' इति पदस्य लिङ्ग-विभक्ति-वचनानि निर्दिशत ।

(आ) 'अथर्ववेदैकशेष एवायुर्वेदः' इति पदावल्याः पदच्छेदं विधत्त ।

(इ) 'आसन्' इति पदस्य धातु-लकार-पुरुष-वचनानि कानि ?

(ई) 'ग्रन्थस्यास्य महत्त्वमभिलक्ष्यास्य नैकानि व्याख्यानानि रचितानि ।' इति वाक्यस्य वाच्यपरिवर्तनं कुरुत ।

(उ) 'कर्तृत्वम्' इत्यत्र प्रकृतिप्रत्ययौ कौ ?

(ऊ) गद्यांशाभ्यन्तरे वर्तमानयोः पद्ययोश्छन्दः किम् ? किं च तल्लक्षणम् ?

**११. पाठं सम्यक् पठित्वा प्रदत्तान् प्रश्नानुत्तरयत**

(क) योगपरिभाषकं योगसूत्रं किम् ?

(ख) कुत्र प्राणायामो हितकारी वर्तते ?

(ग) किन्नाम प्रश्वासः ?

(घ) कः समान उच्यते ?

(ङ) कथमवशिष्टः फुप्फुसभागो निष्क्रियतां प्राप्नोति ?

(च) अस्मत्पूर्वजैर्महर्षिभिः प्रतिपादिता ध्यान-योग-प्राणायामा आधुनिकैः किमर्थमङ्गीकृताः ?

(छ) केन जनैः कुत्रचिच्छर्म न लभ्यते ?

(ज) साफल्यार्थं कस्यापरिहार्यत्वं भवति ?

(झ) रोगप्रतिरोधिका शक्तिः कथं प्रवर्धते ?

(ञ) हठयोगिन कमाभ्यन्तरवृत्तिं कथयन्ति ?

(ट) आसनानि कस्य विकृतीः पीडाश्चापाकुर्वन्ति ?

## लेखनम्

**१. अभ्यासपुस्तिकायामधो वर्तमानानि पदानि सारयत**

चित्तवृत्तेः, साक्षात्कृतः, स्वास्थ्यसंरक्षणाय, उद्घोषितम्, घञ्प्रत्ययविधानेन, आसनसिद्धेः, पिङ्गलानाड्याम्, प्राणहीनत्वे, क्रियाशीलः, मांसपेशीनाम्, प्रत्यवयवम्, यमनियमाभ्याम्, अशुद्ध्या, अस्मत्पूर्वजैः, अवलम्ब्यन्ते, अन्विषद्भिः, ऊर्जोहीनानाम्, उत्कर्षेण, अग्रेसरतायै, कोरोनासमस्यायाः, सहस्रम्, अन्तर्निरोधः, जीवनचर्याम्, याज्ञवल्क्यः, दोषनिःसरणे, सत्कर्मोन्मुखम् ।

## २. अधोऽङ्कितानां पदानां श्रुतिलेखनं कुरुत

अस्मत्पूर्वजैः, मार्गप्रदर्शकः, षष्ठीतत्पुरुषसमासेन, नियमनपद्धतित्वेन, श्वासप्रश्वासयोः, पाञ्चभौतिकस्य, वर्तमानः, सञ्चालनम्, व्यवस्थाप्य, अस्मच्छरीरम्, नाड्यः, निरुद्धप्रवाहस्य, स्वास्थ्यसंरक्षणार्थम्, अङ्गीकृताः, चञ्चलतायाः, अपरिहार्यत्वम्, मनःशरीरयोः, सामान्यावस्थातः, सकलसाफल्योपायः, रोगप्रतिरोधकशक्तेः, पूरकः, भस्त्रिका, त्रैकालिकसन्ध्याया, उपस्थापितवान्, मलनिर्गमने ।

## ३. अधः प्रस्तुतानि पदानि शुद्धानि विधाय पुनर्लिखत

योगसुत्रम्, दर्सनत्वेन, अमुल्यसम्पत्त्वम्, शरीरान्तसञ्चारिणः, निस्कासनम्, उपाधीभेदात्, तन्तुनाम्, सर्वशरिरव्यापी, नाडीषोधनम्, सान्तये, सारल्येन, नीयन्त्रणम्, न्युनायते, स्म्रितिशक्तिः, दुस्प्रभावन्यूनीकरणे, बहिप्रक्षेपणम्, अन्तःकरनवृत्तिः, शरीरावयवेसु, दुर्वृत्तिनाम्, उत्साहेण ।

## ४. अधः प्रदत्तानि पदान्यर्थापयत

आधृत्य, उद्घाटयति, प्रत्याहारः, गतिविच्छेदः, शरीराभ्यन्तरम्, फुप्फुसः, ग्रन्थीनाम्, स्फूर्तम्, छिद्राणि, प्रवाहनिरोधः, स्थैर्याय, अनुधावन्तः, यथेच्छम्, साफल्यम्, बहिर्निष्क्रान्तिः, निश्चप्रचम्, सुदीर्घम्, नासाच्छिद्रतः, संशीतिः, सद्वृत्तम् ।

## ५. अधो लिखितानि पदानि प्रयुज्य मौलिकवाक्यानि रचयत

पश्चात्, अद्य, पूर्वम्, अद्यत्वे, देशेषु, हृदि, स्थित्वा, सम्भवति, विदधाति, सम्यक्, अपगच्छन्ति, दुष्करम्, अधुना, कर्तुम्, ऋषयः, पीडयितुम्, ऋते, इव, दोषान्, परमात्मनि, कृते ।

## ६. पाठस्यैकादशस्यानुच्छेदस्य श्रुतलेखनं कुरुत ।

## ७. पाठस्याष्टमादनुच्छेदात् प्रदत्तानां पदानां पर्यायपदान्यन्विष्य लिखत

इदानीम्, वित्तम्, सुखम्, प्राप्यते, स्थिरता, कारणम्, चित्तम्, कर्तुम्, इच्छानुसारेण, मुनयः ।

## ८. पाठगतं दशममनुच्छेदमाधृत्य स्वभाषया प्राणायामशब्दस्यार्थं प्रकाशयत ।

## ९. पाठस्य तृतीयमनुच्छेदमाधृत्य प्रदत्तकार्याणि कुरुत

**(क) एकवाक्येनोत्तरयत**

(अ) आयामशब्दः कथं निष्पद्यते ?

(आ) केन विग्रहेण प्राणायामः प्राणानां नियमनपद्धतित्वेन सूचितो वर्तते ?

(इ) प्राणायामपरिभाषकं योगसूत्रं किम् ?

(ई) हठयोगिनामनुसारेण प्राणायामः कः ?

(उ) किन्नाम श्वासः ?

**(ख) रिक्तस्थानं पूरयत**

(अ) ............ इति विग्रहे षष्ठीतत्पुरुषसमासेन प्राणायामशब्दो निष्पद्यते ।

(आ) प्राणस्य ................. वायोर्निरोधः प्राणायाम उच्यते ।

(इ) आसनसिद्धेरनन्तरं श्वासप्रश्वासयोर्यथोचितं ............ प्राणायामः कथ्यते ।

(ई) प्राणवायोर्निरोधेन वयं तं ............... किञ्चित्कालं स्थिरं कर्तुं शक्नुमः ।

(उ) श्वासप्रश्वासयोर्गतेः .......... चालनं प्राणायामो वर्तते ।

**(ग) प्राणायामशब्दस्य व्युत्पत्तिगतमर्थमाधृत्य स्वभाषयाऽनुच्छेदमेकं रचयत ।**

## १०. एकवाक्येन प्रदत्तान् प्रश्नानुत्तरयत

(क) अस्मत्पूर्वजैः केन परमात्मा साक्षात्कृतः ?

(ख) योगाभ्यासः कथं मुक्तेर्मार्गमुद्घाटयति ?

(ग) कः प्राणः कथ्यते ?

(घ) शरीरस्य सर्वेऽप्यवयवाः केन सम्बद्धा भवन्ति ?

(ङ) फुप्फुसस्य सर्वेषु छिद्रेषु श्वासस्य प्राप्तिः केन जायते ?

(च) प्राणायामस्य मुख्यं प्रयोजनं किम् ?

(छ) शरीरस्यारोग्यतायै, मनसः शान्तये स्थैर्याय विज्ञैः के उपाया अवलम्ब्यन्ते ?

(ज) कीदृशा जना न कदाचिदानन्दमनुभवन्ति ?

(झ) को मनः स्थिरं विधातुं न शक्नोति ?

(ञ) वैज्ञानिकानां मते कथमन्नादीनां पाचनं जायते ?

(ट) केन शरीरं सामान्यावस्थातोऽधिकं प्राणवायुमधिगच्छति ?

(ठ) कोरोनादीनां दुष्प्रभावन्यूनीकरणे कः प्रमुखोपायत्वं भजते ?

(ड) कुम्भकः कतिविधो वर्तते ?

(ढ) कीदृशाः प्राणायामविधयो जनानां स्वास्थ्यसंरक्षणं कुर्वन्ति ?

(ण) याज्ञवल्क्यमते प्राणायामेन किं भवति ?

**११. अधस्तनान् प्रश्नान् सङ्क्षेपेणोत्तरयत**

(क) किन्नाम प्राणायामः ? विविधमतसर्वेक्षणेन लिखत ।

(ख) प्राणस्य प्रकारान् तत्कार्याणि च निर्दिशत ।

(ग) अस्माकं शरीरस्य स्वास्थ्यं कथं सबलं जायते ?

(घ) स्वास्थ्यरक्षणोपायेषु प्राणायामः कथं सरलतमोपायत्वं सिद्ध्यति ?

(ङ) प्राणायामः सकलसाफल्योपायो वर्तते । अत्र हेतुः कः ?

**१२. प्राणायामस्य हितकारित्वसम्पादने को हेतुः ? पाठं विविच्य लिखत ।**

**१३. अस्य प्रबन्धस्य सारांशः को भवितुमर्हति ? एकस्मिन्ननुच्छेदे लिखत ।**

**१४. अस्य प्रबन्धस्य 'प्राणायामो हि भेषजम्' इति शीर्षकं समुचितमस्त्युतानुचितम् ? समीक्षणं विधत्त ।**

**१५. पाठगतं प्रदत्तं पद्यमाधृत्य परस्परं मेलयत**

हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले ।
उदानः कण्ठदेशे स्याद्व्यानः सर्वशरीरगः ॥

| | |
|---|---|
| प्राणः | नाभिदेशे |
| अपानः | कण्ठदेशे |
| समानः | हृद्देशे |
| उदानः | सकलशरीरे |
| व्यानः | गुददेशे |

**१६. अधस्तनं श्लोकं पठित्वा स्वभाषया सन्ध्यायां प्राणायामविधिं लिखत**

सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥

## रचनात्मकोऽभ्यासः

**(क) 'योगो भवति दुःखहा' इत्यस्मिन् विषये सुरगिरा नातिविस्तृतं प्रबन्धमेकं रचयत ।**

**(ख) आसनं योगस्य तृतीयमङ्गं वर्तते । स्वास्थ्यसंरक्षणे तस्योपयोगमधुना कथं विहितं वर्तते ? स्वभाषयाऽनुच्छेदमेकं लिखत ।**

**(ग) आयुर्वेदान्तर्गतस्यागदतन्त्रस्य विषयेऽनुच्छेदमेकं रचयत ।**

**(घ) 'स्वस्थजीवनम् सुखि जीवनम्' इति विषये नातिविस्तृतमेकं निबन्धं लिखत ।**

# विसेमिरा

कस्मिँश्चिद्देशे कलारसिकः सुबाहुर्नामा वनिपतिर्महापराक्रमो धर्मोपार्जितभूरिविभवश्चासीत् । तस्य च सकलशास्त्रपारङ्गमो व्यावृत्तसर्वेन्द्रियार्थः कुशाग्रबुद्धिर्वृद्धो गुरुरासीत् । राज्ञः श्रीमत्यभिधानैका पुत्री सन्तानसुखं परिपूरयन्त्यासीत् । सा च निद्रेव लोचनग्राहिणी, मूर्च्छेव मनोहारिणी, प्रावृडिव घनकेशा, अरण्यभूमिरिव अक्षतरूपसम्पन्ना आसीत् । राजा यथायोग्यं तस्याः पोषणं कृतवान् । सन्तानस्नेहमोहान्धो राजा पुत्रीदुःखभयात्तां चिरकालं यावदध्ययनाद् विमुखां कृतवान् । राज्ञोऽविवेकितां संसूचयन् गुरुरुवाच-

**रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।**
**विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥**
**माता शत्रुः पिता वैरी येन बालो न पाठितः ।**
**न शोभन्ते सभामध्ये हंसमध्ये वको यथा ॥ इति ॥**

भूपतिरपि गुरोर्वचनरहस्यं विज्ञाय अध्ययनाय तस्मै पुत्री समर्पितवान् । विद्याव्यसनिनो गुरोरध्यापनात् सापि अत्यल्पकालादेव प्राप्तविद्या जाता ।



एकदा राज्ञो विद्यारूपयौवनसम्पन्नायाः स्वपुत्र्याश्चित्रलेखनाभिलाषा समुत्पन्ना । स स्वपुत्र्याश्चित्रलेखनाय चित्रकारानादिदेश । गुरुवरञ्चानुरुरोध । मनश्चित्रलेखनधुरन्धरोऽपि गुरुस्तनुश्चित्रलेखने सिद्धहस्तो नासीत् । किंकर्तव्यविमूढोऽपि स नृपानुरोधं नावमन्तुं चित्रलेखने प्रवृत्तः । चित्रस्थस्या राजकुमार्या वक्षस्थले विन्दुरेकः पपात । सम्पन्ने च चित्रलेखने गुरुस्तद् राज्ञे समर्पितवान् । राजा च चित्रं निर्वर्ण्य हृष्टः । हठाद् विन्दुं दृष्ट्वा अपृच्छत्, "तिलकमत्र कुत आयातम् ?" गुरुः प्रत्यवदत्, "जरावशात् कम्पमानहस्ताद् विन्दुरतप्तत् ।" सन्दिग्धहृदयेन राज्ञा पुत्र्यास्तिलकपरीक्षणाय सेविका नियुक्ताः । संयोगाद् विन्दुपातस्थल एव राजकुमार्यास्तिलकमासीत् । राजा क्रुद्धो जातः । क्रोधान्धो राजा सेवकानादिशत्, "ब्राह्मणमेतं महारण्ये हत्वा यकृदत्र आनयन्तु ।" नृशंसं नृपादेशं श्रुत्वा सर्वेऽपि भग्नहृदया जाताः । गुरोर्नैर्दुष्ये सर्वेषां विश्वासस्त्वासीत् परन्तु नृपाज्ञामुल्लङ्घयितुं न कोऽपि समर्थ आसीत् । मन्त्री मतिमानासीत् । मन्त्रिणः परामर्शानुसारेण कर्मकरा मृगं हत्वा तद्यकृद् राज्ञे समर्पितवन्तः । गुरुं च महारण्ये परित्यक्तवन्तः । पश्चाद् मन्त्री गुरुं स्वगृहे आनीय अगोपयत् ।

कालानन्तरमेकदा राजा मृगयार्थमरण्यानीं यातः । मृगमनुधावतस्तस्य सैनिकाः पश्चादेव अवशिष्टाः । तदानीमेव व्याघ्राद्भीतः ऋक्षो राज्ञः सम्मुखं समायातः । ऋक्षाद् भीतो राजा वृक्षमारोहत् । क्षणेनैव व्याघ्रोऽपि तत्रैवागतः । व्याघ्रभयाद् ऋक्षोऽपि तमेव वृक्षमारोहत् । व्याघ्रस्तु वृक्षारोहणे असमर्थ आसीत् । स वृक्षमूले एव स्थितवान् । ऋक्षान्नृपो भीतः, नृपाद् ऋक्षो भीतः, द्वावेव व्याघ्राद् भीतौ आस्ताम् । ऋक्षेणोक्तम्, "इदानीमावयोः शत्रुर्व्याघ्र एव । अत आवां मित्रतां करवाव" इति । राजा ऋक्षप्रस्तावं स्वीकृतवान् । रात्रिः सञ्जाता । ऋक्ष उक्तवान्, "राजन्, स्वस्थीभूय निद्रां कुरु ।" राजा ऋक्षाङ्के शिरो दत्त्वा सुप्तवान् । व्याघ्रेणोक्तम्, "भो ऋक्ष ! अमुं नरं यदि मह्यमर्पयसि तदावयोः प्रीतिः स्यात् । आवां स्वजनावेकत्र वनवासिनौ ।" ऋक्षेणोक्तम्, "नाहं विश्वासघ्नः । अमुं युगान्तेऽपि ते नार्पयिष्यामि ।" इतस्तेन राजा जागरितः । ऋक्षेणोक्तम्, "त्वं जागृहि, शयनमहं करोमि । परमसौ मां याचयिष्यति । असौ कपटवानस्ति । त्वया तु मलिनता न कार्या ।" एवमुक्त्वा स स्वकेशान् शाखायां बद्ध्वा सुप्तवान् । व्याघ्रेणोक्तम्, "भो राजन् ! अमुं मेऽर्पय । अथ त्वां जीवन्तं मुञ्चामि । अन्यथा वनात्कथं यास्यसि ? असौ मलिनोऽस्ति, प्रातस्त्वां हत्वा खादिष्यति ।" व्याघ्रवचसा राज्ञा ऋक्षो वृक्षात् क्षिप्तः । शाखासु केशैर्बद्धः सन् ऋक्षोऽधो नापतत् । स विश्वासघातिनं राजानमुक्तवान्, "रे किमिदम् ? अधुना किम् ?" राजा ऋक्षचरणयोर्निपत्याह, "त्रुटिवशादित्थं जातम्, क्षमस्व ।" ऋक्षेणोक्तम्, "त्वं वचनाद् भ्रष्टः, अतस्ते शपामि ।" राजा सदैन्यं याचितवान्, "अनुग्रहं देहि ।" ऋक्षेणोक्तम्, "विसेमिरा एवं जल्पसि ? यदि कोऽप्यस्य व्याख्यां करिष्यति तदा ते वचः पटुतरं स्यात्" इति । प्रभाते तुरगपदैः सैन्यमायातम् । व्याघ्रो वनं गतः । ऋक्षोऽपि पलायितः । राजा पुरं प्राप्तः परं 'विसेमिरा' एतदेव जल्पन्नासीत् । मान्त्रिकैर्यथाशक्ति विहितेऽप्युपचारे स निरन्तरं तदेव जल्पति स्म ।

मन्त्री उद्घोषितवान्, "नृपं निरामयं कर्तुं समर्थो जनो यथेप्सितं धनैरलङ्कृतो भविष्यति" इति । परन्तु राज्ञ उपचारार्थं न कश्चन समायातः । खिन्नमनाः मन्त्री रात्रौ स्वगृहं गतः । तस्य मलिनमुखं परिवीक्ष्य

गुरुरुवाच, “नृपसभायां का वार्ता ?” मन्त्री नृपस्य रोगविषये गुरुं विस्तरेणाकथयत् । गुरुरवोचत्, “तत्तु महापापस्य फलमस्ति । यदि मां तत्र नयसि तर्हि नृपं निरामयं करिष्यामि । परं कथमाकरणं विना गम्यते ?” श्वस्तनदिवसे मन्त्रिणा राजा निवेदितः, “देव ! मम गृहे युवत्येकायातास्ति, सा भवन्तं निरामयं करिष्यति ।” नृपस्तामाह्वातुमादिशत् । स्वेच्छया स्त्रीवेषं धृत्वा गुरुर्नृपसभां प्राप्तः । 'विसेमिरा' इति जल्पन् राजा स्त्रीवेषेण गुरुणा मधुरस्वरेणोक्तः-

**विश्वासप्रतिबद्धानां वञ्चने का विदग्धता ।**
**अङ्कमारुह्य सुप्तानां हनने किन्नु पौरुषम् ॥**

गुरुवचनं श्रुत्वा राजा सेमिरा, सेमिरा इत्येतदेव वक्तुमारब्धः । गुरुणा पुनरुक्तम्-

**सेतुं गत्वा समुद्रस्य गङ्गासागरसङ्गमम् ।**
**ब्रह्महापि प्रमुच्येत मित्रद्रोही न मुच्यते ॥**

इति श्रुत्वा राजा मिरा, मिरा इति वक्तुमारब्धः । गुरुणा पुनरुक्तम्-

**मित्रद्रोही गुरुद्रोही ये च विश्वासघातकाः ।**
**ते यान्ति नरकं घोरं यावदाभूतसंप्लवम् ॥**

इत्युक्ते राजा रा, रा, इत्येतदेव वक्तुमारब्धवान् । पुनश्च गुरुणोक्तम्-

**राजवर्य ! निजं भद्रं यदि त्वं सत्यमिच्छसि ।**
**देहि दानं द्विजातिभ्यो देवताराधनं कुरु ॥**

इति श्रुत्वा राजा शापान्मुक्तः । आश्चर्यान्वितो राजा उवाच-

**नरान्तराननं जातु नेक्षमाणा स्वके गृहे ।**
**तिष्ठन्ती पुत्रि ! त्वं वेत्सि व्याघ्रऋक्षकथां कथम् ॥ इति ।**

गुरुः पुनरुवाच-

**गुरुदेवप्रसादेन जिह्वाग्रे मे सरस्वती ।**
**जानामि तव वृत्तान्तं श्रीमतीतिलकं यथा ॥**

इति श्रवणानन्तरं राजा सुप्त्वोत्थित इव जातः । यवनिकान्तःस्थं गुरुमुपगत्य स क्षमां ययाचे । गुरुशुश्रूषां विधाय सुखपूर्वकं जीवनं व्यतीतवान् ।

## शब्दार्थाः

| | |
|---|---|
| अवनिपतिः - | राजा |
| धर्मोपार्जितभूरिविभवः - | न्यायपूर्वक प्रशस्त ऐश्वर्य कमाएका |
| व्यावृत्तसर्वेन्द्रियार्थः - | विषयबाट इन्द्रियहरूलाई विमुख गराएका |
| लोचनग्राहिणी - | आँखालाई आकर्षित गर्ने |
| प्रावृट् - | वर्षा |
| अक्षतरूपसम्पन्ना - | निर्दोष रूप भएकी |
| किंशुकः - | पलाश |
| विद्याव्यसनी - | विद्यामा लत लागेका |
| धुरन्धरः - | निपुण |
| यकृत् - | कलेजो |
| नृशंसम् - | क्रूर |
| मृगयार्थम् - | सिकारका लागि |
| ऋक्षः - | भालु |
| विश्वासघ्नः - | विश्वासघाती |
| तुरगः - | घोडा |
| यवनिका - | पर्दा |
| ब्रह्महा - | ब्रह्महत्यारा |
| गुरुशुश्रूषा - | गुरुसेवा |
| निवार्यते - | छेक्न सकिन्छ |

## अभ्यासः

### श्रवणं भाषणञ्च

१. **मित्रस्य उच्चारणं श्रुत्वा स्वयमुच्चारयत**

धर्मोपार्जितभूरिविभवः, सकलशास्त्रपारङ्गमः, लोचनग्राहिणी, अक्षररूपसम्पन्ना, किंशुकः, किंकर्तव्यविमूढः, व्याघ्रऋक्षकथाम्, विश्वासघ्नः, परिवीक्ष्य, प्रतिबद्धानाम्, आभूतसंप्लवम्, सुप्त्वोत्थितः ।

## २. शुद्धमुच्चारयत

दन्त्यकथा, अलङ्करिष्यते, भग्नहृदयः, मनश्चित्रलेखनधुरन्धरः, युगान्तः, ऋक्षस्तद्वचसा, नृपेणाहूता, श्रुत्वा, द्विजातिभ्यः, वृत्तान्तम्, स्वजनावेकत्र ।

## ३. पाठस्य तृतीयानुच्छेदं शिक्षकमुखाच्छ्रुत्वा प्रश्नानुत्तरयत

(क) राजा किमर्थं वृक्षमारुरोह ?

(ख) ऋक्षो राजानं व्याघ्राय समर्पितवान् न वा ?

(ग) को वचनाद् भ्रष्टः ?

(घ) राजा किमेव वक्ति ?

(ङ) ऋक्षनृपौ कथं मित्रौ सञ्जातौ ?

## ४. पाठस्य कथां सङ्क्षिप्य स्वभाषया श्रावयत ।

## ५. पाठस्य प्रथमानुच्छेदं श्रुत्वा अधस्तने प्रश्नद्वये स्वविचारं प्रकटयत

(क) रूपयौवनसम्पन्ना विशालकुलसम्भवा अपि जनाः कथं न शोभन्ते ? सोदाहरणं कथयत ।

(ख) 'माता शत्रुः पिता वैरी येन बालो न पाठितः' इति कथनं शोभनं न वा ?

## ६. अधस्तनस्य पद्यस्याशयं शिक्षकमुखाच्छ्रुत्वा पौरुषस्य विषये वदत

विश्वासप्रतिबद्धानां वञ्चने का विदग्धता ।

अङ्कमारुह्य सुप्तानां हनने किन्नु पौरुषम् ॥

## ७. पाठस्य द्वितीयमनुच्छेदं श्रुत्वा अधस्तनवाक्यानां सत्यासत्यविवेकं कुरुत

(क) तनुश्चित्रलेखनधुरन्धरोऽपि गुरुर्मनश्चित्रलेखने सिद्धहस्तो नासीत् ।

(ख) नृपाज्ञामुल्लङ्घयितुं सर्वे समर्था आसन् ।

(ग) राजा चित्रं निर्वर्ण्य हृष्टः ।

(घ) कर्मकरा गुरुं महारण्ये परित्यक्तवन्तः ।

(ङ) विन्दुपातस्थले राजकुमार्यास्तिलकं नासीत् ।

## ८. युष्माभिरपि क्वचिल्लोकप्रचलिताः कथाः श्रुताः स्युः । तासु काञ्चित् प्रेरणादायिनीं कथां कक्षायां श्रावयत ।

९. **शिक्षकमुखात् प्रदत्तां कथां श्रुत्वा तदनुवर्तिनां प्रश्नानामुत्तराणि कथयत**



अस्ति मालवविषये पद्मगर्भाभिधानं सरः । तत्रैको वृद्धो बकः सामर्थ्यहीन उद्विग्नमिवात्मानं दर्शयित्वा स्थितोऽस्ति । स च केनचित्कुलीरेण दूरादेव दृष्टः, पृष्टश्च, "किमिति भवानत्राहारत्यागेन तिष्ठति ?" बकेनोक्तम्, "मत्स्या मम जीवनहेतवः, ते कैवर्तैरागत्य व्यापादयितव्या" इति वार्ता नगरोपरान्ते मया श्रुता । अतो वर्तनाभावादेवास्मन्मरणमुपस्थितमिति ज्ञात्वाहारेऽप्यनादरः कृतः । ततो मत्स्यैरालोचितम्, "इह समये तावदुपकारक एवाऽयं लक्ष्यते, तदयमेव यथाकर्तव्यं पृच्छ्यताम् ।" यथा चोक्तम्-

**उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा ।**
**उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥**

मत्स्या ऊचुः, "भो बक ! कोऽत्र अस्माकं रक्षणोपायः ?" बकोऽकथयत्, "अस्ति रक्षणोपायो जलाशयान्तराश्रयणम् । तत्राहमेकैकशो युष्मान्नयामि ।" मत्स्या आहुः, "एवमस्तु ।" ततोऽसौ दुष्टो बकस्तान्मत्स्यानेकैकशो नीत्वा खादितवान् । अनन्तरं कुलीरस्तमुवाच, "भो बक ! मामपि तत्र नय ।" ततो बकोऽप्यपूर्वकुलीरमांसार्थी सादरं तं नीत्वा स्थले धृतवान् । कुलीरोऽपि मत्स्यकण्टकाकीर्णं तत्स्थलमालोक्याचिन्तयत्, "हा हतोऽस्मि मन्दभाग्यः । भवतु । इदानीं समयोचितं व्यवहरिष्यामि ।" यतः-

**तावद्भयेन भेतव्यं यावद्भयमनागतम् ।**
**आगतन्तु भयं दृष्ट्वा प्रहर्तव्यमभीतवत् ॥**

किञ्च-

**अभियुक्तो यदा पश्येन्न किञ्चिद्गतिमात्मनः ।**
**युध्यमानस्तदा प्राज्ञो म्रियेत रिपुणा सह ॥**

इत्यालोच्य स कुलीरस्तस्य बकस्य ग्रीवां चिच्छेद । अथ स बकः पञ्चत्वं गतः ।

(क) केन सन्धिर्विधेया ? केन च न ?

(ख) भये आगते किं कर्तव्यम् ?

(ग) कुलीरो विश्वासघ्नं बकं किमकरोत् ?

(घ) मत्स्या बकं किमूचुः ?

(ङ) बकः कीदृश आसीत् ?

(च) बको मत्स्यान् कुत्रानयत् ?

(छ) बको मत्स्यान् केनोपायेन अवञ्चयत् ?

(ज) 'मत्स्यैरालोचितम्', 'बकोऽपि' इत्यनयोः सन्धिविच्छेदं कुरुत ।

(झ) 'युष्मान्', 'भयेन' इत्यनयोः प्रातिपदिक-विभक्ति-वचननिर्देशं कुरुत ।

(ञ) अनुच्छेदे प्रयुक्तानि त्रीणि विशेषणपदानि अन्विष्य कथयत ।

(ट) अनुच्छेदात् क्तप्रत्ययान्ते द्वे पदे कथयत ।

**१०. पाठस्य प्रथममनुच्छेदं श्रुत्वा अधस्तनानां पदानां प्रसङ्गानुकूलमर्थं श्रावयत**

कुशाग्रबुद्धिः, लोचनग्राहिणी, अवनिपतिः, घनकेशा, अविवेकिता ।

**११. कथायाः सन्देशं स्वशब्दैः कथयत ।**

**१२. अधस्तनानां पदानां प्रयोगेण प्रतिपदं पाठातिरिक्तमेकं वाक्यं कथयत**

बकः, सिद्धहस्तः, मृगयार्थम्, अमुम्, जागृहि, निरामयः, यवनिका, गुरुशुश्रूषा ।

## पठनम्

**१. पाठस्थान् श्लोकान् सलयं वाचयत ।**

**२. पाठस्यानुच्छेदान् क्रमेण सस्वरं पठत ।**

**३. पाठस्य तृतीयानुच्छेदस्य द्रुतपठनं कुरुत ।**

### ४. पाठस्य चतुर्थानुच्छेदं पठित्वा रिक्तस्थानं पूरयत

(क) तत्तु..................फलमस्ति ।

(ख) न कश्चन समायातः............................ ।

(ग) कथमाकरणं..................गम्यते ?

(घ) स्वेच्छया ................ गुरुर्नृपसभां गतः ।

(ङ) मन्त्रिणः..............परिवीक्ष्य गुरुरुवाच ।

### ५. कथां सम्यक् पठित्वा समयक्रममनुसृत्य अधस्तनानां घटनानां क्रमनिर्धारणं कुरुत

( ) किंकर्तव्यविमूढस्यापि गुरोर्नृपानुरोधेन चित्रलेखने प्रवृत्तिः ।

( ) अध्ययनाय पुत्र्याः समर्पणम् ।

( ) वक्षोमध्ये विन्दोः पातः ।

( ) राज्ञो मृगयार्थमरण्यान्यां गमनम् ।

( ) कश्मिंश्चिद्देशे सुबाहुर्नाम्नो राज्ञः शासनम् ।

( ) ऋक्षान्नृपस्य, नृपाद् ऋक्षस्य, उभयोरेव व्याघ्राद्भीतिः ।

( ) युवतिवेषाद् गुरोः श्लोकश्रवणानन्तरं शापान्मुक्तिः ।

( ) विश्वासघातकारणाद् राजनि ऋक्षशापः ।

( ) मन्त्रिणो बुद्धिमत्ता ।

( ) क्रोधपूर्वकं महारण्ये गुरोर्हननायादेशः ।

( ) मन्त्रिणः स्वगृहे गुरोर्गोपायनम् ।

( ) गुरुसमीपं गत्वा राज्ञः क्षमायाचनम् ।

( ) राज्ञः सुखपूर्वकं जीवनयापनम् ।

### ६. प्रदत्तमनुच्छेदं पठित्वा राज्ञः पुत्र्याः स्वरूपं वर्णयत

कस्मिँश्चिद्देशे कलारसिकः सुबाहुर्नामा वनिपतिर्महापराक्रमो धर्मोपार्जितभूरिविभवश्चासीत् । तस्य च सकलशास्त्रपारङ्गमो व्यावृत्तसर्वेन्द्रियार्थः कुशाग्रबुद्धिर्वृद्धो गुरुरासीत् । राज्ञः श्रीमत्यभिधानैका पुत्री सन्तानसुखं परिपूरयन्त्यासीत् । सा च निद्रेव लोचनग्राहिणी, मूर्च्छेव मनोहारिणी, प्रावृडिव घनकेशा, अरण्यभूमिरिव अक्षतरूपसम्पन्ना आसीत् । राजा यथायोग्यं तस्याः पोषणं कृतवान् ।

सन्तानस्नेहमोहान्धो राजा पुत्रीदुःखभयात्तां चिरकालं यावदध्ययनाद् विमुखां कृतवान् । राज्ञोऽविवेकितां संसूचयन् गुरुरुवाच-

**रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।**
**विद्याहीनाः न शोभन्ते निर्गन्धा इव किंशुकाः ॥**
**माता शत्रुः पिता वैरी येन बालो न पाठितः ।**
**न शोभन्ते सभामध्ये हंसमध्ये वको यथा ॥ इति ॥**

भूपतिरपि गुरोर्वचनरहस्यं विज्ञाय अध्ययनाय तस्मै पुत्री समर्पितवान् । विद्याव्यसनिनो गुरोरध्यापनात् सापि अत्यल्पकालादेव प्राप्तविद्या जाता ।

## ७. कथाया द्वितीयानुच्छेदस्य मौनपठनं विधाय अधस्तनानां प्रश्नानामुत्तराणि दत्त

**(क) अतिसङ्क्षेपेण उत्तरयत**

(अ) गुरुः किमर्थं चित्रलेखने प्रवृत्तः ?

(आ) विन्दुपातस्थले किमासीत् ?

(इ) कर्मकराः किं कृतवन्तः ?

(ई) राजा किमादिशत् ?

(उ) मन्त्री गुरुवरं किं कृतवान् ?

**(ख) सङ्क्षेपेण उत्तरयत**

(अ) नृपादेशः समुचितो न वा ? किमर्थम् ?

(आ) मन्त्रिणः कार्यं समुचितं न वा ? किमर्थम् ?

**(ग) भाषिककार्यं कुरुत**

(अ) 'विद्याव्यसनिनः', 'पश्चात्', 'राजन्' इत्येषां प्रातिपदिकविभक्तिवचनानि निर्दिशत ।

(आ) 'यवनिका', 'आभूतसंप्लवम्', 'सुप्त्वोत्थितः' इत्येतानि पदानि अर्थापयत ।

(इ) 'अवनिपतिः', 'पोषणम्', 'गुरुः' इत्येतेषां विशेष्यपदानां विशेषणपदानि पाठादन्विष्य निर्दिशत ।

(ई) 'आदिशत्', 'शोभन्ते', 'आनयन्तु' इत्येतेषां क्रियापदानां धातु-लकार-पुरुष-वचनानि निर्दिशत ।

(उ) 'सुप्त्वोत्थितः', 'धुरन्धरोऽपि', 'अतस्ते' इत्येषां सन्धिविच्छेदं कुरुत ।

(ऊ) 'लोचनग्राहिणी', 'मनोहारिणी', 'किंकर्तव्यविमूढः' इत्येषां विग्रहवाक्यं वदत ।

८. **पाठस्य तृतीयमनुच्छेदं पठित्वा ऋक्षनृपयोः कः श्रेष्ठः ? इति विषये विमर्शं कुरुत ।**

९. **पाठस्य अन्तिमनुच्छेदं पठित्वा तत्सारांशं स्वगिरा कथयत ।**

१०. **अधस्तनं श्लोकं पठित्वा सारांशं विमृशत**

विश्वासप्रतिबद्धानां वञ्चने का विदग्धता ।

अङ्कमारुह्य सुप्तानां हनने किन्नु पौरुषम् ॥

११. **प्रदत्तां कथां पठित्वा निर्दिष्टकार्याणि कुरुत**

अस्ति हिमवान् नाम सर्वरत्नभूमिर्नगाधिराजः । तस्य सानोरुपरि विभाति कञ्चनपुरं नाम नगरम् । तत्र जीमूतकेतुः इति श्रीमान् विद्याधरपतिर्वसति स्म । तस्य गृहोद्याने कुलक्रमागतः कल्पतरुः स्थितः । स राजा जीमूतकेतुस्तं कल्पतरुमाराध्य तत्प्रसादाच्च बोधिसत्वांससम्भवं जीमूतवाहनं नाम पुत्रं प्राप्नोत् । स जीमूतवाहनो महान् दानवीरः सर्वभूतानुकम्पी चाभवत् । तस्य गुणैः प्रसन्नः स्वसचिवैस्तत्र प्रेरितो राजा कालेन सम्प्राप्तयौवनं तं यौवराज्ये अभिषिक्तवान् । कदाचिद् हितैषिणः पितृमन्त्रिणो युवराजं जीमूतवाहनमक्तवन्तः, "युवराज ! योऽयं सर्वकामदः कल्पतरुस्तवोद्याने तिष्ठति स त्वया सदा पूज्यः । अस्मिन्ननुकूले स्थिते सति शक्रोऽपि अस्मान् बाधितुं न शक्नुयात्" इति ।

एतदाकर्ण्य जीमूतवाहनोऽचिन्तयत्, 'अहो ईदृशममरपादपं प्राप्याप्यस्माकं पूर्वजैः किमपि तादृशं फलं न प्राप्तम् । किन्तु केवलं कैश्चिदेव कृपणैः कश्चिदेव अर्थोऽर्थितः । तदहमस्मात् कल्पतरोरभीष्टं साधयामि' इति । एवमालोच्य स पितरमुपागच्छत् । स सुखमासीनं पितरमेकान्ते न्यवेदयत्, "तात ! त्वं तु जानासि एव यदस्मिन् संसारसागरे आशरीरमिदं सर्वं धनं वीचिवच्चञ्चलम् । एकः परोपकार एव अस्मिन् संसारे अनश्वरः, यो युगान्तपर्यन्तं यशः प्रसूते । तदस्माभिरीदृशः कल्पतरुः किमर्थं रक्ष्यते ? यैश्च पूर्वैरयं मम मम इति आग्रहेण रक्षितः, ते इदानीं कुत्र गताः ? तेषु कस्यायम् ? अस्य वा के ते ? तस्मात् परोपकारैकफलसिद्धये त्वदाज्ञया इमं कल्पतरुमाराधयामि" इति ।

अथ पित्रा तथा इत्यभ्यनुज्ञातः स जीमूतवाहनः कल्पतरुमुपगम्य उवाच, "देव ! त्वया अस्मत्पूर्वेषामभीष्टाः कामाः पूरिताः, तन्ममैकं कामं पूरय । यथा पृथिवीमदरिद्रां पश्यामि तथा करोतु देव' इति । एवंवादिनि जीमूतवाहने 'त्यक्तस्त्वया एषोऽहं यतोऽस्मि' इति वाक् तस्मात्तरोरुदभूत् ।

क्षणेन च कल्पतरुर्दिवं समुत्पत्य भुवि तथा वसूनि अवर्षद्यथा न कोऽपि दुर्गत आसीत् । ततस्तस्य जीमूतवाहनस्य सर्वजीवानुकम्पया सर्वत्र यशः प्रथितम् ।

(पाठोऽयं वेतालपञ्चविंशतिरिति प्रसिद्धकथासङ्ग्रहात् सम्पादनं कृत्वा सङ्गृहीतोऽस्ति ।)

**(क) रिक्तस्थानं पूरयत**

(अ) अस्मिन्ननुकूले स्थिते ....... न शक्नुयात् ।

(आ) इदं सर्वं धनं ........ चञ्चलमस्ति ।

(इ) यथा पृथिवीम्.........................तथा करोतु देव !

(ई) ........... कल्पतरुर्दिवं समुत्पत्य भुवि तथा वसूनि अवर्षयत् ।

(उ) जीमूतवाहनस्य .................. सर्वत्र ............. प्रथितम् ।

**(ख) सङ्क्षेपेण उत्तरयत**

(अ) जीमूतवाहनः कीदृशः समभवत् ?

(आ) कल्पतरुं प्राप्य पूर्वजैः किं प्राप्तम् ?

(इ) संसारसागरे को नश्वरः कश्चानश्वरः ?

(ई) जीमूतवाहनः किमर्थं कल्पतरुमाराध्नोत् ?

**(ग) किमर्थं परोपकारः कर्तव्यः ? कथाधारेणानुच्छेदमेकं रचयत ।**

## लेखनम्

### १. अधस्तनानि पदानि शुद्धतया अभ्यासपुस्तिकायां लिखत

लोचनग्राहिणी, अक्षररूपसम्पन्ना, किंशुकः, किंकर्तव्यविमूढः, व्याघ्रऋक्षकथाम्, विश्वासघ्नः, परिवीक्ष्य, भग्नहृदयः, मनश्चित्रलेखनधुरन्धरः, युगान्तः, नृपेणाहूता, श्रुत्वा, द्विजातिभ्यः, वृत्तान्तम् ।

### २. अधस्तनेभ्यः पदेभ्योऽशुद्धीर्निराकृत्य शुद्धानि पदानि लिखत

कलारशिकः, पुत्रिदुखभयात्, बिध्याव्यसनीनः, एकृत्, तीलकपरिक्षणाय, निर्पादेशम्, अछेतरुपसम्पन्ना, जराबसात्, सन्जाता, ऋक्षेनोक्तम्, विर्तान्तम् ।

### ३. पर्यायान् लिखत

वृत्तान्तम्, पुत्री, राजा, चरणौ, महारण्ये, स्वजनः, वनम्, मित्रद्रोही, नृशंसः, व्याघ्रात्, जागृहि ।

### ४. प्रतिपदं सार्थकं वाक्यमेकं रचयत

एकदा, यथायोग्यम्, उवाच, प्राप्तविद्या, किंकर्तव्यविमूढः, भग्नहृदयः, भीतः, एकत्र, निरामयम्, विश्वासघ्नः, यवनिका, गुरुशुश्रूषा ।

५. **पाठस्य द्वितीयानुच्छेदस्य श्रुतलेखनं कुरुत ।**

६. **पाठस्य श्लोकान् पठित्वा विश्वासघातविषयं दशभिर्वाक्यैर्वर्णयत ।**

७. **कस्य कथनमिति लिखत**

(क) कथमाकरणं विना गम्यते ?

(ख) मम गृहे युवत्येकाऽऽयातास्ति सा भवन्तं निरामयं करिष्यति ।

(ग) अमुं युगान्तेऽपि ते नार्पयिष्यामि ।

(घ) आवामेकत्र वनवासिनौ ।

(ङ) रूपयौवनसम्पन्ना विशालकुलसम्भवाः । विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ।

(च) तिलकमत्र कुत आयातम् ?

(छ) स्वस्थीभूय निद्रां कुरु ।

(ज) अन्यथा वनात् कथं यास्यसि ?

(झ) नृपसभायां का वार्ता ?

(ञ) परमसौ मां याचिष्यति ।

(ट) जरावशात् कम्पमानहस्ताद् विन्दुरतप्तत् ।

८. **अधस्तनान् श्लोकान् पठित्वा मित्रविषये दश वाक्यानि लिखत**

शोकारातिभयत्राणं प्रीतिविश्रम्भभाजनम् ।
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम् ॥
स्वभावजं तु यन्मित्रं भाग्येनैवाभिजायते ।
तदकृत्रिमसौहार्दमापत्स्वपि न मुञ्चति ॥
परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखम् ॥
आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम् ।

९. **पाठाधारेण सन्मित्र-दुर्मित्रयोः पार्थक्यं प्रदर्शयत ।**

## १०. पाठमाधृत्य अतिसङ्क्षेपेण उत्तरं लिखत

(क) सुबाहुर्नृपः कीदृश आसीत् ?

(ख) राजकुमारी कथं प्राप्तविद्या जाता ?

(ग) ऋक्षनृपयोर्मित्रता कथं सम्भूता ?

(घ) कर्मकरा गुरुं किं कृतवन्तः ?

(ङ) राजा चिरकालं पुत्रीं किमर्थं नाध्यापयत् ?

(च) व्याघ्रः किमर्थं वृक्षमूले एव स्थितः ?

(छ) व्याघ्रो राजानं किमकथयत् ?

(ज) ऋक्षः किमर्थं राजानं शशाप ?

(झ) राज्ञो जल्पनं कथं पलायितम् ?

## ११. पाठमाधृत्य रिक्तस्थानं पूरयत

(क) आसीदेका श्रीमत्यभिधाना पुत्री ............ परिपूरयन्ती ।

(ख) रूपयौवनसम्पन्ना ........................................।

..................................... हंसमध्ये बको यथा ॥

(ग) मन्त्रिपरामर्शानुसारेण कर्मकराः ................. राज्ञे समर्पितवन्तः ।

(घ) तदानीमेव......................ऋक्षो नृपसम्मुखे समायातः ।

(ङ) असौ मलिनोऽस्ति, प्रातस्त्वां ..................... खादयिष्यति ॥

(च) जानामि तव वृत्तान्तं...............................................।

(छ) ....................................सुप्त्वोत्थित इव जातः ।

## १२. सङ्क्षेपेण उत्तरयत

(क) विश्वासघातकानां कीदृशी दशा भवति ?

(ख) राजा कथं शापान्मुक्तः ?

(ग) कथामाधृत्य गुरोश्चरित्रचित्रणं कुरुत ।

(घ) गुरुः किमर्थं दण्डितः ?

(ङ) कथायाः कस्य पात्रस्य भूमिका उचिता, कस्य च न ?

१३. **आदर्शमैत्री कीदृशी भवेत् ? कथामाधृत्य वर्णयत ।**

१४. **अधस्तनं नाट्यांशं पठित्वा तस्याधःस्थितानां प्रश्नानामुत्तराणि दत्त**

(नाटकस्य अस्मिन् भागे चन्दनदासः स्वसुहृदर्थं प्राणोत्सर्गं कर्तुं प्रयतते । अत्र कथानके नन्दवंशस्य विनाशानन्तरं तस्य हितैषिणां बन्धनक्रमे चाणक्येन चन्दनदासः सम्प्राप्तः । तयोरेव वार्तालापः ।)

**चाणक्यः** – वत्स ! मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि ।

**शिष्यः** – तथेति (निष्क्रम्य चन्दनदासेन सह प्रविश्य) इत इतः श्रेष्ठिन् ! (उभौ परिक्रामतः)

**शिष्यः** – (उपसृत्य) उपाध्याय ! अयं श्रेष्ठी चन्दनदासः ।

**चन्दनदासः** - जयत्वार्यः ।

**चाणक्यः** – श्रेष्ठिन्, स्वागतं ते । अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः ?

**चन्दनदासः** – (आत्मागतम्) अत्यादरः शङ्कनीयः । (प्रकाशम्) अथ किम् ? आर्यस्य प्रसादेन अखण्डिता मे वणिज्या ।

**चाणक्यः** – भो श्रेष्ठिन् ! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः ।

**चन्दनदासः**– आज्ञापयतु आर्यः, किं कियच्च अस्मज्जन आदिष्यते इति ।

**चाणक्यः** – भो श्रेष्ठिन् ! चन्द्रगुप्तराज्यमिदं न नन्दराज्यम् । नन्दस्यैव अर्थसम्बन्धः प्रीतिमुत्पादयति । चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव ।

**चन्दनदासः** – (सहर्षम्) आर्य ! अनुगृहीतोऽस्मि ।

**चाणक्यः** – भो श्रेष्ठिन् ! स चापरिक्लेशः कथमाविर्भवति इति ननु भवता प्रष्टव्या नः ।

**चन्दनदासः** – आज्ञापयतु आर्यः ।

**चाणक्यः** – राजनि अविरुद्धवृत्तिर्भव ।

**चन्दनदासः** – आर्य ! कः पुनरधन्यो राज्ञो विरुद्ध इति आर्येणावगम्यते ?

**चाणक्यः** – भवान् एव तावत् प्रथमम् ।

**चन्दनदासः** – (कर्णौ पिधाय) शान्तं पापम्, शान्तं पापम् ! तृणानामग्निना सहः कीदृशो विरोधः ?

**चाणक्यः** – अयमीदृशो विरोधो यत् त्वमद्यापि राजापथ्यकारिणोऽमात्यराक्षसस्य गृहजनं स्वगृहे रक्षसि ।

**चन्दनदासः –** आर्य ! अलीकमेतत् । केनाप्यनार्येण आर्याय निवेदितम् ।

**चाणक्यः –** भो श्रेष्ठिन् ! अलमाशङ्कया । भीताः पूर्वराजपुरुषाः पौराणामिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति । ततस्तत्प्रच्छादनं दोषमुत्पादयति ।

**चन्दनदासः –** एवं नु इदम् । तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजन इति ।

**चाणक्यः –** पूर्वमनृतमिदानीमासीदिति परस्परविरुद्धे वचने ।

**चन्दनदासः –** आर्य ! तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजन इति ।

**चाणक्यः –** अथेदानीं क्व गतः ?

**चन्दनदासः –** न जानामि ।

**चाणक्यः –** कथं न ज्ञायते नाम ? भो श्रेष्ठिन् ! शिरसि भयम्, अतिदूरं तत्प्रतिकारः ।

**चन्दनदासः –** आर्य ! किं मे भयं दर्शयसि ? सन्तमपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि, किं पुनरसन्तम् ?

**चाणक्यः –** चन्दनदास ! एवं ते निश्चयः ?

**चन्दनदासः –** बाढम्, एवं मे निश्चयः ।

**चाणक्यः –** (स्वगतम्) साधु ! चन्दनदास साधु !

सुलभेष्वर्थलाभेषु परसंवेदने जने ।
क इदं दुष्करं कुर्यादिदानीं शिविना विना ॥

**(क) एकपदेन उत्तरं लिखत**

(अ) चन्दनदासः कः ?

(आ) चन्दनदासस्य वणिज्या कीदृशी आसीत् ?

(इ) चाणक्यः कं द्रष्टुमिच्छति ?

(ई) कः शङ्कनीयो भवति ?

(उ) किं दोषमुत्पादयति ?

**(ख) सङ्क्षेपेण उत्तरयत**

(अ) चन्दनदासो गृहे किं रक्षति ?

(आ) तृणानां केन सह विरोधः ?

(इ) चन्दनदासस्य गृहे अमात्यराक्षसस्य गृहजन आसीत् न वा ?

(ई) किमर्थं चन्दनदासस्य तुलना शिविना सह कृता ?

(उ) इदानीं तत् कस्य राज्यम् ?

## सर्जनात्मकोऽभ्यासः

१. **स्वीयानुभूतिमाधृत्य सन्मित्रदुर्मित्रयोर्लक्षणे प्रतिपाद्य तयोः परिचायकानां गुणानां सूचीं निर्मात ।**

२. **सद्गुरोर्महत्त्वं वर्णयित्वा लघुनिबन्धमेकं रचयत ।**

# महर्षिः कणादः

पौरस्त्या संस्कृतिर्महर्षीणां प्रेरकैर्जीवनचरितैः पूज्यैर्विचारैश्चाढ्यतरा वर्तते । मानवानां कल्याणकामनयाऽनेके महर्षयस्तपोबलेन सम्प्राप्तानि ज्ञानानि ग्रन्थरूपेण प्रास्तुवन्, येषामध्ययनेन, चिन्तनेन, मननेन च वयं जीवानां जगतां च विषये ज्ञातुं पारयामहे । संसारस्य सृष्टिप्रक्रियायाः, कारणस्य, व्यवस्थायाः, विनाशस्य वा जिज्ञासयाऽनुसन्धानाय साधनायै च तत्परा महर्षयो ज्ञानाय जीवनं समर्प्यानेकान् सिद्धान्तान् प्रतिपादयामासुः । त एव सिद्धान्ता दर्शनरूपेण जगति प्रसिद्धाः सन्ति । पौरस्त्यवाङ्मयेऽनेकानि दर्शनानि प्रसिद्धानि सन्ति । तेष्वन्यतमं खलु वैशेषिकं दर्शनम् । 'काणाद' इत्यपराभिधानेन प्रसिद्धस्यास्य दर्शनस्य प्रणेता महर्षिः कणादो विद्याव्यसनिनां विदुषां पूजनीयः, जिज्ञासूनां प्रेरणास्रोतोभूतश्च विद्यते ।

महर्षिः कणादः कदा जनिं लेभे इति न शक्यते निश्चयेन वक्तुम्, तथापि विविधानां ग्रन्थानां पर्यालोचनेन विद्वांस एतस्य जन्मन विषयेऽनुमानं कुर्वन्ति । कणादप्रणीतानां वैशेषिकसूत्राणां गौतमप्रणीतानां न्यायसूत्राणां शैलीं पर्यालोच्य नारायणमिश्रादयो विद्वांसो न्यायसूत्रकाराद् गौतमादपि प्राचीनमेनं मन्वते । किन्तु भीमाचार्यादयो विद्वांसो गौतमादर्वाचीनं मन्यन्ते । कौटिल्यस्यार्थशास्त्रमीशापूर्वद्वितीयाब्दशतके रचितं मन्यते तत्र अन्येषामुल्लेखो दृश्यते, किन्तु वैशेषिकस्योल्लेखो नास्ति । ईशाब्दस्य प्रथमशतके रचिते चरकग्रन्थे चास्य दर्शनस्योल्लेखो दृश्यते । अतः कौटिल्यचरकयोर्मध्यवर्तिनं कणादं मन्यन्ते केचन पाश्चात्त्या विद्वांसः । किन्तु कौटिल्यग्रन्थे 'आन्वीक्षिकी' इति पदेन समानतन्त्रयोर्न्यायवैशेषिकयोर्ग्रहणं विहितमिति तेषां मतं प्रामाण्यं नैव धत्ते इति विद्वांसः पर्यालोचयन्ति । अन्येषु दर्शनेष्विव एतस्य दर्शनेष्वन्येषां दार्शनिकविचारणां खण्डनं नैवावलोक्यते, तस्माद् काणादं दर्शनं सर्वेभ्यो दर्शनेभ्यः प्राचीनमिति विदुषां विचारो दृश्यते । चीनदेशस्य प्राचीनेषु ग्रन्थेषु वैशेषिकदर्शनम् 'उलूक'नाम्ना केनचन विदुषा प्रणीतम्, यस्य समयो बुद्धस्य समयादष्टशतवर्षेभ्यः पूर्वमासीदिति उल्लेखो लभ्यते । जनश्रुत्यामाधारितस्यास्य कथनस्य प्रामाणिकता नैव निश्चेतुं शक्या, तथापि वैशेषिकं दर्शनं प्राचीनतरमिति सङ्केतस्तु लभ्यत एव । मतैक्यस्याभावेऽपि ईशापूर्वं पञ्चमं षष्ठं वाऽब्दशतकं कणादस्य समय इति बहुशो विदुषां मतं दृश्यते ।

अस्तु तावज्जन्मनः, समयस्य वा विवादः, महर्षिः कणादः पूजनीयो मनीषी, विचारकश्चासीदित्यत्र कोऽपि संशयो नास्ति । वैशेषिकदर्शने प्रतिपादितानां सिद्धान्तानां वेदेषूपनिषत्सु पुराणादिषु चोल्लेखो लभ्यते । अत एवैतादृशानां विचाराणामारम्भो वैदिककालादेवाभवदिति विश्वासः कर्तुं शक्यते, तथापि सूत्राणां रचनया पृथग्दर्शनरूपेण वैशेषिकस्य स्थापना कणादमुनिना एव विहिता । महर्षिः कणादः कणभुक्, कणभक्षः, कणव्रतः, योगी, उलूकः, औलूकः, औलूक्यः, काश्यपः, पैलुकः इत्यादिभिर्नामान्तरैरपि प्रसिद्धो वर्तते । जन्मसमय इव एतस्य जन्मस्थानमपि निश्चितं नास्ति । केचन विद्वांसो मिथिलादेशवास्तव्यमेनं मन्वते चेत् केचन अध्येतारो महर्षिः कणादो गुर्जरदेशस्य प्रभासक्षेत्रे जनिं लेभ इति विश्वसन्ति ।

वैशेषिकसूत्रकारस्य 'कणादः' इति नामधेयं किमर्थं जातमित्यत्रापि विदुषां मतान्तराणि विलोक्यन्ते। केषाञ्चनानुसारेणायं महर्षिरादिवसं तपश्चर्यया व्यतीत्य रात्रौ उञ्छवृत्त्या कणान् भक्षयित्वा जीवनं निर्वाहयति स्म। यथा कपोताः खलेषु गत्त्वा कणान् भक्षयन्ति तथैवासौ महर्षिरपि करोति स्म इत्येतस्य जीवनवृत्तिः कापोती वृत्तिरिति प्रसिद्धा बभूव। 'कणान् अत्ति' इत्यर्थेऽस्य नामधेयं 'कणाद' इति जातमिति तेषां मतं विलोक्यते। अन्ये च विद्वांसः कणरूपाणां परमाणूनां चिन्तनेन 'कणरूपान् परमाणून् अत्ति सिद्धान्तत्वेन आत्मसात् करोति' इत्यर्थेऽस्य कणादनामधेयं जातमिति मन्वते। आदिवसं तपश्चर्यां विधाय रात्रौ आहारार्थं गच्छति स्मेति उलूकवृत्त्या जीवननिर्वाहादेतस्य 'उलूक' इत्यपरं नामधेयं बभूवेति जनश्रुतिः प्रसिद्धा वर्तते। एतस्य पितुर्नाम उलूक आसीदतस्तत्पुत्ररूपेण एष 'औलूक्य' इत्यपरे विद्वांसो विचारयन्ति। किन्तु 'औलूक्य' इति न सूत्रकारस्य नामधेयं किन्त्वेतस्य दर्शनस्यैवेति बहवो मन्यन्ते। तपश्चर्यायां स्थिताय मुनये कणादाय भगवान् उलूकरूपेण षट् पदार्थानुपादिशत्, अत एवास्य दर्शनस्यैव नाम औलूक्यदर्शनमिति केचन मन्वते। परमाणवः 'पिलु'शब्देनापि व्यवह्रियन्ते, वैशेषिके च दर्शने परमाणूनां चिन्तनं विशेषतो लभ्यत इति परमाणूनां चिन्तक एष महर्षिः 'पैलुक' इति नाम्नापि प्रसिद्धिं लेभे। कश्यपकुले समुत्पन्नोऽसौ कणादः 'काश्यप' इत्यपरेण नाम्नापि प्रसिद्धो दृश्यते।

कणादः संसारस्य सृष्टिः परमाणूनां योगैर्भवतीति विश्वसिति स्म। परमाणवो नित्या भवन्ति। ईश्वरस्येच्छया परमाणुषु क्रिया उत्पद्यते, तेन द्वयोः परमाण्वोर्मेलनेन द्व्यणुकमुत्पद्यते, त्रयाणां द्व्यणुकानां मेलनेन त्रसरेणुरुत्पद्यते, त्रसरेणूनां मेलनेन च क्रमशो महत्परिमाणानि पृथिव्यादिमहाभूतान्युत्पद्यन्त इति कणादस्य मतमस्ति। कणादस्यैतन्मतम् 'आरम्भवादः' इति दार्शनिकजगति प्रसिद्धं वर्तते। महर्षिः कणादः पदार्थचिन्तकः, परमाणुचिन्तकश्च मुनिरासीत्। एतस्य दर्शनं भौतिकं वैज्ञानिकं च प्राचीनं दर्शनं वर्तते। स्थूलदृष्ट्या समानाकाराण्यपि सर्वाणि वस्तूनि परस्परं भिन्नानि सन्ति। भिन्नतायै च 'विशेष'नामकः पदार्थः कारणमिति कणादः प्रतिपादितवान्। कणादस्य एतानि मतानि वैशेषिकसूत्रे ग्रथितानि सन्ति। 'रावणभाष्यम्, भारद्वाजवृत्ति'श्चेति द्वे व्याख्यानग्रन्थेऽस्यास्तामिति ग्रन्थेषूपलभ्यते, किन्त्वधुना नैवोपलभ्येते। प्रशस्तपादाचार्यस्य पदार्थधर्मसङ्ग्रहे, व्योमशिवाचार्यस्य व्योमवत्यां टीकायाम्, उदयनाचार्यस्य किरणावल्यां च कणादस्य मतानि विशेषतो व्याख्यातान्यवलोक्यन्ते।

विशेषनामकस्य पदार्थस्य कल्पनया एतद् दर्शनं वैशेषिकदर्शनमिति प्रसिद्धं वर्तते। अन्येषु दर्शनेषु विशेषनामकस्य पदार्थस्य तथा व्याख्यानं न लभ्यते, अतो विशेषपदार्थो वैशेषिकदर्शनस्य वैशिष्ट्यरूपेण मन्यते। वैशेषिकसूत्राणि दशस्वध्यायेषु विभक्तानि वर्तन्ते, यत्र जीवस्य जगतश्च विषयेऽनेके विचाराः प्रतिपादिताः सन्ति। वैशेषिकं दर्शनं द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायाभावरूपान् सप्त पदार्थान् स्वीकरोति। तेषां चिन्तनेन, साधर्म्यवैधर्म्यादीनां सम्यग् ज्ञानेन च मनुष्योऽभ्युदयं निःश्रेयसं च लभत इति वैशेषिकसूत्रकारः कणादः प्रतिपादयामास।

आधुनिका डाल्टनादयः परमाणुचिन्तकाः परमाणूनां संयोगैर्जगतः सृष्टिर्भवतीति मन्वते। कणादः बहुभ्योऽब्दशतकेभ्यः पूर्वमेव परमाणूनां योगैर्जगतः सृष्टिर्भवतीति मतमुपस्थापितवान्। आधुनिकं विज्ञानं

काणादेन दर्शनेन सह समतां धत्ते । कणाद एव अनुसन्धानसिद्धः प्रथमः परमाणुचिन्तक आसीदिति वक्तुं शक्यते । न्युटनप्रतिपादितो गतिसिद्धान्तः, गुरुत्वसिद्धान्तश्च वैशेषिकसूत्रे पूर्वमेव समुपलभ्येते । न्युटनः स्वस्यानुसन्धानेन यं गतिसिद्धान्तं प्रतिपादयामास, तस्योल्लेखो वेगशब्देन वैशेषिकसूत्रे पूर्वमेव विहित आसीत् । गुरुत्वबलेनैव कश्चन पदार्थः पततीति सिद्धान्तोऽपि वैशेषिकदर्शने विलोक्यते । अत एव 'कणादः' वैज्ञानिकानां विचाराणां प्रणेता आसीदिति वक्तुं शक्यते । विश्वविख्यात इतिहासज्ञः टी.एन् कोलेरबुकमहाभागोऽपि लिखति यद्- आधुनिकानां वैज्ञानिकानामपेक्षया कणादादयः पौरस्त्या महर्षयो विश्वप्रसिद्धा आसन् ।

आधुनिके समाजे जना धनानां सङ्ग्रहाय विशेषतः प्रवृत्ता दृश्यन्ते । आहारस्तु केवलं जीवनस्य निर्वाहाय एवास्ति, उञ्छवृत्त्या कणानां भक्षणेनापि विश्वप्रसिद्धं परमाणुसिद्धान्तं वैशेषिकदर्शनरूपेण कणादः प्रतिपादितवान् । एतस्य जीवनं विलोक्य वयमप्यनुसन्धाने प्रेरणां लभेमहि । साम्प्रतं विज्ञानस्याध्ययनाय वयं केवलं पाश्चात्त्यानां विदुषां पुस्तकान्येवाधीयामहे, किन्त्वस्माकमेव पौरस्त्यवाङ्मये जगतः सृष्टेर्विषये गभीरा विचारा विलोक्यन्ते, तेषामप्यध्ययनाय अस्माभिः प्रवृत्तैर्भाव्यम् । पौरस्त्यवाङ्मयानां पर्यालोचनेनैवास्माकं ज्ञानक्षेत्रं विस्तीर्णं भविष्यतीति सत्यमस्माभिरनुभाव्यम् । संस्कृतवाङ्मये शब्दचिन्तने व्याकरणसूत्रकारस्य पाणिनेर्यथा महत्त्वं वर्तते, तथैव अर्थचिन्तने कणादस्य महत्त्वं वर्तते । व्याकरणं विना यथा भाषायां शास्त्रेषु च गतिरव्याहता नैव भवति, तथैव वैशेषिकदर्शनस्य ज्ञानं विनाऽन्येषां दर्शनानां ज्ञाने प्रवृत्तिरव्याहता न भवतीति विद्वांसो मन्यन्ते । अत एव 'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्' इत्युक्तिः प्रसिद्धा वर्तते ।

महर्षेः कणादस्य मृत्योर्विषये जनश्रुतिरेका प्रसिद्धाऽस्ति । मृत्योः समये परितः स्थिताः शिष्या तमन्वरुन्धन्, 'भवान् सम्प्रति मृत्योर्मुखे वर्तते, अधुना परमात्मनो नाम उच्चारयतु' इति । किन्तु सिद्धान्तनिष्ठः कणादोऽवदत्, 'पीलवः, पीलवः, पीलवः (परमाणवः, परमाणवः, परमाणवः)' इति । एतावता दृढया तपश्चर्यया, स्वसिद्धान्तनिष्ठया च सर्वान् शिष्यान् प्रेरयित्वा कणादः पञ्चत्वं गतवान् । शरीरेण पञ्चमहाभूतेषु विलीनोऽपि कणादः स्वीयसूत्रेषु स्वकीर्तिकलेवरं विन्यस्य गतवान् । कणादस्य विषये प्रसिद्धाः किंवदन्तीः, समुपलब्धं जीवनचरितम्, तेन प्रणीतं वैशेषिकदर्शनञ्चाधीत्य वयमधुनापि लाभान्विताः **स्मः** । स सर्वेषां सर्वदा पूजनीयो वर्तते ।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| आढ्यतरा - | समृद्ध | प्रास्तुवन् - | प्रस्तुत गरे |
| अभिधानेन - | नामले | प्रणेता - | आरम्भकर्ता |
| पर्यालोचनेन - | निरीक्षण गरेर | अर्वाचीनं - | पछिको |
| गुर्जरदेशस्य - | गुजरात देशको | उञ्छवृङ्क्षया - | सिला खोजेर |
| विभक्तानि - | विभाजित | निःश्रेयसम् - | मुक्ति |
| उपस्थापितवान् - | व्यक्त गरे | ग्रथितानि - | संरचित |
| विश्वप्रसिद्धा - | विश्वप्रसिद्ध | लभेमहि - | पाउँछौँ |
| अनुभाव्यम् - | महसुस गर्नुपर्छ | अन्वरुन्धन् - | अनुरोध गरे |

## अभ्यासः

### श्रवणं भाषणञ्च

१. **पाठस्यानुच्छेदानेकैकशः पठन्तु, पठनक्रमे जायमानास्त्रुटीश्च श्रोतारो निराकुर्वन्तु ।**

२. **ह्रस्वदीर्घादिमात्राविचारपुरःसरमधस्तनानि पदान्युच्चारयन्तु**

पौरस्त्या, सृष्टिप्रक्रियायाः, प्रेरणास्रोतोभूतश्च, ईशापूर्वद्वितीयाब्दशतके, आन्वीक्षिकी, औलूक्यः, किन्त्वेतस्य, त्रसरेणुरुत्पद्यते, साधर्म्यवैधर्म्यादीनाम्, पाश्चात्त्यानाम्, वैशेषिकदर्शनञ्चाधीत्य

३. **उदाहरणानुसारेण पदानि विच्छिद्य पठत**

**यथा–** प्रेरकैर्जीवनचरितैः = प्रेरकैः जीवनचरितैः

| | |
|---|---|
| पौरस्त्यवाङ्मयेऽनेकानि = | दर्शनस्योल्लेखः = |
| समानतन्त्रयोर्न्यायवैशेषिकयोर्ग्रहणम् = | नैवावलोक्यते = |
| वेदेषूपनिषत्सु = | तथैवासौ = |
| किन्त्वेतस्य = | व्याख्यातान्यवलोक्यन्ते = |
| वयमप्यनुसन्धाने = | पर्यालोचनेनैवास्माकम् = |

४. **पाठात् कानिचन पञ्च कृदन्तानि पदानि अन्विष्य वदत ।**

५. **अधस्तनेभ्यो वाक्येभ्यः कर्तृपदं क्रियापदं च निश्चित्य वदत**

(क) पौरस्त्यवाङ्मयेऽनेकानि दर्शनानि प्रसिद्धानि सन्ति ।

(ख) विद्वांस एतस्य जन्मन विषयेऽनुमानं कुर्वन्ति ।

(ग) केचनाध्येतारो महर्षिः कणादः गुर्जरदेशस्य प्रभासक्षेत्रे जनिं लेभ इति विश्वसन्ति ।

(घ) कश्यपकुले समुत्पन्नोऽसौ कणादः 'काश्यप' इत्यपरेण नाम्नापि प्रसिद्धो दृश्यते ।

(ङ) न्युटनः स्वस्यानुसन्धानेन गतिसिद्धान्तं प्रतिपादयामास ।

६. **पाठात् पञ्च अच्सन्धियुतानि पञ्च हल्सन्धियुतानि च पदानि अन्विष्य शिक्षकं श्रावयत ।**

### ७. अधस्तनपदानि प्रयुज्य एकैकं वाक्यं कक्षायां श्रावयत

तत्पराः, प्रणेता, विद्वांसः, प्राचीनम्, लभ्यते, वेदेषु, नामधेयम्, चिन्तनेन, मन्यन्ते, लेभे, मतानि, विशेषतः, इतिहासज्ञः, महत्त्वम्, विन्यस्य

### ८. पाठाधारेण अधस्तनानां प्रश्नानां सङ्क्षेपेणोत्तराणि वदत

(क) अयं पाठः कस्मिन् विषये रचितो दृश्यते ?

(ख) कणादेन प्रतिपादितस्य दर्शनस्य किं नामधेयम् ?

(ग) कणादस्य कानि नामान्तराणि ?

(घ) चीनदेशे कीदृशी किंवदन्ती प्रसिद्धा वर्तते ?

(ङ) कणादस्य समयस्य विषये निश्चयो वर्तते न वा ?

(च) पदार्थधर्मसङ्ग्रहः कस्य ग्रन्थः ?

(छ) आधुनिकः परमाणुचिन्तकः कः ?

(ज) गुरुत्वसिद्धान्तस्य प्रतिपादकस्य आधुनिकस्य वैज्ञानिकस्य नाम वदत ।

(झ) शब्दचिन्तने कस्य नाम सादरं गृह्यते ?

(ञ) कणादो मृत्युसमये किमुच्चारयन् प्राणान् मुमोच ।

### ९. सरलसंस्कृतभाषया कस्यापि जीवनचरितं प्रेरकप्रसङ्गं वा कक्षायां श्रावयत ।

### १०. अधस्तनमनुच्छेदं पठित्वा तदनुवर्तिप्रश्नानुत्तरयत

**दर्शनपरिचयः**

सामान्यतो दर्शनशब्देन वयं दृष्टिः, दर्शनस्य करणं वेत्यर्थद्वयं जानीमः । किन्तु दर्शनस्य पारिभाषिकोऽर्थः व्यापको वर्तते ।

सम्पूर्णायाः सृष्टेः कारणं किम् ? जगतः सृष्टिप्रक्रिया का ? कथमेतस्य जगतो व्यवस्था प्रचलति ? कथमस्य विलयो जायते ? मनुष्यस्य पुनर्जन्म सम्भवति न वा ? जीवानामस्तित्वं किम् ? किं मानवजीवनस्य प्रयोजनम् ? इत्यादिषु विषयेषु चिन्तनं दर्शने भवति । साररूपेण वक्तुं शक्यते यद्, जीवनस्य जगतश्च विषये विधीयमानं व्यापकं चिन्तनमेव दर्शनं वर्तते इति । अत एवोच्यते-

**सम्पूर्णायाः दृश्यसृष्टेर्यद् भवेन्मूलकारणम् ।**
**तज्जिज्ञासा तदर्थञ्च प्रयत्नो दर्शनं स्मृतम् ॥ इति ।**

एतादृशं चिन्तनं पौरस्त्यपरम्परायां पाश्चात्त्यपरम्परायां च समानरूपेण प्रचलितं वर्तते । कपिलस्य साङ्ख्यदर्शनम्, पतञ्जलेर्योगदर्शनम्, व्यासस्य वेदान्तदर्शनम्, जैमिनेर्मीमांसादर्शनम्, गौतमस्य न्यायदर्शनम्, कणादस्य वैशेषिकदर्शनम्, बुद्धस्य बौद्धदर्शनं चेत्यादीनि दर्शनानि पौरस्त्यपरम्परायां प्रचलितानि सन्ति । पाश्चात्त्यचिन्तनपरम्परायां च सुकरात-प्लेटो-अरस्तु-हिगेल-सार्त्रादीनां दर्शनानि प्रसिद्धानि सन्ति । एतानि सर्वाण्यपि दर्शनानि जीवस्य, जगतः, मानवजीवनस्य च विषये स्वस्य मतानि प्रकटयन्ति ।

पौरस्त्यदर्शनानि आस्तिकानि नास्तिकानि चेति द्विविधानि सन्ति । वेदस्य प्रमाण्यं यानि स्वीकुर्वन्ति तान्यास्तिकानि, यानि च नैव स्वीकुर्वन्ति तानि नास्तिकानि कथ्यन्ते । आस्तिकदर्शनरूपेण न्याय-वैशेषिक-साङ्ख्य-योग-मीमांसा-वेदान्तदर्शनानि प्रसिद्धानि वर्तन्ते । बौद्ध-जैन-चार्वाकाणि च दर्शनानि नास्तिकदर्शनरूपेण प्रसिद्धानि सन्ति ।

**(क) परस्परं मेलयत**

| प्रणेतारः | दर्शनानि |
|---|---|
| व्यासः | मीमांसादर्शनम् |
| पतञ्जलिः | न्यायदर्शनम् |
| बुद्धः | वेदान्तदर्शनम् |
| कणादः | साङ्ख्यदर्शनम् |
| गौतमः | योगदर्शनम् |
| कपिलः | बौद्धदर्शनम् |
| जैमिनिः | वैशेषिकदर्शनम् |

**(ख) एकवाक्येन उत्तरयत**

(अ) दर्शनस्य सामान्यमर्थद्वयं किम् ?

(आ) दर्शनं कीदृशं चिन्तनं करोति ?

(इ) किं दर्शनस्य परम्परा पौरस्त्या एव वर्तते ?

(ई) दर्शनानि कस्मिन् विषये मतानि प्रकटयन्ति ?

(उ) पौरस्त्यदर्शनानि कतिविधानि ?

(ऊ) आस्तिकदर्शनानि कस्य प्रामाण्यं स्वीकुर्वन्ति ?

**(ग) अनुच्छेदमध्यस्थं श्लोकं सरलगिरा व्याख्याय लिखत ।**

**(घ) अधस्तनानि भाषिककार्याणि कुरुत**

(अ) दर्शनशब्दस्य प्रकृतिप्रत्ययौ विभज्य लिखत ।

(आ) अनुच्छेदतस्तृतीयान्तं पदद्वयमन्विष्य वाक्यान्तरं निर्माय लिखत ।

(इ) अनुच्छेदस्थानि प्रश्नार्थानि वाक्यानि लिखत ।

(ई) अनुच्छेदात् त्रीणि कृदन्तानि पदानि अन्विष्य तेषां विभक्तिं निश्चित्य वदत ।

(उ) पौरस्त्य-पाश्चात्त्यशब्दयोर्व्युत्पत्तिमनुसन्धाय लिखत ।

## पठनम्

**१. समानार्थबोधकपदे मिथो मेलयत**

| | |
|---|---|
| प्रसिद्धाः | अनेकशः |
| प्राचीनम् | अदन्ति |
| सर्वेभ्यः | विख्याताः |
| बहुशः | ईश्वरः |
| जन्मसमयः | सकलेभ्यः |
| भक्षयन्ति | पुराणम् |
| भगवान् | जनिकालः |
| निःश्रेयसम् | अनिरुद्धा |
| इतिहासज्ञः | अगच्छत् |
| अव्याहता | मोक्षः |
| गतवान् | ऐतिह्यविद् |

**२. पाठस्य प्रथमानुच्छेदं पठित्वा तस्य भावं सरलतया कक्षायां श्रावयत ।**

**३. अधस्तनमनुच्छेदं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत**

वैशेषिकसूत्रकारस्य 'कणादः' इति नामधेयं किमर्थं जातमित्यत्रापि विदुषां मतान्तराणि विलोक्यन्ते । केषाञ्चनानुसारेणायं महर्षिरादिवसं तपश्चर्यया व्यतीत्य रात्रौ उञ्छवृत्त्या कणान् भक्षयित्वा जीवनं

निर्वाहयति स्म । यथा कपोताः खलेषु गत्त्वा कणान् भक्षयन्ति तथैवासौ महर्षिरपि करोति स्म इत्येतस्य जीवनवृत्तिः कापोती वृत्तिरिति प्रसिद्धा बभूव । 'कणान् अत्ति' इत्यर्थेऽस्य नामधेयं 'कणाद' इति जातमिति तेषां मतं विलोक्यते । अन्ये च विद्वांसः कणरूपाणां परमाणूनां चिन्तनेन 'कणरूपान् परमाणून् अत्ति सिद्धान्तत्वेन आत्मसात् करोति' इत्यर्थेऽस्य कणादनामधेयं जातमिति मन्वते । आदिवसं तपश्चर्यां विधाय रात्रौ आहारार्थं गच्छति स्मेति उलूकवृत्त्या जीवननिर्वाहादेतस्य 'उलूक' इत्यपरं नामधेयं बभूवेति जनश्रुतिः प्रसिद्धा वर्तते । एतस्य पितुर्नाम उलूक आसीदत तत्पुत्ररूपेण एष 'औलूक्य' इत्यपरे विद्वांसो विचारयन्ति । किन्तु 'औलूक्य' इति न सूत्रकारस्य नामधेयं किन्त्वेतस्य दर्शनस्यैवेति बहवो मन्यन्ते । तपश्चर्यायां स्थिताय मुनये कणादाय भगवान् उलूकरूपेण षट् पदार्थानुपादिशत्, अत एवास्य दर्शनस्यैव नामधेयम् औलूक्यदर्शनम् इति केचन मन्वते । परमाणवः 'पिलु'शब्देनापि व्यवह्रियन्ते, वैशेषिके च दर्शने परमाणूनां चिन्तनं विशेषतो लभ्यते इति परमाणूनां चिन्तक एष महर्षिः 'पैलुक' इति नाम्ना अपि प्रसिद्धिं लेभे । कश्यपकुले समुत्पन्नोऽसौ कणादः 'काश्यप' इत्यपरेण नाम्नापि प्रसिद्धो दृश्यते ।

(क) कस्मिन् विषये विदुषां मतान्तराणि विलोक्यन्ते ?

(ख) 'कापोती' वृत्तिरित्यनेन किं ज्ञायते ?

(ग) कणादस्य 'उलूक' इति नामधेयं किमर्थं जातम् ?

(घ) परमाणवः केन शब्देन व्यवह्रियन्ते ?

(ङ) कणादः कस्मिन् कुले समुत्पन्न आसीत् ?

४. **कणानां भक्षणेनापि कणादो वैशेषिकं दर्शनं प्रणीतवान्, एतच्छ्रुत्वा वयं किमनुभवामः ? विमृशत ।**

५. **अधस्तनानि कथनानि सत्यानि कृत्वा पुनर्लिखत**

(क) काणादं दर्शनं न्यायदर्शननाम्ना जगति प्रसिद्धमस्ति ।

(ख) वैशेषिकदर्शनस्य प्रणेतुर्जन्मसमयो निश्चितो विद्यते ।


(ग) कणादस्य मतं 'विवर्तवादः' इत्यनेन नाम्ना प्रसिद्धं वर्तते ।

(घ) परमाणुषु भिन्नतायै विशेषनामकः पदार्थः करणरूपो नास्ति ।

(ङ) कणादो मरणसमये भगवन्नाम समुच्चारयन् प्राणान् मुमोच ।

६. **परमाणुसिद्धान्तस्य विषये यद् ज्ञातं तत् कक्षायां विमृशत ।**

७. **अधस्तनं चित्रं दृष्ट्वा तस्य वर्णनं कुरुत**




८. **अधो निर्दिष्टा जनाः किं किं कुर्वन्ति ? तेषां चतुर्भिः पञ्चभिर्वा वाक्यै परिचयं दत्त**

**यथा– दार्शनिकाः –** दार्शनिका जीवनस्य जगतश्च विषये चिन्तनं कुर्वन्ति। चिन्तनेन निःसृतं निष्कर्षं प्रस्तूय जनान् बोधयन्ति। ते ज्ञानानुरागिणो भवन्ति। मानवानां कल्याणाय निरन्तरं प्रयतन्ते। दार्शनिकानां सम्प्रदायो विकसितो भवति।

(क) वैज्ञानिकाः
(ख) प्राध्यापकाः
(ग) ज्योतिर्विदः
(घ) चिकित्सकाः
(ङ) पुरातत्त्वविदः
(च) अभिनेतारः
(छ) साहित्यिकाः

९. **अधस्तनं पद्यं पठित्वा केषां दार्शनिकानां मतानि केन नाम्ना व्यवह्रियन्ते ? निश्चयं कुरुत**

आरम्भवादः कणभक्षपक्षः
सङ्घातवादस्तु भदन्तपक्षः।
साङ्ख्यादिवादः परिणामवादः
वेदान्तवादस्तु विवर्तवादः॥

कणादस्य दर्शनं वैशेषिकदर्शनमस्ति। अस्य मतमारम्भवाद उच्यते। बौद्धानां मतं सङ्घातवाद उच्यते। साङ्ख्यदर्शने परिणामवादः स्वीक्रियते। वेदान्त विवर्तवादः स्वीक्रियते।

## १०. अधस्तनमनुच्छेदं पठित्वा निर्दिष्टकार्याणि कुरुत

### डाल्टनः

पाश्चात्त्यपरम्परायां परमाणुसिद्धान्तस्य जनकः जोनडाल्टननामा वैज्ञानिको मन्यते । प्राचीनकालेऽपि ग्रीसदेशस्य मनीषिणो द्रव्यानां निर्माणं कथं भवतीति विषये विमर्शं कुर्वन्ति स्म । केषां तत्त्वानां मेलनेन पदार्थानां निर्माणं भवति ? एतेषां च विभागः कियान् कर्तुं शक्यः ? इत्यस्मिन् विषये चर्चा भवति स्म, किन्तु निष्कर्षो निःसृतो नासीत् ।

डाल्टनः १८०३ तमे ईशवीयाब्दे एतस्यानुसन्धानं विधाय परमाणुसम्बद्धं विचारं प्रस्तुतवान् । तस्यानुसारेण द्रव्याणि अविभाज्यानां सूक्ष्मकणानां मेलनेन निर्मितानि भवन्ति । तादृशाः सूक्ष्मतमाः कणाश्च परमाणव उच्यन्ते । समानधर्माणां परमाणूनां मेलनेन तत्त्वानि निर्मितानि भवन्ति चेद् असमानधर्माणां परमाणूनां मेलनेन यौगिकानि निर्मितानि भवन्ति । एकस्यैव तत्त्वस्य परमाणूनामाकृतिर्द्रव्यमानं च समानं भवति । भिन्नानां द्रव्याणां परमाणूनामाकारो द्रव्यमानं च भिन्नं भवति । परमाणव उत्पादयितुं विनशयितुं च नैव शक्या भवन्ति । डाल्टनस्यानुसारेण परमाणवः एटमनाम्ना सम्बोध्यन्ते । एटमशब्दो ग्रीकशब्दो वर्तते, यस्यार्थो भवति अभेद इति ।

डाल्टनेन औपचारिकी शिक्षा लब्धा नासीत् । स्वाध्ययनेनैव एष एतादृशं गभीरमनुसन्धानं चकार । १७७६ तमे ईशवीयाब्देऽस्य जन्म आङ्गलदेशस्य क्याम्बरल्यान्डनामके स्थाने अभूत् । सामान्यपरिवारे जातोऽप्यसौ स्वीयानुसन्धानेन यशस्वी बभूव । विविधेषु स्थानेषु गत्वा स्वसिद्धान्तविषये व्याख्यां कुर्वन् जीवनं निनाय ।

**(क) निम्नाङ्कितप्रश्नानामेकेन वाक्येन उत्तराणि लिखत**

(अ) पाश्चात्त्यपरम्परायां कः परमाणुसिद्धान्तस्य जनको मन्यते ?

(आ) कुत्रत्या मनीषिणो द्रव्याणां निर्माणविषये विचारयन्ति स्म ?

(इ) डाल्टनस्यानुसारेण द्रव्याणि कथं निर्मितानि भवन्ति ?

(ई) कीदृशानां परमाणूनामाकृतिर्द्रव्यमानं च समानं भवति ?

(उ) एटमशब्दस्य कोऽर्थः ?

**(ख) प्रदत्तस्य पाठस्य मुख्यविषयानाधृत्य सारांशमेकं लिखत ।**

**(ग) अधस्तनानि भाषिककार्याणि कुरुत**

(अ) आत्मनेपदस्य द्वे, परस्मैपदस्य च द्वे तिङन्तपदे विचित्य लिखत ।

(आ) परमाणुशब्दस्य सर्वाणि रूपाणि लिखत ।

(इ) बहुवचनान्तमेकं विशेषणपदमन्विष्य लिखत ।

(ई) 'सूक्ष्मतमाः कणाः परमाणव उच्यन्ते' इत्यस्य कर्तृवाच्ये परिवर्तनं कुरुत ।

## लेखनम्

### १. अधस्तनानां शब्दानां बहुवचनान्तानि रूपाणि लिखत

पौरस्त्या, चिन्तनेन, मन्यते, ग्रन्थे, वैशेषिकदर्शने, मिथिलादेशवास्तव्यम्, प्रसिद्धम्, जगतः, सङ्ग्रहाय

### २. सङ्क्षेपेण उत्तराणि लिखत

(क) पौरस्त्या संस्कृतिः कीदृशी वर्तते ?

(ख) कणादः केषां पूजनीयः ?

(ग) कणादस्य जन्मसमयनिर्धारणाय किं प्रमाणरूपम् ?

(घ) कौटिल्यग्रन्थे 'आन्वीक्षिकी' इति पदेन किं गृह्यते ?

(ङ) वैशेषिकसिद्धान्तानां पूर्वं कुत्र उल्लेखो लभ्यते ?

(च) कणादो जीवननिर्वाहाय किं करोति स्म ?

(छ) कणादस्यानुसारेण संसारस्य सृष्टिः कथं भवति ?

(ज) वैशेषिकदर्शनस्यानुपलब्धे व्याख्यानग्रन्थे के ?

(झ) वैशेषिकसूत्राणि कतिष्वध्यायेषु वर्तन्ते ?

(ञ) किमुच्चारयन् कणादः पञ्चत्वं गतः ?

### ३. अधस्तनानां प्रश्नानां सङ्क्षेपेण उत्तराणि लिखत

(क) दर्शनरूपेण संसारे किं प्रसिद्धिं लभते ?

(ख) कणादस्य जन्मसमयविषये प्राप्तानि मतान्तराणि लिखत ।

(ग) कणादस्यानेकेषु नामसु कारणानि लिखत ।

(घ) वैशषिकदर्शनस्यानुसारेण परमाणुसिद्धान्तं सङ्क्षेपेण वर्णयत ।

(ङ) काणादस्य दर्शनस्य 'वैशेषिकदर्शनम्' इति प्रसिद्धिः कथमभूत् ?

(च) कणादस्य जीवनचर्यया कीदृशी प्रेरणा लभ्यते ?

## ४. अधस्तनानां पदानां प्रयोगद्वारा एकमेकं वाक्यं रचयत

पारयामहे, प्रेरणास्रोतोभूताः, प्राचीनम्, पाश्चात्त्याः, शक्यते, अध्येतारः, मतान्तराणि, उलूकवृत्त्या, परस्परम्, विश्वविख्याताः, अव्याहता, किंवदन्ती ।

## ५. सरलसंस्कृतगिरा भावं विशदीकुरुत

(क) पौरस्त्यवाङ्मयानां पर्यालोचनेनैवास्माकं ज्ञानक्षेत्रं विस्तीर्णं भविष्यतीति सत्यमस्माभिरनुभाव्यम् ।

(ख) काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम् ।

## ६. अधस्तनस्यानुच्छेदस्य एकतृतीयांशेन सारांशं लिखत

कणादः संसारस्य सृष्टिः परमाणूनां योगैर्भवतीति विश्वसिति स्म । परमाणवो नित्या भवन्ति । ईश्वरस्येच्छया परमाणुषु क्रिया उत्पद्यन्ते, तेन द्वयोः परमाण्वोर्मेलनेन द्व्यणुकमुत्पद्यते, त्रयाणां द्व्यणुकानां मेलनेन त्रसरेणुरुत्पद्यते, त्रसरेणूनां मेलनेन च क्रमशो महत्परिमाणानि पृथिव्यादिमहाभूतान्युत्पद्यन्ते इति कणादस्य मतमस्ति । कणादस्यैतन्मतम् 'आरम्भवादः' इति दार्शनिकजगति प्रसिद्धं वर्तते । महर्षिः कणादः पदार्थचिन्तकः, परमाणुचिन्तकश्च मुनिरासीत् । एतस्य दर्शनं भौतिकं वैज्ञानिकं च प्राचीनं दर्शनं वर्तते । स्थूलदृष्ट्या समानाकाराण्यपि सर्वाणि वस्तूनि परस्परं भिन्नानि सन्ति । भिन्नतायै च 'विशेष'नामकः पदार्थः कारणमिति कणादः प्रतिपादितवान् । कणादस्य एतानि मतानि वैशेषिकसूत्रे ग्रथितानि सन्ति । 'रावणभाष्यम्, भारद्वाजवृत्ति'श्चेति द्वे व्याख्यानग्रन्थेऽस्यास्तामिति ग्रन्थेषूपलभ्यते, किन्त्वधुना नैवोपलभ्येते । किन्तु प्रशस्तपादाचार्यस्य पदार्थधर्मसङ्ग्रहे, व्योमशिवाचार्यस्य व्योमवत्यां टीकायाम्, उदयनाचार्यस्य किरणावल्यां च कणादस्य मतानि विशेषतो व्याख्यातान्यवलोक्यन्ते ।

## ७. उदाहरणानुसारेण अधस्तनीं सारिणीं पूरयत

| पौरस्त्या | तद्धितान्तम्, सुबन्तम् | स्त्रीलिङ्गम् | बहुवचनम् |
|---|---|---|---|
| पारयामहे | तिङन्तम्, आत्मनेपदम् | - | बहुवचनम् |
| दर्शनानि | | | |
| बहुशः | | | |
| गत्वा | | | |
| मन्वते | | | |
| प्रतिपादितवान् | | | |
| धत्ते | | | |
| उञ्छवृत्त्या | | | |
| लभेमहि | | | |

**८. कणादस्य जीवनसम्बद्धान् विषयान् सूत्ररूपेण क्रमशो लिखत ।**

**९. अधस्तनानां व्युत्पन्नानां समस्तानां वा शब्दानां विग्रहवाक्यमनुसन्धाय लिखत**

| | |
|---|---|
| जीवनचरितैः | सृष्टिप्रक्रियायाः |
| पौरस्त्यवाङ्मयम् | ईशापूर्वद्वितीयाब्दशतके |
| प्रामाण्यम् | कापोती |
| समानाकाराणि | परमाणुचिन्तकाः |
| सिद्धान्तनिष्ठः | पञ्चत्वम् |

**१०. अधस्तनमनुच्छेदं पठित्वा निर्दिष्टानि कार्याणि कुरुत**

बहुशोऽध्येतारो वैज्ञानिकेऽनुसन्धाने पाश्चात्त्यानां योगदानमस्तीति स्वीकुर्वन्ति । किन्तु पौरस्त्यपरम्परायामनेके महर्षयः पाश्चात्त्येभ्यः सहस्रवर्षेभ्यः पूर्वमेव वैज्ञानिकान् सिद्धान्तान् प्रत्यपादयन्, किन्तु ते केवलं सिद्धान्तरूपेणैव प्रसिद्धिं लेभिरे, तेषामनुप्रयोगोऽस्माभिर्नैव विहितः । कणादस्य परमाणुशास्त्रम्, भास्कराचार्यस्य गुरुत्वाकर्षणसिद्धान्तः, चरकस्यौषधविज्ञानम्, भारद्वाजस्य विमानशास्त्रम्, पतञ्जलेर्योगविज्ञानम्, विश्वामित्रस्यास्त्रविज्ञानम्, अगस्त्यस्य कलशादुत्पत्तिप्रसङ्गः, गर्गस्य ज्योतिर्विज्ञानम्, बौद्धयनस्य त्रिकोणमितिः, सुश्रुतस्य शल्यचिकित्सापद्धतिश्चेत्यादीनि उदाहरणानि पौरस्त्यवाङ्मयेषु लभ्यन्ते । येनास्माकं पूर्वजा महर्षयोऽनुसन्धातारो वैज्ञानिकाश्चासन् इति निश्चेतुं शक्यते । पौरस्त्या ऋषयो न केवलमनुसन्धानं चक्रुरपि तु तेषां मानवकल्याणाय प्रयोगो विधेय इत्यर्थं च जनान् प्रैरिरन् । किन्त्वस्माकं परम्परायां केवलं ते सिद्धान्ताः सिद्धान्तरूपेणैवावस्थिताः, तेषामनुप्रयोगं विधाय नवीना आविष्कारा नैव जाताः । पौरस्त्या ऋषयो बहुश आध्यात्मिकीं शान्तिं कामयन्ते स्म । अत एव भौतिकोन्नत्यै पौरस्त्यपरम्परायां अल्पशः प्रयासो जातो दृश्यते । तेषां सिद्धान्तानामनुप्रयोगाय अस्माभिः प्रयतनीयम् । पाश्चात्त्यानामनुसन्धातॄणामनुसन्धानैः सह तेषां साम्यं वैषम्यञ्चाधीत्य गभीराणि अनुसन्धानानि विधातव्यानि । पौरस्त्यवाङ्मयस्यानुसन्धानेनास्माकं ज्ञानराशेर्विश्वस्मिन् प्रसारो विधेयः ।

**(क) अधस्तनानां प्रश्नानामुत्तराणि लिखत**

(अ) किं वैज्ञानिकेऽनुसन्धाने पाश्चात्त्यानामेव योगदानमस्ति ?

(आ) पौरस्त्या अनुसन्धातारो जनान् किं प्रैरिरन् ?

(इ) पौरस्त्यक्षेत्रे आविष्काराणामल्पत्वे कारणं किम् ?

(ई) अस्माभिर्गभीराणि अनुसन्धानानि कथं विधातव्यानि ?

(उ) अस्माकं ज्ञानराशेर्विश्वस्मिन् प्रसारः कथं भविष्यति ?

(ख) **अनुच्छेदानुसारेणाधस्तनीं सारिणीं पूरयत**

| वैज्ञानिकसिद्धान्तः | प्रणेतारः |
|---|---|
| परमाणुशास्त्रम् | कणादः |
| गुरुत्वाकर्षणसिद्धान्तः | |
| औषधविज्ञानम् | |
| विमानशास्त्रम् | |
| योगविज्ञानम् | |
| अस्त्रविज्ञानम् | |
| ज्योतिर्विज्ञानम् | |
| त्रिकोणमितिः | |

(ग) **अधस्तनानि भाषिककार्याणि कुरुत**

(अ) विपरीतार्थवाचकं पदयुग्मद्वयम् अन्विष्य लिखत ।

(आ) 'वाङ्मयम्' इत्यस्य प्रकृतिप्रत्ययौ विभज्य लिखत ।

(इ) त्रीणि कृदन्तपदानि अन्विष्य तेषां प्रकृतिप्रत्ययविभागं कुरुत ।

(ई) 'चक्रुः, कामयन्ते, लेभिरे' एतेषां तिङन्तपदानां धातुलकारपुरुषवचनानि निर्दिशत ।

(उ) 'अस्माभिः पौरस्त्यवाङ्मयेषु उदाहरणानि लभ्यन्ते' वाक्यमिदं कर्तृवाच्ये परिवर्तयत ।

## सर्जनात्मकोऽभ्यासः

१. **सामाजिकसञ्जालस्य साहाय्येन षण्णां दर्शनानां प्रणेतॄणां नामानि तेषां सङ्क्षिप्तं परिचयं चान्विष्य लिखत ।**

२. **संसारस्य सृष्टिविषये पौरस्त्य-पाश्चात्यवैज्ञानिक-मतयोः समत्वं पार्थक्यञ्च समीक्ष्य अनुच्छेदद्वयं विरचयत ।**

नवमः पाठः

# मेघदूतांशः

तस्मिन्नद्रौ कतिचितबलाविप्रयुक्तः स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥

धूमज्योतिः सलिलमरूतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद श्रोष्यसिश्रोत्रपेयम् ।
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य ॥

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि–
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।
अन्तःसारं घन तुलयितुं नानिलं शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥

१.

**अन्वयः**

तस्मिन् अद्रौ अबला विप्रयुक्तः कनकवलयभ्रंशरिक्तप्रकोष्ठः कामी स कतिचित् मासान् नीत्वा आषाढस्य प्रथमदिवसे आश्लिष्टसानुं वप्रक्रीडापरिणतगजप्रेक्षणीयं मेघं ददर्श ।

**सरलार्थः**

बल्लभाविरहितः स कामुको यक्षः, अत्यन्तकार्श्यात् यस्य मणिबन्धतः कनककटकोऽपि भ्रष्टः स पूर्वोक्तरामगिरौ अष्टौ मासान् व्यतीत्य आषाढस्य प्रथमदिने पर्वतशृङ्गसंलग्नम्, (यस्यां क्रीडायां हस्तिनः तिर्यग्भूय दन्तैः उच्चस्थानेषु प्रहारं कुर्वन्ति, मृत्तिकादिकमुत्खनन्ति) तस्यां क्रीडायां संलग्नं दर्शनीयं हस्तिनमिव मेघं ददर्श ।

२.

**अन्वयः**

धूमज्योतिः सलिलमरुतां सन्निपातो मेघः क्व ? पटुकरणैः प्राणिभिः प्रापणीयाः सन्देशार्थाः क्व ? इति औत्सुक्यात् अपरिगणयन् गुह्यकः तं ययाचे हि कामार्ताः चेतनाऽचेतनेषु प्रकृतिकृपणाः (भवन्ति ।)

**सरलार्थः**

धूमाग्निजलमरुतां समवायरूपोऽयमचेतनो जलदः कुत्र ? कार्यसमर्थेन्द्रिययुक्तैश्चेतनैर्वाहनीयाः सन्देशवचनाः कुत्र ? इत्युभयोर्मध्ये महदन्तरं वर्तते तथापि औत्सुक्यादेवमन्तरमविचारयन् यक्षः 'मत्सन्देशं मत्प्रियापार्श्वं नय' इति ययाचे यतो हि कामपीडिताः जनाः 'अयं चेतनः अयमचेतनः' इति विवेकशून्याः स्वभावेनैव भवन्ति ।

३.

**अन्वयः**

जलद ! तावत् कथयतः त्वत् प्रयाणानुरूपं मार्गं श्रृणु, तदनु श्रोत्रपेयं मे सन्देशं श्रोष्यसि । यत्र खिन्नः खिन्नः शिखरिषु पदं स्यस्य क्षीणः क्षीणः (सन्) स्रोतसां परिलघु पयश्च उपभुज्य गन्तासि ।

**सरलार्थः**

हे मेघ ! प्रथमं मत्तो निजयात्रानुकूलं मार्गं शृणु तदनन्तरं कर्णप्रियं मत्सन्देशं श्रोष्यसि । यत्र मार्गे त्वं वारंवारं यात्राऽऽप्यासेन परिश्रान्तः सन् पर्वतेषु विश्रम्य तनुकायः सन् पर्वतीयनदीप्रवाहाणां जलमुपभुज्य यास्यसि ।

४.

**अन्वयः**

आम्रकूटः सानुमान् आसारप्रशमितवनोपप्लवम् अध्वश्रमपरिगतं त्वां साधु मूर्ध्ना वक्ष्यति । क्षुद्रः अपि संश्रयाय मित्रे प्राप्ते प्रथमसुकृतापेक्षया विमुखो न भवति । यस्तथा उच्चैः किं पुनः ।

**सरलार्थः**

हे मेघ ! धारासम्पातेन प्रशमितवनाग्नि मार्गजन्यपरिश्रमक्लान्तं त्वामाम्रकूटोऽद्रिः शिखरेण सम्यक् प्रकारेण धारयिष्यति । (यतो हि) नीचोऽपि आश्रयाय गृहागतं मित्रमवलोक्य पूर्वकृतोपकारं स्मृत्य पराङ्मुखो न भवति, य आम्रकूटपर्वतस्तादृशो महान् स कथं भविष्यति ? नैव भविष्यतीतिभावः ।

५.

**अन्वयः**

घन ! वान्तवृष्टिस्तिक्तो वनगजमदैर्वासितं जम्बूकुञ्जप्रतिहतरयम् तस्यास्तोयमादाय गच्छेः । अन्तःसारं त्वामनिलस्तुलयितुं न शक्ष्यति हि रिक्तः सर्वो लघुर्भवति पूर्णता गौरवाय ।

**सरलार्थः**

हे मेघ ! तत्र जलवर्षणानन्तरं वन्यगजानां सुगन्धिभिर्दानवारिभिः सुवासितं जम्बूनिकुञ्जावरुद्धवेगं नर्मदाजलं गृहीत्वा व्रज ! जलवत्वादन्तःसारं त्वां पवनः प्रकम्पयितुं समर्थो न भविष्यति यतो हि निःसारः सर्वोऽपि हेयो भवति, केवलं सारवतैव गौरवास्पदं भवति ।

## अभ्यासः

**श्रवणं भाषणञ्च**

१. **पाठस्य पद्यानि शिक्षकमुखाच्छ्रुत्वा सलयमनुवाचयत ।**

२. **अधस्तनानि पदानि मित्रमुखाच्छ्रुत्वा शुद्धतया उच्चारयत**

आसारप्रशमितवनोपप्लवम्, अध्वश्रमपरिगतम्, संश्रयाय, जम्बूकुञ्जप्रतिहतरयम्, प्रथमसुकृतापेक्षया

३. **अधस्तनस्य पद्यस्य अन्वयं कथयत**

मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं

सन्देशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम् ।

खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघु पयः स्रोतसां चोपभुज्य ॥

**४. पाठस्य प्रथमस्य पद्यस्य सरलार्थं श्रुत्वा प्रदत्तानां प्रश्नानामुत्तराणि कथयत**

(क) बल्लभारहितः कः ?

(ख) गिरेर्नाम किम् ?

(ग) यक्षो गिरौ कति मासान् व्यतयति ?

(घ) हस्तिनः किं कुर्वन्ति ?

(ङ) यक्षः कीदृशं मेघं ददर्श ?

**५. अधः प्रदत्तस्य पद्यस्य नेपालीभाषायामर्थं कथयत**

त्वामासारप्रशवितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः कि पुनर्यस्तथोच्चैः ॥

**६. अधस्तनस्य श्लोकस्य वारं वारमनुवाचनं कुरुत**

सज्जनस्य हृदयं नवनीतं
यद्वदन्ति कवयस्तदलीकम् ।
अन्यदेहविलसत्परितापात्
सज्जनो द्रवति नो नवनीतम् ॥

**७. पञ्चभिर्वाक्यैश्चित्रं वर्णयत**



८. **आत्मना ज्ञातं कमपि श्लोकं कक्षायां श्रावयत ।**

९. **मेघदूतकाव्यस्य विषये शिक्षकमुखाच्छ्रुत्वा परस्परं विमृशत ।**

## पठनम्

१. **पाठस्थानां पद्यानां सलयं वाचनं कुरुत ।**

२. **अधस्तनानां पदानां शुद्धतया पठनं कुरुत**

संश्रयाय, जम्बूकुञ्जप्रतिहतरयम्, श्रोत्रपेयम्, गुह्यकः, वनगजमदैर्वासितम्, मेघमाश्लिष्टसानुम् ।

३. **प्रदत्तस्य पद्यस्य मौनपठनं विधाय तस्य सरलार्थं नेपालीभाषायां कथयत**

तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-<br>
र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।<br>
अन्तःसारं घन तुलयितुं नानिलं शक्ष्यति त्वां<br>
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥

४. **पाठस्य तृतीयपद्यस्य अन्वयस्य द्रुतपठनं कुरुत ।**

५. **पाठस्य द्वितीयं पद्यं पठित्वा समस्तपदानि कथयत ।**

६. **शिक्षकस्य साहाय्येन अधः प्रदत्तं पद्यं सलयं पठित्वा अर्थं सखिसमूहे विमृशत**

पीत्वा रसं तु कटुकं मधुरं समानं<br>
माधुर्यमेव जनयेन्मधुमक्षिकासौ ।<br>
सन्तस्तथैव समसज्जनदुर्जनानां<br>
श्रुत्वा वचो मधुरसूक्तरसं व्रजन्ति ॥

७. **अधस्तनं पद्यांशं मौनं पठित्वा प्रदत्तानां प्रश्नानामुत्तराणि दत्त**

घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धं<br>
छिन्नं छिन्नं पुनरपि पुनः स्वादुचैवेक्षुकाण्डम् ।<br>
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णं

प्राणान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम् ॥

(क) कीदृशं चन्दनं सुगन्धितं भवति ? (ख) कीदृशं इक्षुदण्डं स्वादु भवति ?

(ग) काञ्चनं कथं कान्तवर्णं भवति ? (घ) प्राणान्तेऽपि केषां प्रकृतिविकृतिर्न जायते ?

## लेखनम्

### १. शिक्षकस्य साहाय्येन अधस्तनानां पदानां विग्रहवाक्यं प्रदर्शयत

कतिचितबलाविप्रयुक्तः, कनकवलयभ्रंशरिक्तप्रकोष्ठः, मेघमाश्लिष्टसानुम्, वप्रक्रीडापरिणतगज-प्रेक्षणीयम्, वनगजमदैर्वासितम्, त्वामासारप्रशवितवनोपप्लवम् ।

### २. अधस्तनानि पदानि शुद्धानि कृत्वा लिखत

प्रेछणियम्, धुमजोतिः, बातवृष्टिः, सक्ष्यती, सलीलमरूताम्, सिखरीसु ।

### ३. अधः प्रदत्तानां पदानां पर्यायान् लिखत

जलदः, उच्चैः, तोयम्, गौरवाय, श्रोत्रपेयम्, ययाचे, गुह्यकः ।

### ४. सन्धिविच्छेदं कुरुत

तथोच्चैः, तोयमादाय, क्षुद्रोऽपि, चोपभुज्य, तावच्छृणु, तस्मिन्नद्रौ ।

### ५. परस्परं मेलयत

| | |
|---|---|
| मेघः | सजीवः |
| तोयम् | वायुः |
| गुह्यकः | शैलः |
| चेतनः | वारिवाहः |
| गिरिः | जलम् |
| अनिलः | यक्षः |

### ६. प्रदत्तान् प्रश्नान् पाठाधारेणोत्तरयत

(क) यक्षः कीदृश आसीत् ? (ख) यक्षः कीदृशं मेघं ददर्श ?

(ग) कामपीडिता जनाः कीदृशा भवन्ति ? (घ) यक्षो मेघं प्रति किमुक्तवान् ?

७. **अधस्तनस्य पद्यस्य सरलार्थं विलिखत**

तस्मिन्नद्रौ कतिचितबलाविप्रयुक्तः स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श ॥

८. **प्रदत्तस्य पद्यस्य नेपालीभाषायामर्थं लिखत**

धूमज्योतिः सलिलमरूतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥

९. **सप्रसङ्गं विग्रहकोशपर्यायादिप्रदर्शनपूर्वकमधस्तनपद्यं व्याख्यात**

त्वामासारप्रशवितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥

१०. **महाकवेः कालिदासस्य परिचयं नातिविस्तरेण दत्त ।**

११. **मन्दाक्रान्तावृत्तस्य लक्षणसमन्वयप्रकारं प्रदर्शयत**

## सर्जनात्मकोऽभ्यासः

(क) **सुललितशब्दैः "जीवनम्" इति विषये एकां कवितां रचयत ।**

(ख) **मन्दाक्रान्तावृत्तस्य प्रयोगेण कस्मिन्नपि विषये पद्यमेकं रचयत ।**

(ग) **निर्दिष्टं पद्यं पठित्वा त्रीन् प्रश्नान् रचयत**

गुणागुणज्ञेषु गुणा भवन्ति
ते निर्गुणं प्राप्य भवन्ति दोषाः ।
सुस्वादुतोयाः प्रभवन्ति नद्यः
समुद्रमासाद्य भवन्त्यपेयाः ॥

# वृत्तलक्षणम्

## वसन्ततिलका

**लक्षणम्–**

**उक्ता वसन्ततिलका तभजा जगौ गः ।**

ऽ ऽ ।  ऽ । ।  । ऽ । । ऽ । ऽ ऽ

यत्र प्रतिपादं तगणः (ऽऽ।), भगणः (ऽ।।), जगणः (।ऽ।), जगणः (।ऽ।), द्वौ गुरुवर्णौ (ऽऽ) च भवन्ति तत्र वसन्ततिलकावृत्तं भवति । वृत्तेऽस्मिन् प्रतिपादं चतुर्दशाक्षराणि भवन्ति । प्रतिपादमष्टमेऽक्षरे, ततः षष्ठे (पादान्ते) च यतिर्भवति ।

**यथा–**

**उद्धर्षि–णी जन–दृशां स्त–नभार–गु–र्वी**

ऽ ऽ ।,  ऽ । ।,  । ऽ ।, । ऽ ।, ऽ ऽ

**नीलोत्पलद्युतिमलिम्लुचलोचना च ।**
**सिंहोन्नतत्रिकतटी कुटिलाऽलकान्ता**
**कान्ता वसन्ततिलका नृपवल्लभाऽसौ ॥**

**यथा वा–**

**तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिर्–**
**निक्षेपणाय पदमुद्धृतमुद्वहन्ति ।**
**मार्गाचलव्यतिकराकुलितेव सिन्धुः**
**शैलाधिराजतनया न ययौ न तस्थौ ॥**

## मालिनी

**लक्षणम्–**

**ननमयययुतेयं मालिनी भोगिलोकैः ।**

। । ।  । । ।  ऽ ऽ ऽ  । ऽ ऽ । ऽ ऽ

यत्र प्रतिपादं नगणः (।।।), नगणः (।।।), मगणः (ऽऽऽ), यगणः (।ऽऽ), यगणः (।ऽऽ) समायान्ति तत्र मालिनीवृत्तं भवति । पञ्चदशाक्षरात्मकं वृत्तमिदम् । वृत्तेऽस्मिन् पादस्याष्टमेऽक्षरे, ततः सप्तमे (पादान्ते) च यतिर्भवति ।

**यथा–**

**सरसि–जमनु–विद्धं शै–वलेना–पि रम्य**

। । ।   । । ।   ऽ ऽ ऽ   । ऽ ऽ   । ऽ ऽ

**मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।**

**इयमधिकमनोज्ञा वल्कलेनापि तन्वी**

**किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥**

**यथा वा –**

**मृगमदकृतचर्चा पीतकौशेयवासा**

**रुचिरशिखिशिखण्डाऽऽबद्धधम्मिल्लपाशा ।**

**अनृजु निहितमंशे वंशमुत्क्वाणयन्ती**

**धृतमधुरिपुलीला मालिनी पातु राधा ॥**

## पञ्चचामरम्

**लक्षणम्–**

**प्रमाणिकापदद्वयं वदन्ति पञ्चचामरम् ।**

प्रतिचरणं यत्र जगणः (।ऽ।), रगणः (ऽ।ऽ) इति गणद्वयम्, लघुः(।), गुरुः (ऽ) वर्णौ च भवन्ति तत्र प्रमाणिकावृत्तं भवति । एकस्मिन् चरणे यदि अस्या एव प्रमाणिकाया द्वौ चरणौ सम्मिलतश्चेत् पञ्चचामरवृत्तं ज्ञेयम् । षोडषाक्षरात्मके वृत्तेऽस्मिन् प्रतिपादं लघु-गुरुवर्णयोरष्टवारमावृत्तिर्भवति । यतिश्च अष्टमाक्षरे ततः पादान्ते भवति ।

**यथा–**

**प्रफुल्ल–नीलपङ्–कज–प्रपञ्च–कालिम–प्रभा –**

। ऽ ।   ऽ । ऽ   । ऽ   । ऽ ।   ऽ । ऽ   । ऽ

**वलम्बिकण्ठकन्दलीरुचिप्रबद्धकन्धरम् ।**

**स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं**

**गजच्छिदान्धकच्छिदं तमन्तकच्छिदं भजे ॥**

**यथा वा–**

**सुरद्रुमूलमण्डपे विचित्ररत्ननिर्मिते**
**लसद्वितानभूषिते सलीलविभ्रमालसम् ।**
**सुराङ्गनाभबल्लवीकरप्रपञ्चचामर–**
**स्फुरत्समीरवीजितं सदाऽच्युतं भजामि तम् ॥**

## शिखरिणी

**लक्षणम्–**

**रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।**

ISS SSS III IIS SII I S

यत्र प्रतिचरणं यगणः (ISS), मगणः (SSS), नगणः (III), सगणः (IIS), भगणः (SII), लघुः (I), गुरुः (S) वर्णौ च आपतन्ति तत्र शिखरिणीवृत्तं बोध्यम् । सप्तदशाक्षरात्मकेऽस्मिन् वृत्ते प्रतिपादं षष्ठे, तदनन्तरमेकादशे (पादान्ते) चाक्षरे यतिर्भवति ।

**यथा–**

**दुरालो–कस्तोक स्तबक–नवका–ऽशोकक–लि–का**

ISS SSS III IIS SII I S

**विकासः कासारोपवनपवनोऽपि व्यथयति ।**
**अपि भ्राम्यद्भृङ्गीरणितरमणीया न मुकुल–**
**प्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति ॥**

**यथा वा–**

**यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां**
**यदर्धे विच्छिन्नं भवति कृतसन्धानमिव तत् ।**
**प्रकृत्या यद् वक्रं तदपि समरेखं नयनयो–**
**र्न मे दूरं किञ्चित् क्षणमपि न पार्श्वे रथजवात् ॥**

## मन्दाक्रान्ता

**लक्षणम्–**

**मन्दाक्रान्ताऽम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ।**

SSS SII III SSI SSI S S

यत्र प्रतिपादं मगणः (ऽऽऽ), भगणः (ऽ।।), नगणः (।।।), तगणः (ऽऽ।), तगणः (ऽऽ।), गुरुः (ऽ), गुरुः (ऽ) वर्णौ च समायान्ति तन्मन्दाक्रान्तावृत्तमुच्यते। सप्तदशाक्षरात्मकेऽस्मिन् वृत्ते प्रतिचरणं चतुर्थे, ततः षष्ठे, तदनन्तरञ्च सप्तमे चाक्षरे यतिर्भवति।

**यथा–**

**जातं वं-शे भुव–नविदि–ते पुष्क–रावर्त–कानां**

ऽऽऽ ऽ।। ।।। ऽऽ। ऽऽ। ऽ ऽ

**जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।**
**तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं**
**याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा॥**

**यथा वा–**

**प्रेमालापैः प्रियवितरणैः प्रीणितालिङ्गनाद्यै–**
**र्मन्दाक्रान्ता तदनु नियतं वश्यतामेति बाला।**
**एवं शिक्षावचनसुधया राधिकायाः सखीनाम्**
**प्रीतः पायात् स्मितसुवदनो देवकीनन्दनो नः॥**

## शार्दूलविक्रीडितम्

**लक्षणम्–**

**सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।**

ऽ ऽ ऽ । । ऽ । ऽ । । । ऽ ऽ ऽ । ऽ ऽ । ऽ

यस्मिन् वृत्ते प्रतिचरणं मगणः (ऽऽऽ), सगणः( ।।ऽ), जगणः (।ऽ।), सगणः ।।ऽ), तगणः(ऽऽ।), तगणः(ऽऽ।), गुरुः (ऽ) च भवन्ति तच्छार्दूलविक्रीडितं भवति। एकोनविंशत्यक्षरात्मकेऽस्मिन् वृत्ते प्रतिपादं द्वादशे, तदनन्तरं सप्तमे चाक्षरे यतिर्भवति।

**यथा–**

**अस्मान्सा–धु विचिन्–त्य संय–मधना–नुच्चैः कु–लं चात्म–न–**

ऽऽऽ ।।ऽ ।ऽ। ।।ऽ ।ऽऽ ।ऽऽ ऽ

**स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।**
**सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया**
**भाग्यायत्तमतः परं न खलु तद् वाच्यं वधूबन्धुभिः॥**

यथा वा–

ये याताऽधिकमासहीनदिवसा ये चाऽपि तच्छेषके
तेषामैक्यमवेक्ष्य यो दिनगणान्ब्रूतेऽत्र कल्पे गतान् ।
सश्लिष्टस्फुटकुट्टकोद्भटबहुक्षुद्रैणविद्रावणे
तस्याऽव्यक्तविदो विदो विजयते शार्दूलविक्रीडितम् ॥

## स्रग्धरा

**लक्षणम्–**

**म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ।**

SSS SIS SII III ISS ISS ISS

यत्र प्रतिचरणं मगणः (SSS), रगणः (SIS), भगणः (SII), नगणः (III), यगणः (ISS), यगणः (ISS), यगणः (ISS) समायान्ति तत्र स्रग्धरावृत्तं ज्ञेयम् । अस्मिन् वृत्ते सप्तमे, ततः सप्तमे, तदनन्तरञ्च सप्तम एव वर्णेषु यतिर्भवति ।

**यथा–**

**या सृष्टिः–स्रष्टुरा–द्या वह–ति विधि–हुतं या–हविर्या–च होत्री**

SSS SIS SII III ISS ISS IISS

ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ॥

यथा वा–

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥

## सुन्दरी

**लक्षणम्–**

**अयुजोर्यदि सौ जगौ युजोः सभरा लगौ यदि सुन्दरी तदा ।**

IIS IIS ISI SII SSI ISI S I

प्रतिपद्यं प्रथमतृतीयपादौ विषमचरणौ, द्वितीयचतुर्थपादौ च समचरणौ कथ्यन्ते । यदि प्रथमतृतीयपादयोः सगणः (IIS), सगणः (IIS), जगणः (ISI), गुरुः (S) वर्णस्तथा द्वितीयचतुर्थपादयोः सगणः (IIS), भगणः (SII), रगणः (SIS), लघुः (I), गुरुः (S) वर्णौ च समायान्ति चेत् सुन्दरीवृत्तं भवति । यथा–

**चतसृष्–वपि ते – विवेकि–नी**

I I S   I I S   I S I   S

**नृप विद्–यासु नि–रूढिमा–ग–ता ।**

IIS   SII   SIS   I   S

**कथमे–त्य मतिर्–विपर्य–यं**

IIS   IIS   ISI   S

**करिणी–पङ्कमि–वावसी–द–ति ॥**

IIS   SII   SIS   I   S

अत्र चतुर्थपादस्यान्तिमवर्णो लघुः सन्नपि वृत्तलक्षणानुसारेण पादान्ते विद्यमानत्वात् छन्दःशास्त्रसम्मत्या विकल्पेन गुरुर्मतोऽस्ति ।

**यथा वा–**

**यदवोचत वीक्ष्य मानिनी**
**परितः स्नेहमयेन चक्षुषा ।**
**अपि वागधिपस्य दुर्वचं**
**वचनं तद्विदधीत विस्मयम् ॥**

**स्पष्टीकरणम्–** प्रतिपादमक्षरसङ्ख्यानुसारेण वृत्तं त्रिधा विभज्यते-

(क) समवृत्तम्- पद्यस्य चतुर्षु एव पादेषु समानाक्षरसङ्ख्यायुतं समवृत्तं भवति ।

(ख) अर्धसमवृत्तम्- चतुर्णां पादानां मध्ये प्रथमतृतीयपादयोरेकविधा द्वितीयचतुर्थपादयोरन्यविधा चाक्षरसङ्ख्या यत्र व्यवस्थिता तदर्धसमवृत्तं भवति । सुन्दरी अर्धसमवृत्तं वर्तते ।

(ग) विषमवृत्तम्- यत्र चतुर्षु एव पादेषु भिन्नाक्षरसङ्ख्या गणव्यवस्था वा सम्पद्यते तद् विषमवृत्तं भवति ।

## अभ्यासः

### श्रवणं भाषणञ्च

१. **पठितानां मध्ये प्रतिचरणं सर्वाधिकाक्षरयुतस्य वृत्तस्य नाम श्रावयत ।**

२. **शिक्षकमुखाद् वसन्ततिलका-पञ्चचामर-सुन्दरीवृत्तानां लक्षणं शृणुत ।**

३. **मित्रमुखादधो लिखितं श्लोकं श्रुत्वा तन्नाम, गणान्, यतिव्यवस्थाञ्च निगदत**

कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां
शङ्खं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहन्तीं त्रिनेत्राम् ।
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं
ध्यायेद् दुर्गां जयाख्यां त्रिदशपवृितां सेवितां सिद्धिकामैः ॥

४. **यगण-मगण-नगण-सगण-भगणाः, लघुगुरुवर्णौ च कस्मिन् वृत्ते भवन्ति, सपङ्क्ति कथयत ।**

५. **मन्दाक्रान्तावृत्तस्य यतिव्यवस्थां निगदत ।**

६. **समविषमपादयुतं वृत्तं सोदाहरणं वदत ।**

७. **पादान्तस्य वर्णस्य लघुत्व-गुरुत्वविषये मित्रैस्सह विमृश्य निष्कर्षं श्रावयत ।**

### पठनम्

१. **पाठस्य सर्वाणि पद्यानि सामूहिकस्वरेण पठत**

२. **अधो लिखितं पद्यं पठित्वा पृष्टान् प्रश्नानुत्तरयत**

यः पृथ्वीभरवारणाय दिविजैः सम्प्रार्थितश्चिन्मयः
सञ्जातः पृथिवीतले रविकुले मायामनुष्योऽव्ययः ।
निश्चक्रं हतराक्षसः पुनरगाद् ब्रह्मत्वमाद्यं स्थिरां
कीर्तिं पापहरां विधाय जगतां तं जानकीशं भजे ॥

(क) पद्येऽस्मिन् प्रतिचरणं कत्यक्षराणि सन्ति ?

(ख) अत्र किं वृत्तं प्रयुक्तम् ? गणाश्च के ?

(ग) पद्येऽस्मिन् यतिव्यवस्था कीदृशी वर्तते ?

(घ) पद्यमिदं समवृत्तमर्धसमवृत्तं विषमवृत्तं वा कतमम् ?

(ङ) पाठेऽनेन पद्येन समानमुदाहरणं किम् ?

## ३. अधो लिखितमनुच्छेदं संपठ्य निर्दिष्टानि कार्याणि करुत

छन्दो वेदाङ्गं वर्तते । अङ्गानां ज्ञानेन विना वेदोऽवगन्तुं न शक्यते इति प्रसिद्धिरस्ति । 'छन्दः पादौ तु वेदस्य' इत्याह्निकसूत्रावल्यनुसारेण छन्दो वेदपादो निगद्यते । छन्दो वैदिकं लौकिकञ्चेति नाम्ना द्विधा विभक्तं वर्तते । छन्दो हि गणच्छन्दोऽक्षरच्छन्दो मात्राच्छन्दश्चेति भेदेन पुनस्त्रिधा विभज्यते । छन्दसो महत्त्वं नाल्पम् । साहित्येतराणां धर्म-दर्शनाऽऽचार-ज्योतिष-व्याकरणायुर्वेद-नीतिशास्त्र-राजशास्त्रादीनां छन्दसि ग्रथनस्य हेतोरपि एतस्य महत्त्वं प्रकाशते । छन्दोबद्धं विषयवस्तु शीघ्रं कण्ठस्थं भवति, चिरं चित्तञ्चाधितिष्ठति । छन्दसि मोहिनी शक्तिर्भवति यया पाठक आकृष्टो जायते । एतत् काव्यकोविदां मनो मोदयति, वाणीमलङ्करोति, श्रुतिसौन्दर्यं वर्धयति, पठनाभिरुचिञ्च वितनोति । लयोऽपि वाण्या लालित्यं वर्तते परं छन्दोहीनो लयो भावपूर्णो न भवति । यतो हि छन्द एव लयं भाषया साकमाबध्नाति । छन्दो नियमाननुसरति । यस्तानुपेक्षते स दोषभाग् भवति । छन्द एव वाण्यां सङ्गीतमादधाति । एतदेव सुष्ठु विचिन्त्य पूर्वजा छन्दःशास्त्रीयग्रन्थान् विरचयामासुः ।

**(क) उत्तरयत**

(अ) वेदमवगन्तुं किं कर्तव्यम् ?

(आ) छन्दस्त्रिधा कथं विभज्यते ?

(इ) छन्दोबद्धं विषयवस्तु किं भवति ?

(ई) छन्दोहीनो लयः कीदृशो भवति ?

(उ) दोषभाक्कः ?

**(ख) अनुच्छेदे उल्लिखितान् विहाय साहित्येतरविषयाणां सूचीं निर्मात ।**

**(ग) छन्दःशास्त्ररचनायाः कारणं दर्शयत ।**

**(घ) छन्दोबद्धवाङ्मयस्य पठनस्य लाभान् मित्रैस्सह विमृशत ।**

## ४. अधो लिखिते पद्ये पठित्वा साम्यं वैषम्यञ्च सारिण्यां प्रदर्शयत

(क) खगा वासोपेताः सलिलमवगाढो मुनिजनः

प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम् ।

परिभ्रष्टो दूराद्रविरपि च सङ्क्षिप्तकिरणो
रथं व्यावर्त्यासौ प्रविशति शनैरस्तशिखरम् ॥

(ख) वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः ।
विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ॥

## ५. पादं प्रपूर्य पठत

(क) तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिर्-
निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
......................................
शैलाधिराजतनया न ययौ न तस्थौ ॥

(ख) ..............................
परितः स्नेहमयेन चक्षुषा ।
अपि वागधिपस्य दुर्वचं
वचनं तद्विदधीत विस्मयम् ॥

(ग) .....................................
प्रदीप्तोऽग्निर्भाति प्रविचरति धूमो मुनिवनम् ।
परिभ्रष्टो दूराद्रविरपि च सङ्क्षिप्तकिरणो
............................................ ॥

## लेखनम्

१. **पञ्चचामरवृत्तस्य लक्षणोदाहरणे लिखत ।**

२. **अधो निर्दिष्टं लक्षणं पद्ये सङ्गमयत**

ऽऽऽ ऽ।ऽ ऽ।। ।।। ।ऽऽ ।ऽऽ ।।ऽऽ

३. **पादान्तस्थवर्णस्य विकल्पव्यवस्थां सोदाहरणं प्रकाशयत ।**

४. **अधो लिखितयोः पद्ययोर्लक्षणसमन्वयं कुरुत**

(क) उदयति हि शशाङ्कः कामिनीगण्डपाण्डु-
ग्र्रहगणपरिवारो राजमार्गप्रदीपः ।
तिमिरनिकरमध्ये रश्मयो यस्य गौराः
स्रुतजल इव पङ्के दुग्धधाराः पतन्ति ॥

(ख) अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यत्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
कालेनावरणात्ययात्परिणते यत्स्नेहसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते ॥

५. **अधो लिखिते पद्ये सुन्दरीवृत्तस्य गणसङ्केतं कुरुत**

यदवोचत वीक्ष्य मानिनी
परितः स्नेहमयेन चक्षुषा ।
अपि वागधिपस्य दुर्वचं
वचनं तद्विदधीत विस्मयम् ॥

६. **शिक्षकसाहाय्येन समार्धसमविषमवृत्तानामन्तरं सोदाहरणं प्रदर्शयत ।**

## सर्जनात्मकोऽभ्यासः

१. **अधीते कस्मिन्नपि वृत्ते मौलिकं पद्यैकं रचयत ।**

२. **छन्दःशास्त्रस्य महत्त्वमावश्यकताञ्च वर्णयित्वा अनुच्छेदत्रयं रचयत ।**

# व्याकरणखण्डः

# संज्ञाप्रकरणम्

(वर्णसमाम्नायः)

**अ इ उण् ॥१॥ ऋ लृ क् ॥२॥ ए ओ ङ् ॥३॥ ए औ च् ॥४॥ ह य व र ट् ॥५॥ ल ण् ॥६॥**

**ञ म ङ ण न म् ॥७॥ झ भ ञ् ॥८॥ घ ढ ध ष् ॥९॥ ज ब ग ड द श् ॥१०॥ ख फ छ ठ थ च ट त व् ॥११॥**

**क प य् ॥१२॥ श ष स र् ।१३। ह ल् ॥१४॥**

इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि । एषामन्त्या इतः । हकारादिष्वकार उच्चारणार्थः । लण् मध्ये त्वित्संज्ञकः ।

**हलन्त्यम् १ । ३ । ३**

**उपदेशेऽन्त्यं हलित् स्यात् । उपदेश आद्योच्चारणम् ।**

**अदर्शनं लोपः १ । १ ।६०**

**प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात् । प्रसक्तस्य = उच्चार्यत्वेन प्राप्तस्येत्यर्थः ।**

**तस्य लोपः १ । ३ । ९**

**तस्येतो लोपः स्यात् । णादयोऽणाद्यर्थाः ।**

**आदिरन्त्येन सहेता १ । १ ।७१**

**अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात् ।**

**ऊकालोऽज्झ्रस्वदीर्घप्लुतः १ । २ । २७**

**उश्च ऊश्च ऊ३ श्च वः, वां काल इव कालो यस्य सोऽच् क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञः स्यात् । स प्रत्येकमुदात्तादिभेदेन त्रिधा ।**

**उच्चैरुदात्तः १ । २ । २९**

**ताल्वदिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात् ।**

**नीचैरनुदात्तः १ । २ । ३०**

**ताल्वादिषु सभागेषु स्थानेष्वधोभागे निष्पन्नोऽजनुदात्तसंज्ञः स्यात् ।**

**समाहारः स्वरितः १।२।३१**
**उदात्तत्वानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात्। स नवविधोऽपि प्रत्येकमनुनासिकाननुनासिकत्वाभ्यां द्विधा।**

**मुखनासिकावचनोऽनुनासिकः १।१।८**
**मुख-सहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात्। तदित्थम् अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः। लृवर्णस्य द्वादश, तस्य दीर्घाभावात्। एचामपि द्वादश, तेषां ह्रस्वाभावात्।**

**तुल्यास्यप्रयत्नं सवर्णम् १।१।८**
**ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात्।**

**ऋ-लृवर्णयोर्मिथः सावर्ण्यं वाच्यम्** (वा.)

**अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। ऋटुरषाणां मूर्धा। लृतुलसानां दन्ताः। उपूपध्मानीयानामोष्ठौ। ञमङणनानां नासिका च। एदैतोः कण्ठतालु। ओदौतोः कण्ठोष्ठम्। वकारस्य दन्तोष्ठम्। जिह्वामूलीयस्य जिह्वामूलम्। नासिकाऽनुस्वारस्य।** इति स्थानानि।

**यत्नो द्विधा – आभ्यन्तरो बाह्यश्च। आद्यः पञ्चधा। स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात्। तत्र स्पृष्टं प्रयत्नं स्पर्शानाम्। ईषत्स्पृष्टमन्तःस्थानाम्। ईषद्विवृतमूष्मणाम्। विवृतं स्वराणाम् ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्। प्रक्रियादशायां तु विवृतमेव। बाह्यप्रयत्नस्त्वेकादशधा–विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति। खरो विवाराः श्वासा अघोषाश्च। हशः संवारा नादा घोषाश्च। वर्गाणां प्रथम–तृतीय–पञ्चमा यणश्चाल्पप्राणाः। वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः। कादयो मावसानाः स्पर्शाः। यणोऽन्तःस्थाः। शषसहा ऊष्माणः। अचः स्वराः। ≍क≍ख इति कखाभ्यां प्रागर्धविसर्गसदृशो जिह्वामूलीयः। ≍प≍फ इति पफाभ्यां प्रागर्धविसर्गसदृश उपध्मानीयः। 'अं' 'अः' इत्यचः परावनुस्वारविसर्गौ।**

**परः सन्निकर्षः संहिता १।४।१०९**
**वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात्।**

**हलोऽनन्तराः संयोगः १।१।७**
**अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः।**

**सुप्तिङन्तं पदम् १।४।१४**
**सुबन्तं तिङन्तं च पदसंज्ञं स्यात्।**

# अभ्यासः

१. **अधो लिखितान् प्रश्नानुत्तरयत**

(क) माहेश्वराणि सूत्राणि कति सन्ति ? कानि च तानि ?

(ख) कथंविधा वर्णा लुप्ता भवन्ति ?

(ग) स्वरितसंज्ञा कुत्र भवति ?

(घ) अ-इ-उ-ऋ-लृवर्णानां कति भेदा भवन्ति ?

(ङ) कस्यामवस्थायां सवर्णसंज्ञा भवति ?

(च) पदसंज्ञकसूत्रं लिखत ।

२. **अधस्तनसूत्राणामर्थं नेपालीभाषायां लिखत**

(क) उच्चैरुदात्तः

(ख) हलोऽनन्तराः संयोगः

(ग) मुखनासिकावचनोऽनुनासिकः

(घ) परः सन्निकर्षः संहिता

३. **यत्नः कतिविधः ? सम्यक् प्रकाशयत ।**

४. **इत्-लोप-ह्रस्व-दीर्घ-प्लुत-उदात्त-अनुदात्त-अनुनासिकसंज्ञाविधायकानि सूत्राणि लिखत ।**

५. **अण्-अच्-एङ्-जश्-खर्-शल्-झश्-भष्प्रत्याहारेषु के के वर्णाः समायान्तीति लिखत ।**

द्वितीयः पाठः

# अच्सन्धिप्रकरणम्

**इको यणचि ६ । १ । ७७**

**इकः स्थाने यण् स्यादचि संहितायां विषये । सुध्युपास्यः । मध्वरिः । धात्रंशः । लाकृतिः । दध्यानय । यद्यपि ।** इत्यादि ।

**एचोऽयवायावः ६ । १ । ७८**

**एचः क्रमाद् अय्, अव्, आय्, आव्, एते स्युरचि । हरये । विष्णवे । नायकः । पावकः । गायकः । श्रावकः ।**

**वान्तो यि प्रत्यये ६ । १ । ७९**

**यादौ प्रत्यये परे ओदौतोरवावौ स्तः ।**

**अदेङ्गुणः १ । १ । २**

**अत् एङ् च गुणसंज्ञः स्यात् ।**

**आद् गुणः ६ । १ । ८७**

**अवर्णादचि परे पूर्वपरयोरेको गुणादेशः स्यात् । उपेन्द्रः । रमेशः । गङ्गोदकम् । महेशः । देवर्षिः ।**

**वृद्धिरादैच् १ । १ । १**

**आदैच्च वृद्धिसंज्ञः स्यात् ।**

**वृद्धिरेचि ६ । १ । ८८**

**आदेचि परे वृद्धिरेकादेशः । गुणापवादः । कृष्णैकत्वम् । गङ्गौघः । देवैश्वर्यम् ।**

**उपसर्गाः क्रियायोगे १ । ४ । ५९**

**प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः । प्र । परा । अप । सम् । अनु । अव । निस् । निर् । दुस् । दुर् । वि । आङ् । नि । अधि । अपि । अति । सु । उत् । अभि । प्रति । परि । उप । एते प्रादयः ।**

**भूवादयो धातवः १।३।१**

**क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः।**

**उपसर्गादृति धातौ ६।१।९१**

**अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात्। प्रार्च्छति।**

**एङि पररूपम् ५।१।९४**

**आदुपसर्गादेङादौ धातौ परे पररूपमेकादेशः स्यात्। प्रेजते। उपोषति।**

**अचोऽन्त्यादि टि १।१।६४**

**अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात्।**

**शकन्ध्वादिषु पररूपं वाच्यम् (वा.) (तच्च टेः)। शकन्धुः। कर्कन्धुः। कुलटा। सीमन्तः केशवेशे (वा.) सीमान्तोऽन्यः। मनीषा। हलीषा। लाङ्गलीषा। पतञ्जलिः। सारङ्गः पशुपक्षिणोः (वा.) साराङ्गोऽन्यः। आकृतिगणोऽयम्। मार्तण्डः।**

**ओमाङोश्च ६।१।९५**

**ओमि आङि चात्परे पररूपमेकादेशः स्यात्। शिवायों नमः। शिव एहि, शिवेहि।**

**अकः सवर्णे दीर्घः ६।१।१०१**

**अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्। दैत्यारिः। श्रीशः। विष्णूदयः। प्राचार्यः। विद्यालयः।**

**एङः पदान्तादति ६।१।१०९**

**पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात्। हरेऽव। विष्णोऽव।**

# अभ्यासः

१. **अधो लिखितान् प्रश्नानुत्तरयत –**

(क) उपसर्गाः कति ? के च ते ?

(ख) वृद्धिसंज्ञका वर्णाः के ?

(ग) केभ्यः केषु वर्णेषु परतः स्थितेषु यणादेशो भवति ?

(घ) गुणविधायकं सूत्रं लिखत ।

(ङ) कस्य धातुसंज्ञा भवति ?

२. **अधस्तनसूत्राणामर्थं नेपालीभाषायां लिखत**

(क) इको यणचि

(ख) वृद्धिरेचि

(ग) एङि पररूपम्

(घ) अकः सवर्णे दीर्घः

३. **अधो लिखितानां प्रयोगाणां रूपसिद्धिप्रक्रियां दर्शयत**

इत्यादि, गायकः, देवर्षिः, प्राचार्यः, कर्कन्धुः ।

४. **अधो लिखितेषु प्रयोगेषु सन्धिच्छेदपुरःसरं सूत्रनिदर्शनं कुरुत**

यद्यपि, श्रावकः, महेशः, गङ्गौघः, विद्यालयः, हरेऽव ।

५. **परस्परं मेलयत**

| क | ख |
|---|---|
| टिसंज्ञा | उपसर्गाः क्रियायोगे |
| वृद्धिसंज्ञा | भूवादयो धातवः |
| गुणसंज्ञा | वृद्धिरादैच् |
| धातुसंज्ञा | अदेङ् गुणः |
| उपसर्गसंज्ञा | अचोऽन्त्यादि टि |

# प्रकृतिभावः

प्लुतप्रगृह्या अचि नित्यम् ६ । १ । १२५

एतेऽचि प्रकृत्या स्युः । आगच्छ कृष्ण३ अत्र गौश्चरति ।

ह्रस्वं लघु १ । ४ । १०

ह्रस्वस्य लघुसंज्ञा स्यात् ।

संयोगे गुरु १ । ४ । ११

संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात् ।

दीर्घं च १ । ४ । १२

गुरु स्यात् ।

गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ८ । २ । ८६

प्लुतो वा । दे३वदत्त, देवद३त्त, देवदत्त३ । गुरोः किम् ? वकारादकारस्य मा भूत् ।

ईदूदेद्द्विवचनं प्रगृह्यम् १ । १ । ११

ईदूदेदन्तं द्विवचनं प्रगृह्यं स्यात् । हरी एतौ । विष्णू इमौ । गङ्गे अमू ।

अदसो मात् १ । १ । १२

अस्मात्परावीदूतौ प्रगृह्यौ स्तः । अमी ईशाः । रामकृष्णावमू आसाते ।

चादयोऽसत्त्वे १ । ४ । ५७

अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः ।

प्रादयः ४ । ५ । ८

एतेऽपि तथा ।

वस्तूपलक्षणं यत्र सर्वनाम प्रयुज्यते ।
द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः ॥

**निपात एकाजनाङ् १ । १ । १४**

**एकोऽज् निपात आङ्वर्जः प्रगृह्यः स्यात् । इ इन्द्रः उ उमेशः ।**

**ओत् १ । १ । १५**

**ओदन्तो निपातः प्रगृह्यः स्यात् । अहो ईशाः ।**

**सम्बुद्धौ शाकल्यस्येतावनार्षे १ । १ । १६**

**संबुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिके इतौ परे । विष्णो इति । विष्णविति ।**

**मय उञो वो वा ८ । ३ । ३३**

**मयः परस्य उञो वो वा स्यादचि । किमु उक्तम् । किम्वुक्तम् ।**

**इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ६ । १ । १२७**

**पदान्ता इको ह्रस्वाः प्रकृत्या च वा स्युरसवर्णेऽचि । ह्रस्वविधानसामर्थ्यान्न स्वरसन्धिः । चक्रि अत्र, चक्र्यत्र । पदान्ताः किम् ? गौर्यौ ।**

**ऋत्यकः ६ । १ । १२८**

**ऋति परे पदान्ता अकः प्राग्वद्वा । ब्रह्मा ऋषिः, ब्रह्मर्षिः । पदान्ताः किम् ? आर्च्छत् ।**

## अभ्यासः

**१. अधो लिखितान् प्रश्नानुत्तरयत**

(क) कस्य लघुसंज्ञा भवति ?

(ख) गुरुसंज्ञाविधायकं सूत्रं किम् ?

(ग) 'उ उमेशः' इति प्रयोगः केन सूत्रेण सह सम्बद्धोऽस्ति ?

(घ) 'हरी एतौ' इत्यत्र सन्धिनिषेधकसूत्रं निर्दिशत ।

(ङ) 'किम्वुक्तम्' इति कथमभवत् ?

**२. अधस्तनसूत्राणामर्थं नेपालीभाषायां लिखत**

(क) गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्

(ख) अदसो मात्

(ग) प्रादयः

(घ) इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च

**३. अधो लिखितानां शब्दानां रूपसिद्धिप्रक्रियां दर्शयत –**

विष्णू इमौ, उ उमेशः, अहो ईशाः, विष्ण इति ।

**४. अधस्तनावस्थासु कुत्र कस्य सूत्रस्य प्रवृत्तिर्भवतीति दर्शयत –**

गङ्गे+अमू, रामकृष्णावमू+आसाते, आ+एवं नु मन्यसे, किमु+उक्तम्, ब्रह्मा+ऋषिः ।

**५. समीचीनकथनेषु ✓ चिह्नं दर्शयत**

(क) दीर्घं गुरुसंज्ञं भवति ? ( )

(ख) यत्र प्रकृतिभावो भवति तत्र संहिताकार्यं न भवति । ( )

(ग) द्रव्यार्थकचादीनां निपातसंज्ञा भवति । ( )

(घ) प्लुतादचि परे प्रकृतिभावो न भवति । ( )

(ङ) 'किमु+उक्तम्' इत्यत्र सवर्णदीर्घो भवति । ( )

# हल्सन्धिप्रकरणम्

**स्तोः श्चुना श्चुः ८ । ४ । ४०**

सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः । हरिश्शेते । रामश्चिनोति । सच्चित् । शार्ङ्गिञ्जयः ।

**ष्टुना ष्टुः ८ । ४ । ४१**

स्तोः ष्टुना योगे ष्टुः । रामष्षष्ठः । रामष्टीकते । पेष्टा । तट्टीका । चक्रिण्ढौकसे ।

**झलां जशोऽन्ते ८ । २ । ३९**

पदान्ते झलां जशः स्युः । वागीशः । चिद्रूपम् ।

**यरोऽनुनासिकेऽनुनासिको वा ८ । ४ । ४५**

यरः पदान्तस्याऽनुनासिके परेऽनुनासिको वा । एतन्मुरारिः, एतद् मुरारिः । स्थानप्रयत्नाभ्यामन्तरतमे स्पर्शे चरितार्थो विधिरयं रेफे न प्रवर्तते । चतुर्मुखः ।

**तोर्लि ८ । ४ । ६०**

परसवर्णः । तल्लयः । विद्वाँल्लिखति । नस्यानुनासिको लः ।

**उदः स्थास्तम्भोः पूर्वस्य ८ । ४ । ६१**

उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात् ।

**तस्मादित्युत्तरस्य १ । १ । ६७**

पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम् ।

**आदेः परस्य १ । १ । ५४**

परस्य यद्विहितं तत्तस्यादेर्बोध्यम् । अघोषस्य महाप्राणस्य विवारस्य श्वासस्य सस्य तादृश एव थकारः ।

**झरो झरि सवर्णे ८ । ४ । ६५**

हलः परस्य झरो लोपो वा सवर्णे झरि ।

**खरि च ८ । ४ । ५५**

खरि परे झलां चरः स्युः । इत्युदो दस्य तः । उत्थानम् । उत्तम्भनम् ।

**झयो होऽन्यतरस्याम् ८ । ४ । ६२**

झयः परस्य हस्य वा पूर्वसवर्णः ।

संवारस्य नादस्य घोषस्य महाप्राणस्य हस्य तादृशो वर्गचतुर्थः । वाग्घरिः, वाग्हरिः ।

**शश्छोऽटि ८ । ४ । ६३**

पदान्ताद् झयः परस्य शस्य छो वा स्यादटि । तच्छिवः, तच्शिवः ।

छत्वममीति वाच्यम् (वा.) । तच्छ्लोकेन, तच्श्लोकेन । अमि किम् ? वाक् श्च्योतति ।

**मोऽनुस्वारः ८ । ३ । २३**

मान्तस्य पदस्यानुस्वारो हलि । हरिं वन्दे । पदस्य किम् ? गम्यते ।

**नश्चापदान्तस्य झलि ८ । ३ । २४**

नस्य मस्य चापदान्तस्य झल्यनुसारः । यशांसि । आक्रंस्यते । झलि किम् ? मन्यते ।

**अनुस्वारस्य ययि परसवर्णः ८ । ४ । ५८**

शान्तः । अङ्कितः ।

**वा पदान्तस्य ८ । ४ । ५९**

त्वङ्करोषि, त्वं करोषि ।

**डः सि धुट् ८ । ३ । २९**

डात्परस्य सस्य धुड्वा ।

आद्यन्तौ टकितौ १। १। ४६

टित्कितौ यस्यौक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः। षट्त्सन्तः, षट् सन्तः।

समः सुटि ८। ३। ५

समो रुः सुटि।

अत्रानुनासिकः पूर्वस्य तु वा ८। ३। २

अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा।

अनुनासिकात् परोऽनुस्वारः ८। ३। ४

अनुनासिकं विहाय रोः पूर्वस्मात् परोऽनुस्वारागमः।

खरवसानयोर्विसर्जनीयः ८। ३। १५

खरि अवसाने च पदान्तस्य रेफस्य विसर्गः।

संपुंकानां सो वक्तव्यः (वा) सँस्स्कर्ता, संस्स्कर्ता।

छे च ८। ४। ६०

ह्रस्वस्य छे तुक्। स्वच्छाया। शिवच्छाया।

आङ्माङोश्च ६। १। ७४

तुक् छे। आच्छादयति। माच्छिदत्।

पदान्ताद् वा ६। १। ७६

दीर्घात् पदान्ताच्छे तुग्वा। लक्ष्मीच्छाया, लक्ष्मी छाया।

# अभ्यासः

## १. अधो लिखितान् प्रश्नानुत्तरयत

(क) “स्तोः श्चुना श्चुः” इति सूत्रस्य कार्यं किम् ?

(ख) कस्यामवस्थायां झलां जश्त्वं भवति ?

(ग) ‘वाग्घरिः’ इत्यस्य “झयो होऽन्यतरस्याम्” इति सूत्रस्य च मध्ये कः सम्बन्धः ?

(घ) अनुस्वारविधायकं सूत्रं किम् ?

(ङ) “खरवसानयोर्विसर्जनीयः” इति सूत्रेण कीदृशाः शब्दाः निर्मीयन्ते ?

## २. अधस्तनसूत्राणामर्थं नेपालीभाषायां लिखत

(क) विसर्जनीयस्य सः

(ख) झरो झरि सवर्णे

(ग) झलां जशोऽन्ते

(घ) वा पदान्तस्य

## ३. अधो लिखितानां प्रयोगाणां सिद्धिप्रक्रियां दर्शयत

अधिष्ठाता, सच्चरित्रम्, एतन्मुरारिः, यशांसि, शान्तः, लक्ष्मीच्छाया ।

## ४. अधो लिखितेषु प्रयोगेषु सन्धिविच्छेदं विधाय सूत्रनिर्देशनं कुरुत

पेष्टा, सच्चित्, उत्थानम्, हरिं वन्दे, अङ्कितः, आच्छादयति ।

# विसर्ग-स्वादिसन्धिनिदर्शनम्

विसर्जनीयस्य सः ८ । ३ । ३४

खरि । विष्णुस्त्राता ।

शर्परे विसर्जनीयः ८ । ३ । ३५

शर्परे खरि विसर्गस्य विसर्गो न त्वन्यत् । कः त्सरुः । घनाघनः क्षोभणः ।

वा शरि ८ । ३ । ३६

शरि विसर्गस्य विसर्गो वा । हरिःशेते, हरिश्शेते ।

ससजुषो रुः ८ । २ । ६६

पदान्तस्य सस्य सजुष्शब्दस्य च रुः स्यात् ।

अतो रोरप्लुतादप्लुते ६ । १ । ११३

अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति । शिवोऽर्च्यः । अतः किम् ? देवा अत्र । अतीति किम् ? श्व आगन्ता । अप्लुतात् किम् ? एहि सुश्रोत३ अत्र स्नाहि । प्लुतस्यासिद्धत्वादतः परोऽयम् । अप्लुतादिति विशेषणे तु तत्सामर्थ्यान्नासिद्धत्वम् । तपरकरणस्य तु न सामर्थ्यम्, दीर्घनिवृत्या चरितार्थऽत्वात् । अप्लुत इति किम् ? तिष्ठतु पय अ३ग्निदत्त ।

हशि च ६ । १ । ११४

तथा । शिवो वन्द्यः ।

भो–भगोअघो–अपूर्वस्य योऽशि ८ । ३ । १७

एतत्पूर्वस्य रोर्यादेशोऽशि । देवा इह, देवायिह ।

**हलि सर्वेषाम् ८ । ३ । २२**

भो–भगो–अघो–अपूर्वस्य यस्य नित्यं लोपः स्याद्धलि । भो देवाः । भगो नमस्ते । अघो याहि । देवा यान्ति ।

**रोऽसुपि ८ । ३ । ६९**

अह्नो रेफादेशो न तु सुपि । अहरहः । अहर्गणः । असुपि किम् ? अहोभ्याम् । अत्र "अहन्" इति रुत्वम् ।

रूपरात्रिरथन्तरेषु रुत्वं वाच्यम् (वा.) अहोरूपम् । गतमहो रात्रिरेषा । "एकदेशविकृतन्यायेन" अहोरात्रः । अहोरथन्तरम् ।

**रो रि ८ । ३ । १४**

रेफस्य रेफे परे लोपः ।

**ढ्रलोपे पूर्वस्य दीर्घोऽणः ६ । ३ । १११**

ढरेफयोर्लोपनिमित्तयोः पूर्वस्याणो दीर्घः स्यात् । पुना रमते । हरी रम्यः । शम्भू राजते ।

**विप्रतिषेधे परं कार्यम् १ । ४ । २**

तुल्यबलविरोधे परं कार्यं स्यात् । इति लोपे प्राप्ते, पूर्वत्रासिद्धमिति रो रीत्यस्यासिद्धत्वादुत्वमेव । मनोरथः ।

## अभ्यासः

१. **अधो लिखितान् प्रश्नानुत्तरयत**

(क) 'शिवो वन्द्यः' इत्यत्रोत्वविधायकं सूत्रं किम् ?

(ख) 'भो-भगो-अघो-अपूर्वस्य योऽशि' इति सूत्रस्य कार्यं किम् ?

(ग) विसर्गलोपिसूत्रं किम् ?

(घ) "शिवोऽर्च्यः" कथं निष्पद्यते ?

(ङ) "हरी रम्यः" इत्यस्य सन्धेः कार्यात् पूर्वस्य रूपं लिखत ।

२. **अधस्तनसूत्राणामर्थं नेपाली-भाषायां लिखत**

(क) ससजुषो रुः

(ख) रो रि

(ग) ढ्रलोपे पूर्वस्य दीर्घोऽणः

(घ) अतो रोरप्लुतादप्लुते

३. **अधो लिखितानां प्रयोगाणां ससूत्रं रूपसिद्धिप्रक्रियां दर्शयत**

हरिःशेते, देवा इह, शम्भू राजते, मनोरथः, विष्णुस्त्राता ।

४. **"ससजुषो रुः, "रो रि"सूत्रयोः कार्यं लिखत ।**

५. **अधस्तनानां सन्धिविच्छेदं कुरुत**

बालो हसति, सोऽपि, षष्णवतिः ।

६. **अधस्तनेषु सन्धिं कुरुत**

महत्+छाया, तपस्+चर्या, सत्+चरित्रम्, दिक्+ईशः, मुनिस्+षष्ठः, तद्+जलम्, इष्+तम्, महत्+अन्तरम्, जगत्+ईशः, चित्+रूपम्, चिद्+मयम्, एतद्+मुखम्, धिग्+मूर्खम्, त्वग्+मनसी ।

७. **अधो लिखितेषु कस्य सूत्रस्य प्रवृत्तिर्भवतीति निर्दिशत –**

सद्+जनः, दिक्+अन्तः, यत्+इदम्, चित्+आनन्दः, हरिस्+टीकते, दुष्+तः, उद्+शाहः, सद्+कार्यम्, दिग्+नागः, सद्+मतिः, तद्+न, वाग्+मयम्, उद्+स्थापयति, यावत्+शक्यम्, अज्+हलौ ।

# हलन्तपुँल्लिङ्गे

# हकारान्तशब्दनिरूपणम्

**हो ढः ८।२।३१**

**हस्य ढो झलि पदान्ते च । लिट्, लिड् । लिहौ २ । लिहः । लिड्भ्याम् । लिट्त्सु, लिट्सु ।**

झलि परतः पूर्वस्य हकारस्य, पदान्ते विद्यमानस्य च हकारस्य ढः स्यादिति सूत्रार्थः । लिह्-शब्दात् सौ 'हल्ङ्याप्-' इति सुलोपः, पदान्तत्वाद् हस्य ढः, "झलां जशोऽन्ते" इति ढस्य जश्त्वेन डः, तस्य "वाऽवसाने" इति चर्त्वपक्षे टकारः, तेनात्र रूपद्वयम् । लिह्-शब्दाद् भ्यामादौ अपि हस्य ढत्वे "स्वादिष्वसर्वनामस्थाने" इति पदसंज्ञायां जश्त्वम् । सप्तम्या बहुवचने सुपि हस्य ढत्वे, ढस्य जश्त्वेन डकारे 'लिड्+सु' इति जाते "डः सि धुट्" इति धुटि "खरि च" इति डकारधकारयोः चर्त्वे 'लिट्त्सु' इति । धुडागमस्य वैकल्पिकत्वात् तदभावे 'लिट्सु' इति रूपद्वयम् ।

**दादेर्धातोर्घः ८।२।३२**

**झलि पदान्ते चोपदेशे दादेर्धातोर्हस्य घः ।**

(धातूपदेशकाले यो दकारादिः धातुः तदवयवस्य हकारस्य घकारः स्यात् झलि पदान्ते च इत्यर्थः । दुह्धातोः क्विप्-प्रत्यये तस्य सर्वापहारिलोपे दुह्शब्दः, तस्मात् सौ 'हल्ङ्याब्भ्यः-' इति सुलोपे 'हो ढः' इति हकारस्य ढत्वे प्राप्ते तं बाधित्वा अनेन घत्वम् ।)

**एकाचो बशो भष् झषन्तस्य स्ध्वोः ८।२।३७**

**धात्ववयवस्यैकाचो झषन्तस्य बशो भष् से ध्वे पदान्ते च । इह व्यपदेशिवद्भावेन धात्ववयवत्वाद् भष्भावः । धुक्, धुग् । दुहौ । दुहः । दुहा । धुग्भ्याम् । धुक्षु ।**

धातोः अवयवो य एकाच् झषन्तः तस्य बशो भष् स्यात्, सकारे, ध्वशब्दे परे पदान्ते च इत्यर्थः । अत्र 'दुघ्' इति समुदायस्य यः पूर्वावयवः 'दु' इति तद् झषन्तं न, यश्च उत्तरावयवः 'उघ्' इति झषन्तः तत्र 'बश्' नास्ति, तस्माद् व्यपदेशिवद्भावेन धातौ धात्ववयवत्वव्यवहारः । व्यपदेशिवद्भावश्च - विशिष्टः अपदेशः

व्यपदेशः मुख्यव्यवहारः, सः अस्यास्तीति व्यपदेशी, व्यपदेशिना तुल्यं व्यपदेशिवत् । धातौ धात्ववयवत्व-व्यवहारः, 'राहोः शिरः' इतिवत् । ततः 'धुघ्' इति जाते घकारस्य जश्त्वे वैकल्पिके चर्त्वे च 'धुक्' इति चर्त्वाभावे 'धुग्' इति रूपद्वयम् । एवं भ्यामादौ अपि घत्वे भष्भावे जश्त्वे च धुग्भ्याम्, 'धुग्भिः' इत्यादयश्च सिद्ध्यन्ति । सुपि 'धुग्+सु' इति जाते 'खरि च' इति गकारस्य चर्त्त्वेन ककारे 'आदेश-' इति सकारस्य षत्वे क्-ष्संयोगे क्षः, तस्मात् 'धुक्षु' इति रूपम् ।

**वा द्रुहमुहष्णुहष्णिहाम् ८।२।३३**

**एषां हस्य वा घो झलि पदान्ते च । ध्रुक्, ध्रुग् । ध्रुट्, ध्रुड् । द्रुहौ । द्रुहः । ध्रुग्भ्याम्, ध्रुड्भ्याम्, ध्रुक्षु, ध्रुट्त्सु, ध्रुट्सु । एवं मुह् ।**

द्रुह्-मुह-ष्णुह्-ष्णिह्-एतेषां हस्य घकारो वा स्यात् झल्परे पदान्ते च । द्रुह् - इत्यस्मात् सौ 'हो ढः' इति ढत्वे प्राप्ते तं बाधित्वा अनेन वैकल्पिके घत्वे जश्त्वे वैकल्पिके चर्त्वे 'ध्रुक्' इति, चर्त्वाभावे- ध्रुग् । अनेन सूत्रेण घत्वाभावे हस्य ढत्वे, ढस्य जश्त्वचर्त्वयोः कृतयोः 'ध्रुट्' इति चर्त्वाभावे - ध्रुड् । एवं भ्यामादौ अपि घत्व-ढत्वयोः रूपद्वयम् । सुपि घत्वपक्षे घकारस्य जश्त्वे 'खरि च' इति चर्त्त्वे 'आदेश-' इति सकारस्य षत्वे, क्-ष्संयोगे क्षः । घत्वाभावे 'हो ढः' इति ढत्वे, ढस्य जश्त्वेन डकारे 'ध्रुड्-सु' इति स्थिते धुडागमे 'खरि च' इति डकार-घकारयोः चर्त्वे 'ध्रुट्त्सु' इति धुडभावे 'ध्रुट्सु' ।

**धात्वादेः षः सः ६।१।६४**

**स्नुक्, स्नुग्, स्नुट्, स्नुड् । एवं - ष्णिह् ।**

धातोः आदौ विद्यमानस्य षकारस्य, सकारो भवतीत्यर्थः । 'ष्णुह्' इत्यस्य षकारस्य स्थाने अनेन सूत्रेण सकारादेशे 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति नियमेन णत्वनिवृत्तौ 'स्नुह्' इत्यस्मात् सौ द्रुह्वद्रूपाणि भवन्ति । एवं ष्णिह्-इत्यस्यापि । 'विश्वं वहति' इत्यर्थे विश्वशब्दोपपदाद् वह्धातोः ण्विप्रत्यये विश्ववाह्शब्दः तस्मात् सुटि (सु-औ-जस्-अम्-औट्सुविभक्तिषु) विश्ववाट्-विश्ववाड्, विश्ववाहौ, विश्ववाहः, विश्ववाहम्, विश्ववाहौ इति रूपाणि । तत्र सौ सुलोपे 'हो ढः' इति ढत्वे जश्त्वे चर्त्वविकल्पे च 'विश्ववाट्-विश्ववाड्' इति, अन्यानि रूपाणि सुगमानि सन्ति । शसि तु 'विश्ववाह् + अस्' इति स्थिते सम्प्रसारणकार्यात्प्राक् सम्प्रसारणसंज्ञा उच्यते

**इग्यणः संप्रसारणम् १।१।४५**

**यणः स्थाने प्रयुज्यमानो य इक् स संप्रसारणसंज्ञः स्यात् ।**

अनेन यण्स्थानिकस्य इकः संप्रसारणसंज्ञायाम्-

**वाह ऊठ् ६।४।१३२**

**भस्य वाहः संप्रसारणमूठ् स्यात् ।**

भसंज्ञकस्य वाह्शब्दावयवस्य वकारस्य संप्रसारणसंज्ञकम् 'ऊठ्' भवतीत्यर्थः । तत्र ठकार इत्संज्ञकः । अनेन संप्रसारणे 'विश्व+ऊ+आह्+अस्' इति जाते

**संप्रसारणाच्च ६।१।८**

**संप्रसारणादचि पूर्वरूपमेकादेशः स्यात् । वृद्धिः । विश्वौहः इत्यादि ।**

संप्रसारणसंज्ञकाद् अचि परे पूर्वरूपमेकादेशो भवतीत्यर्थः । अनेन संप्रसारणसंज्ञकाद् उकाराद् आकारे परे पूर्वरूपमेकादेशे 'विश्व ऊह्+अस्' इत्यवस्थायाम् 'एत्येधत्यूठ्सु' इति वृद्धौ पदान्तसकारस्य रुत्वे विसर्गे 'विश्वौहः' इति रूपम् । एवं तृतीयादौ अजादौ विभक्तौ भसंज्ञायां संप्रसारणादिकं कार्यम्, हलादौ च ढत्वादिकार्यं बोध्यम् । तेन विश्वौहा, विश्ववाड्भ्याम्, इत्यादिसिद्धिः ।

**चतुरनडुहोरामुदात्तः ७।१।९८**

**अनयोराम् स्यात्सर्वनामस्थाने परे ।**

चतुर्-अनडुह्शब्दयोः 'आम्' स्यात्, सर्वनामस्थाने परे, स च उदात्तः स्यादित्यर्थः । अत्र अनडुह्शब्दात् सौ तस्य सर्वनामसंज्ञकत्वाद् अनेन सूत्रेण 'मिदचोऽन्त्यात्परः' इति सहकृतेन उकारात् पर आमि अनुबन्धलोपे 'अनडु+आह्' इति स्थिते यणि 'अनड्वाह्+स्' इति जाते

**सावनडुहः ७।१।८२**

**अस्य नुम् स्यात् सौ परे । अनड्वान् ।**

आच्छीनद्योरिति सूत्रादादित्यधिकारादवर्णात्परोऽयं नुम् । अतो विशेषविहितेनापि नुमा आम् न बाध्यते । सुलोपः । संयोगान्तलोपः । नुम्विधिसामर्थ्याद्वसुस्रंस्विति दत्वं न । संयोगान्तलोपस्यासिद्धत्वान्नलोपो न । अनड्वान् ।

अनडुह्शब्दस्य नुम् स्यात् सुविभक्तौ परे इत्यर्थः । अत्र सर्वनामस्थाने परे आम्, सर्वनामस्थानविशेषे सौ परे च नुम् विहितः, तस्मात्सामान्यस्य विशेषेण कथं न भवतीति चेद् उच्यते - 'आच्छीनद्योर्नुम्' इति सूत्राद् 'आत्' इत्यस्य अधिकाराद् अनडुहः अवर्णात् परो नुम् भवतीत्यर्थलाभः । तेन 'सावनडुहः' इति विशेषविहितेनापि नुमा 'चतुरनडुहोराम्-' इति सामान्यविहित आम् न बाध्यते, अवर्णात्परत्वेन विधीयमानं नुमं प्रति आम उपजीव्यत्वात् । उपजीव्यः, आश्रितः, उपजीवकः, आश्रयदाता, तयोः बाध्यबाधकभावविरहात् । तथा च

विशेषविहितेन 'अम् संबुद्धौ' इति अमा नुम् न बाध्यते, नुम उपजीव्यत्वेन, अमभावे नुमः प्रवृत्त्यसंभवेन च विरोधाभावात् । अनेन सूत्रेण नुमि 'अनड्वान्ह् + स्' इति जाते 'हल्ङ्याप्-' इति सुलोपः, 'संयोगान्तस्य-' इति हकारलोपश्च । ततो 'अनड्वान्' इति जाते नुमो नकारस्य 'वसुस्रंसु-' इति दत्वं स्यादिति तु न शङ्क्यम्, नुम्विधानसामर्थ्यात् । अन्यथा नुम्विधानमेव व्यर्थं स्यात् । एवं 'संयोगान्तस्य-' इति विहितस्य हकारलोपस्यासिद्धत्वात् 'नलोपः प्रातिपदिकान्तस्य' इति नलोपोऽपि न भवति ।

सम्बोधने सौ 'अनडुह्+स् ' इति स्थिते सम्बुद्धिसंज्ञायाम् 'चतुरनडुहोः' इति आमागमे प्राप्ते

**अम् सम्बुद्धौ ७।१।९९**

**चतुरनडुहोः । हे अनड्वन् ! । अनड्वाहौ । अनड्वाहः ।**

चतुर्-अनडुह्शब्दयोः अमागमः सम्बुद्धौ इत्यर्थः । अनेन अमागमे यणि 'अनड्वह् + स्' इति जाते 'सावनडुहः' इति नुमि 'हल्ङ्याप्-' इति सलोपे संयोगान्तलोपे च 'हे अनड्वन्' इति रूपम् । प्रथमा-द्वितीययोः द्विवचने 'अनडुह्+औ' इति स्थिते 'चतुरनडुहोः-' इति आमि, यणादेशे 'अनड्वाहौ' इति । जसि - अनड्वाहः । शसि तु सर्वनामस्थानत्वाभावाद् 'आम्' न भवति, तेन 'अनडुहः' इति रूपम् । टाविभक्तौ - 'अनडुहा' इति ।

**वसुस्रंसुध्वंस्वनडुहां दः ८।२।७२**

**सान्तवस्वन्तस्य स्रंसादेश्च दः स्यात्पदान्ते । अनडुद्भ्यामित्यादि । सान्तेति किम् ? विद्वान् । पदान्ते किम् ? स्रस्तम् । ध्वस्तम् ।**

सकारान्तवस्वन्तस्य स्रंस्-ध्वंस्-अनडुह्शब्दानाञ्च दकारान्त आदेशः स्यात् पदान्ते इति सूत्रार्थः । भ्याम्विभक्तौ 'अनडुह्+भ्याम्' इति जाते 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायाम् अनेन सूत्रेण हकारस्य दत्वम् । एवं भिसादौ हलादौ हकारस्य दकारो भवति । वस्वन्तस्य सान्तत्वेऽपि 'सान्तवस्वन्तस्य' इति वचनं 'विद्वान्' इत्यत्र नकारस्य दत्वं मा भूदिति, तस्य वस्वन्तत्वेऽपि अधुना सान्तत्वाभावात् । पदान्तग्रहणं स्रस्तम्, ध्वस्तम् इत्यत्र सकारस्य दत्ववारणार्थम् । 'तुरम्=त्वरितं साहयति' इति तुराषाट्, इन्द्रः । तुरासाह्शब्दात् सौ हल्ङ्यादिलोपे 'हो ढः' इति हस्य ढत्वे, ढकारस्य जश्त्वेन डकारे 'तुरासाड्' इत्यवस्थायाम्

**सहेः साडः सः ८।३।५६**

**साड्रूपस्य सहेः सस्य मूर्धन्यादेशः स्यात् । तुराषाट्, तुराषाड् । तुरासाहौ । तुराषाड्भ्यामित्यादि ।**

अनेन सकारस्य मूर्धन्यादेशे (षत्वे) 'वाऽवसाने' इति पाक्षिके चर्त्वे 'तुराषाट्' इति चर्त्वाभावे 'तुराषाड्' इति रूपद्वयम् । औविभक्तौ ढत्वाभावात् 'तुरासाहौ' इति, जसि - 'तुरासाहः' इति । एवम् अजादौ विभक्तौ सर्वत्र ढत्वाभावः । भ्यामादौ हलादौ च 'स्वादिष्वसर्व-' इति पदसंज्ञायां ढत्वजश्त्वयोः 'सहेः साडःसः' इति षत्वे 'तुराषाड्भ्याम्', 'तुराषाड्भिः' इत्यादि ।

## वकारान्तशब्दनिरूपणम्–

**दिव औत् ७।१।८४**

**दिविति प्रातिपदिकस्यौत्स्यात् सौ । सुद्यौः । सुदिवौ ।**

'औत्' इति तकार उच्चारणार्थः, तस्माद् आदेशे न श्रूयते । यद्यपि दिव्शब्दः स्त्रीलिङ्गः, तथापि 'सु-शोभना द्यौः यस्य' इति विग्रहे बहुव्रीहिसमासे सति पुँल्लिङ्गः । सुदिव्शब्दात् सौ हल्ङ्यादिलोपं प्रबाध्य परत्वाद् अनेन सूत्रेण वकारस्य औत्वे, यणि च, सकारस्य रुत्वे विसर्गे च 'सुद्यौः' इति रूपम् । सुदिव्शब्दाद् भ्याम्विभक्तौ 'सुदिव्+भ्याम्' इति स्थिते पदसंज्ञायाम्

**दिव उत् ६।१।१३१**

**पदान्ते । सुद्युभ्याम् - इत्यादि ।**

दिव्शब्दस्य उकार अन्तादेशः स्यात्, पदान्ते इत्यर्थः । अनेन वकारस्य उत्वे 'सुद्युभ्याम्' इति । भिसादौ हलादौ पदसंज्ञायाम् अनेन उत्वं भवति

## रेफान्तशब्दनिरूपणम्–

**चत्वारः । चतुरः । चतुर्भिः । चतुर्भ्यः ।**

चतुर्-शब्दस्य नित्यबहुवचनान्तत्वात् तस्मात् प्रथमाया बहुवचने जसि 'चतुर् + अस्' इति स्थिते सर्वनामसंज्ञायां 'चतुरनडुहोरामुदात्तः' इति आमागमे यणि सकारस्य रुत्वविसर्गौ । शसि सर्वनामसंज्ञाया अभावाद् 'आम्' न । आम्विभक्तौ 'चतुर्+आम्' इति स्थिते

**षट्चतुर्भ्यश्च ७।१।५५**

**एभ्य आमो नुडागमः स्यात् ।**

षट्संज्ञकेभ्यः चतुर्शब्दाच्च विहितस्य आमो नुडागमः स्यादित्यर्थः । अनेन नुडागमे - 'चतुर्+नाम्' इति जाते

**रषाभ्यां नो णः समानपदे ८।४।१**

रेफषकाराभ्यां परस्य नस्य णः स्यात्, एकपदे इत्यर्थः । अनेन अत्र नस्य णत्वे 'अचो रहाभ्यां द्वे' इति णस्य द्वित्वे च 'चतुर्ण्णाम्' इति । सुपि 'चतुर् + सु' इति स्थिते पदसंज्ञायां 'खरवसानयो...' इति रेफस्य विसर्गे प्राप्ते

**रोः सुपि ८।३।१६**

**रोरेव विसर्जनीयः सुपि । चतुर्षु ।**

सुपि परे रुसम्बन्धिः यो रेफस्तस्यैव विसर्गो न अन्यस्य इत्यर्थः । अनेन नियमेन अत्र विसर्गनिषेधे 'आदेशप्रत्यययोः' इति सस्य षत्वम् ।

## मकारान्तशब्दनिरूपणम् -

**मो नो धातोः ८।२।६४**

**पदान्ते । प्रशान् । प्रशामौ ।**

मकारान्तस्य धातोः मकारस्य नकारादेशो भवति, पदान्ते इत्यर्थः । प्रशाम्शब्दात् सौ हल्ङ्यादिलोपे अनेन मकारस्य नत्वे 'प्रशान्' इति रूपम् ।

**किमः कः ७।२।१०३**

**विभक्तौ । कः । कौ । के । इत्यादि ।**

(किम्शब्दस्य 'क' इत्यादेशः स्याद्विभक्तौ परे इत्यर्थः । किम्शब्दात् सौ अनेन कादेशे विभक्तेः सकारस्य रुत्वविसर्गौ । औविभक्तौ कादेशे वृद्धिः । जसि कादेशे 'क+अस्' इति स्थिते किम्शब्दस्य सर्वनामत्वात् 'जसः शी' इति 'शी' इत्यादेशः, ततो गुणः । शेषं सर्वशब्दवत् ।)

**इदमो मः ७।२।१०८**

**सौ । त्यदाद्यत्वापवादः ।**

इदम्-शब्दस्य मकारोऽन्तादेशः स्यात् सौ परे इति सूत्रार्थः ।

**इदोऽय् पुंसि ७।२।१११**

**इदम इदोऽय् सौ पुंसि । अयम् । त्यदाद्यत्वे-**

इदम्शब्दस्य य 'इद्' भागः तस्य 'अय्' इत्यादेशः स्यात्, सुविभक्तौ परे पुँल्लिङ्गे इति सूत्रार्थः । अनेन अत्र अयादेशे हल्ङ्यादिलोपे 'अयम्' इति रूपम् । इदम्शब्दाद् औविभक्तौ 'इदम्+औ' इति जाते 'त्यदादीनामः' इति अकारान्तादेशे 'इद+अ+औ' इत्यवस्थायाम् -

**अतो गुणे ६।१।९७**

**अपदान्तादतो गुणे पररूपमेकादेशः ।**

अपदान्ताद् अकाराद् गुणसंज्ञके (अ-ए-ओवर्णेषु कस्मिन्नपि) परे पररूपमेकादेशः स्यादित्यर्थः । अनेन अत्र सवर्णदीर्घं बाधित्वा पररूपे 'इद+औ' इति स्थिते

**दश्च ७।२।१०९**

**इदमो दस्य मः स्याद्विभक्तौ । इमौ । इमे । त्यदादेः सम्बोधनं नास्तीत्युत्सर्गः ।**

अनेन दकारस्य मकारे 'इम+औ' इति जाते वृद्धौ 'इमौ' इति रूपम् । जसि अत्वे 'इद+अ+अस्' इति स्थिते 'अतो गुणे' इति पररूपे 'इद+अस्' इति जाते अनेन दकारस्य मत्वे इदम्शब्दस्य सर्वनामत्वात् 'जसः शी' इति शीभावे 'इम+ई' इत्यवस्थायां गुणे 'इमे' इति रूपम् । त्यदादिगणपठितानां सम्बोधनं न भवतीति कथनं प्रचुरप्रयोगादर्शनात् सामान्यम्, विशेषे तु भवत्वेव 'हे स' इति भाष्यप्रयोगदर्शनात् ।

**अनाप्यकः ७।२।११२**

**अककारस्य इदम इदोऽनापि विभक्तौ । आबिति प्रत्याहारः । अनेन ।**

ककाररहितस्य 'इदम्' शब्दस्य य 'इद्'भागः तस्य 'अन्' आदेशः स्यात्, आपि विभक्तौ परे । 'आप्' इति प्रत्याहारः, 'टा' इत्यस्य 'आ' इत्यारभ्य सुपः पकारपर्यन्तम् । 'इदम्'शब्दात् टाविभक्तौ अत्वे पररूपे च 'इद+आ' इति स्थिते अनेन सूत्रेण 'इद्'भागस्य 'अन्'आदेशे 'अन+आ' इति जाते 'टाङसिङसाम्' इति इनादेशे 'अन+इन' इत्यवस्थायां गुणे 'अनेन' इति रूपम् ।

**हलि लोपः ७।२।११३**

**अककारस्य इदम इदो लोप आपि हलादौ ।**

ककाररहितस्य 'इदम्'शब्दस्य 'इद्'भागस्य लोपः स्यात्, आपि हलादौ विभक्तौ परे इत्यर्थः । 'इदम्'शब्दात् भ्याम्विभक्तौ अत्वे पररूपे 'इद+भ्याम्' इति स्थिते 'अनाप्यकः' इति सूत्रं बाधित्वा अनेन सूत्रेण 'इद्' भागस्य लोपः । अत्र 'अलोऽन्त्यस्य' इति सहकृतेन 'इद्'भागस्य दकारस्य लोपः कथं न स्यादिति शङ्कायामाह-

**नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे (वा)**

(अभ्यासविकारं वर्जयित्वाऽनर्थकेऽलोऽन्त्यविधिः न भवतीत्यर्थः । अनेन वार्तिकेन अत्र अलोऽन्त्यविधिनिषेधात् सर्वस्य 'इद्' भागस्य लोपः । ततः 'अ+भ्याम्' इति जाते अकारमात्रस्य अदन्तत्वाभावात् अकारान्तसमुदाये एवादन्तत्वव्यवहारात् 'सुपि च' इति दीर्घेऽप्राप्ते-

**आद्यन्तवदेकस्मिन् १।१।२१**

**एकस्मिन्क्रियमाणं कार्यमादाविवान्त इव च स्यात् । सुपि चेति दीर्घः । आभ्याम् ।**

तदादेः तदन्तस्य च क्रियमाणं कार्यं तदादौ तदन्त इव च एकस्मिन् असहायेऽपि स्यादित्यर्थः । अनेन अतिदेशसूत्रसहकृतेन 'सुपि च' इति दीर्घे 'आभ्याम्' इति रूपम् । 'इदम्'शब्दाद् भिस्विभक्तौ अत्वे पररूपे 'हलि लोपः' इति 'इद्'भागस्य लोपे 'अ+भिस्' इति जाते 'अतो भिस ऐस्' इति प्राप्ते -

**नेदमदसोरकोः ७।१।११**

**अककारयोरिदमदसोर्भिस ऐस् न स्यात् । एभिः । अस्मै । एभ्यः २ । अस्मात् । अस्य । अनयोः २ । एषाम् । अस्मिन् । एषु ।**

ककाररहितयोः इदम्-अदस्-शब्दयोः 'भिस्' इत्यस्य ऐस् न भवतीत्यर्थः । अनेन ऐसादेशस्य निषेधे 'बहुवचने झल्येत्' इति एत्वे, 'एभिः' इति । ङेविभक्तौ त्यदाद्यत्वे पररूपत्वे 'इद+ए' इति स्थिते 'सर्वनाम्नः स्मै' इति 'स्मै' इत्यादेशे हल्परत्वाद् 'हलि लोपः' इति 'इद्'भागस्य लोपे 'अस्मै' इति रूपम् । भ्यस्विभक्तौ अत्वे पररूपत्वे च कृते हलि लोपः, ततः 'बहुवचने' इति एत्वम् । ङसिविभक्तौ अत्वे, पररूपे 'टाङसिङसाम्' इति 'स्यः' ततो हलि लोपः । ओसि अत्वे पररूपे 'अनाप्यकः' इति अनादेशे 'अन+ओस्' इत्यत्र 'ओसि च' इति एत्वे अयादेशः । आमि अत्वे पररूपे 'आमि सर्वनाम्नः' इति सुटि, हलि लोपः, तत एत्वं षत्वञ्च । ङिविभक्तौ-अस्मिन्, सुपि- एषु इति रूपम् ।

**द्वितीयाटौस्स्वेनः २।४।३४**

**द्वितीयायां टौसोश्च परत इदमेतदोरेनादेशः स्यादन्वादेशे । किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः । यथा–'अनेन व्याकरणमधीतम्', एनं छन्दोऽध्यापयेति । अनयोः पवित्रं कुलम्, एनयोः प्रभूतं स्वमिति । एनम् । एनौ । एनान् । एनेन । एनयोः २ ।**

# अभ्यासः

## १. अधस्तनानां प्रश्नानामुत्तराणि दत्त

(क) 'हो ढः' इति सूत्रेण कुत्र हस्य ढत्वं भवति ?

(ख) व्यपदेशिवद्भावशब्दस्य कोऽभिप्रायः ?

(ग) 'इग्यणः सम्प्रसारणम्' इति सूत्रं किं करोति ?

(घ) 'चतुर्षु' इत्यत्र रेफस्य विसर्गः कथं न भवति ?

(ङ) 'अनाप्यकः' इति सूत्रे 'आप्'शब्देन किं गृह्यते ?

(च) 'एभिः' इत्यत्र 'भिसः' 'ऐस्'आदेशः केन वार्यते ?

## २. अधो लिखितानां सूत्राणामर्थं लिखत

(क) एकाचो बशो भष् झषन्तस्य स्ध्वोः

(ख) वाह ऊठ्

(ग) वसुस्रंसुध्वंस्वनडुहां दः

(घ) इदोऽय् पुंसि

(ङ) अनाप्यकः

(च) आद्यन्तवदेकस्मिन् ।

## ३. इमानि रूपाणि साधयत

धुक्, विश्वौहः, तुराषाट्, चतुर्णाम्, इमौ, अनेन, अनयोः ।

## ४. अत्र विभक्तिवचने दर्शयत

दुहः, अनडुहः, सुद्यौः, चतुरः, प्रशान्, के, एनान् ।

## ५. उपयुक्तविकल्पं योजयत

(क) 'सम्प्रसारणाच्च' इति सूत्रेण ............ भवति । (पूर्वरूपमेकादेशः, पररूपमेकादेशः)

(ख) 'अनडुह्' शब्दस्य सम्बुद्धौ ............ भवति । (अमागमः, आमागमः)

(ग) 'वसुस्रंसु-' सूत्रेण दत्वम् ............ भवति । (हकारस्य, अन्त्यस्य)

(घ) 'चतुर्+आम्' इति स्थिते ............ सूत्रेण नुड् भवति । (ह्रस्वनद्यापो नुट्, षट्चतुर्भ्यश्च)

(ङ) 'इदम्+सु' इत्यत्र 'त्यदादीनामः' इति अत्वं ............ । (भवति, न भवति)

(च) 'दश्च' इति इदमो दस्य मत्वम् ............ । (अजादौ विभक्तौ, विभक्तौ)

(छ) 'हलि लोपः' इति ............ लोपः । (इदम्शब्दस्य, इद्भागस्य, मकारस्य)

६. 'आद्यन्तवदेकस्मिन्' इति सूत्रस्य कोऽभिप्रायः ? इति समाधाय उपजीव्योपजीवकयोर्विरोधो भवति न वेति लिखत ।

७. अनडुह्-शब्दस्य, किम्-शब्दस्य च सर्वासु विभक्तिषु रूपाणि लिखत ।

**विशेषाभ्यासः**

१. शब्दरूपतालिका–

**विश्ववाह्-शब्दस्य रूपाणि**

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | विश्ववाट्-ड् | विश्ववाहौ | विश्ववाहः |
| द्वितीया | विश्ववाहम् | विश्ववाहौ | विश्वौहः |
| तृतीया | विश्वौहा | विश्ववाड्भ्याम् | विश्ववाड्भिः |
| चतुर्थी | विश्वौहे | विश्ववाड्भ्याम् | विश्ववाड्भ्यः |
| पञ्चमी | विश्वौहः | विश्ववाड्भ्याम् | विश्ववाड्भ्यः |
| षष्ठी | विश्वौहः | विश्वौहोः | विश्वौहाम् |
| सप्तमी | विश्वौहि | विश्वौहोः | विश्ववाट्त्सु-सु |
| सम्बोधनम् | हे विश्ववाट्-ड् | हे विश्ववाहौ | हे विश्ववाहः |

एवम् -'भारं वहति, वाहयति वा' इत्यर्थे 'भारवाह्' शब्दस्य रूपाणि

**इदम्-शब्दस्य रूपाणि**

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अयम् | इमौ | इमे |
| द्वितीया | इमम्-एनम् | इमौ-एनौ | इमान्-एनान् |
| तृतीया | अनेन-एनेन | आभ्याम् | एभिः |
| चतुर्थी | अस्मै | आभ्याम् | एभ्यः |
| पञ्चमी | अस्मात्-द् | आभ्याम् | एभ्यः |
| षष्ठी | अस्य | अनयोः-एनयोः | एषाम् |
| सप्तमी | अस्मिन् | अनयोः-एनयोः | एषु |

# नकारान्तशब्दनिरूपणम्

## राजा ।

राजन्-शब्दात् सुविभक्तौ 'राजन्+स्' इति स्थिते हल्ङ्यादिलोपं बाधित्वा परत्वात् "सर्वनामस्थाने चासम्बुद्धौ" इति उपधादीर्घे ततो हल्ङ्यादिलोपे "न लोपः प्रातिपदिकान्तस्य" इति नकारस्य लोपे 'राजा' इति रूपम् । सम्बोधने- राजन्-शब्दात् सौ 'हे राजन्+स्' इति स्थिते हल्ङ्यादिलोपे नकारस्य पदान्तत्वात् प्रातिपदिकान्तत्वात् च "न लोपः-" इति लोपे प्राप्ते-

**न ङिसम्बुद्ध्योः ८।२।८**

**नस्य लोपो न ङौ सम्बुद्धौ च । हे राजन् !**

**अनेन सूत्रेण नलोपस्य निषेधे 'हे राजन्' इति रूपम् ।**

**ङावुत्तरपदे प्रतिषेधो वक्तव्यः (वा.) ब्रह्मनिष्ठः । राजानौ । राजानः । राजानम् । राजानौ । जञोर्ज्ञः- राज्ञः ।**

उत्तरपदे परे पूर्वपदस्थो यो ङिः, तस्मिन्परे "न ङिसम्बुद्ध्योः" इति प्राप्तस्य निषेधस्य प्रतिषेधो वक्तव्य इति वार्तिकार्थः। तेन ब्रह्मणि निष्ठा यस्य इति विग्रहे 'ब्रह्मन् ङि निष्ठा इति स्थिते समासे कृते निष्ठाशब्दस्य उत्तरपदस्थत्वात् पूर्वपदस्थनकारस्य लोपो भवत्येव । राजन्शब्दाद् औविभक्तौ 'राजन्+औ' इत्यत्र 'राजन्' इत्यस्य पदत्वाभावान् नलोपो न, 'सर्वनामस्थाने-' इति उपधादीर्धः । जसि-राजानः इति । शसि- 'राजन्+अस्' इति स्थिते भसंज्ञायाम् "अल्लोपोऽनः" इति अकारलोपे 'राज्+न्+अस्' इति जाते नकारस्य श्चुत्वेन ञकारे 'ज्+ञ्' इत्यनयोः संयोगे 'ज्ञ्' इति जाते पदान्तसकारस्य रुत्वे विसर्गे च 'राज्ञः' इति रूपम् ।

**नलोपः सुप्-स्वर-संज्ञा-तुग्विधिषु कृति ८।२।२**

**सुब्विधौ स्वरविधौ संज्ञाविधौ कृति तुग्विधौ च नलोपोऽसिद्धो नान्यत्र राजाश्व इत्यादौ । इत्यसिद्धत्वादात्वमेत्वमैस्त्वं च न । राजभ्याम् । राजभिः । राजभ्यः । राज्ञि, राजनि । यज्वा । यज्वानौ । यज्वानः ।**

सुबाश्रयविधौ, स्वरे विधेये, संज्ञायां विधेयायाम्, कृति परे यः तुक् तस्मिन्विधेये नलोपोऽसिद्धो भवति, अन्यत्र न भवतीत्यर्थः । यथा- 'राज्ञोऽश्व' इति विग्रहे षष्ठीसमासे अन्तर्वर्तिविभक्तित्वेन पदत्वान् नलोपे 'राज+अश्व' इति स्थिते "अकः सवर्णे-" इति दीर्घो भवत्येव, तस्य सुबादिविधित्वाभावात् । किन्तु

'राजन्+भ्याम्' इत्यादौ "स्वादिष्वसर्वनामस्थाने" इत्यनेन पदत्वान् नलोपे जाते 'राज+भ्याम्' इति स्थिते "सुपि च" इति प्राप्तदीर्घस्य सुब्विधित्वात् "नलोपः सुप्-" इति नलोपस्यासिद्धत्वेन अप्राप्तिरिति बोध्यम् । तथा चोक्तम्- आत्वम् दीर्घः, 'राजभ्याम्' इत्यत्र, 'राजभिः' इत्यत्र च "बहुवचने-" इति एत्वं न भवतीति । राजन्शब्दाद् ङौ तु 'राजन्+इ' इति स्थिते "विभाषा ङिश्योः" इति वैकल्पिके अल्लोपे 'राज्ञि-राजनि' इति रूपद्वयम् । यज्वन्शब्दस्यापि सुटि (सु-औ-जस्-अम्-औट्विभक्तिषु) राजन्शब्दवद्रूपाणि भवन्ति, शसि तु- 'यज्वन्+अस्' इति स्थिते भसंज्ञायाम् अल्लोपे प्राप्ते-

**न संयोगाद्वमन्तात् ६।४।१३७**

**व-मान्तसंयोगादनोऽकारस्य लोपो न । यज्वनः । यज्वना । यज्वभ्याम् । ब्रह्मणः । ब्रह्मणा ।**

वकारमकारान्तसंयोगात्परस्य 'अन्' इत्यस्याकारस्य लोपो न स्यादिति सूत्रार्थः । अनेन अत्र अल्लोपनिषेधे पदान्तसकारस्य रुत्वे विसर्गे 'यज्वनः' इति रूपम् । एवं यज्वना इत्यादावपि । भ्यामादौ पदसंज्ञायां नलोपः । मकारान्तसंयोगस्योदाहरणम्- 'ब्रह्मणः' इति । ब्रह्मन्शब्दस्य यज्वन्शब्दवद्रूपाणि भवन्ति । वृत्रहन्शब्दः 'वृत्रं हतवान्' इत्यर्थे क्विप्प्रत्ययान्तः कृदन्तत्वात्प्रातिपदिकत्वे सौ 'वृत्रहन्+स्' इति स्थिते "सर्वनामस्थाने"- इति दीर्घे प्राप्ते-

**इन्-हन्-पूषार्यम्णां शौ ६।४।१२**

**एषां शावेवोपधाया दीर्घः ।**

इन्-हन्-पूषन्-अर्यमन् इत्यन्तानां 'शि' इत्येतस्मिन् परे एव उपधादीर्घो नान्यत्र इत्यर्थः । नियमार्थं सूत्रमिदम् । अनेन दीर्घनिषेधे प्राप्ते-

**सौ च ६।४।१३**

**इन्नादीनामुपधाया दीर्घोऽसम्बुद्धौ सौ । वृत्रहा । हे वृत्रहन् ।**

अनेनात्र उपधादीर्घे सुलोपे, नलोपे च कृते 'वृत्रहा' इति रूपम् । सम्बोधनैकवचने हल्ङ्यादिलोपे सति नलोपे प्राप्ते "न ङिसम्बुद्ध्योः" इति निषेधे- 'हे वृत्रहन्' इति । औविभक्तौ 'वृत्रहन्+औ' इति स्थिते-

**एकाजुत्तरपदे णः ८।४।१२**

**एकाजुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य णत्वं स्यात् । वृत्रहणौ । वृत्रहणः ।**

एकः अच् यस्मिन्, तदुत्तरपदं यस्य तस्मिन्समासे पूर्वपदस्थनिमित्तात्परस्य प्रातिपदिकान्तस्य, नुमः, विभक्तिस्थस्य च नस्य णत्वं स्यादित्यर्थः । अनेनात्र नस्य णत्वे 'वृत्रहणौ' इति । एवं 'वृत्रहणः' । शसि 'वृत्रहन्+अस्' इति स्थिते भसंज्ञायाम् अल्लोपे 'वृत्रह्न्+अस्' इति जाते-

**हो हन्तेर्ञ्णिन्नेषु ७।३।५४**

**ञिति णिति प्रत्यये नकारे च परे हन्तेर्हस्य कुत्वं स्यात् ।**

अनेन हकारस्य कुत्वेन घकारे पदान्तसकारस्य रुत्वे विसर्गे 'वृत्रघ्नः' इति । एवं शार्ङ्गिन्-यशस्विन्-अर्यमन्-पूषनादिशब्दानां सिद्धिः ।

**मघवा बहुलम् ६।४।१२८**

**मघवन्-शब्दस्य वा तृ इत्यन्तादेशः । ऋ इत् ।**

'मघवन्' इति प्रातिपदिकस्य अनेन 'तृ' इत्यन्तादेशः, ऋकारस्येत्संज्ञायां लोपश्च, ततः सुविभक्तौ 'मघवत्+स्' इति स्थिते सर्वनामस्थानसंज्ञायाम्-

**उगिदचां सर्वनामस्थानेऽधातोः ७।१।७०**

**अधातोरुगितो नलोपिनोऽञ्चतेश्च नुम् स्यात् सर्वनामस्थाने परे । मघवान् । इह उपधादीर्घे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वं न भवति बहुलग्रहणात् । मघवन्तौ । मघवतः । मघवता । तृत्वाभावे- मघवा । सुटि राजवत् ।**

उक्=उ, ऋ, लृ इति, तेषु कश्चिदपि इत्इत्संज्ञकः येषां ते उगितः । तथा च धातुभिन्नस्य उगितः, नलोपिनः अञ्च्धातोश्च नुमागमः सर्वनामस्थानप्रत्यये परे इत्यर्थः । अत्र "मिदचोऽन्त्यात्-" इति सहकृतेन अनेन सूत्रेण नुमागमे हल्ङ्यादिलोपे तकारस्य "संयोगान्तस्य..." इति लोपे "सर्वनामस्थाने-" इति उपधादीर्घः। अत्र उपधादीर्घे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वं तु न भवति, "मघवा बहुलम्" इत्यत्र बहुलग्रहणात् ।

मघवन्शब्दास्य 'तृ' इत्यन्तादेशे औविभक्तौ नुमि "नश्चापदान्तस्य-" इत्यनुस्वारे "अनुस्वारस्य ययि-" इति परसवर्णे मघवन्तौ । शसि सर्वनामत्वाभावाद् नुमागमो न भवति, अतः 'मघवतः' इति रूपम् । 'तृ' इत्यन्तादेशाभावपक्षे- मघवन्शब्दात् सौ सुलोपे "सर्वनामस्थाने-" इति दीर्घे "न लोपः-" इति नकारलोपे 'मघवा' इति रूपम् । औविभक्तौ- 'मघवानौ' इति । शसि 'मघवन्+अस्' इति स्थिते भसंज्ञायाम्-

**श्व-युव-मघोनामतद्धिते ६।४।१३३**

**अन्नन्तानां भानामेषामतद्धिते परे संप्रसारणं स्यात् । मघोनः । मघवभ्याम् इत्यादि । एवं श्वन्, युवन् ।**

अन्नन्तानां भसंज्ञकानां श्वन्-युवन्-मघवन्शब्दानां तद्धितभिन्ने प्रत्यये परे संप्रसारणं स्यादित्यर्थः । अत्र अन्नन्तत्वविशेषणं मघवन्-शब्दस्य त्रादेशपक्षे संप्रसारणनिवृत्त्यर्थम् । अनेनात्र वकारस्य संप्रसारणे उकारे 'मघ+उ+अन्' इति जाते "संप्रसारणाच्च" इति पूर्वरूपे "मघ+उन्" इति जाते "आद् गुणः" इति गुणे

पदान्तसकारस्य रुत्वे विसर्गे 'मघोनः' इति रूपम् । भ्यामादौ 'मघवन्+भ्याम्' इति स्थिते पदसंज्ञायां नलोपे 'मघवभ्याम्' इत्यादि रूपं बोध्यम् । श्वन्-शब्दस्य- श्वा, श्वानौ, श्वानः इति रूपाणि । युवन्- शब्दस्य युवा, युवानौ, युवानः इति रूपाणि शसि- 'युवन्+अस्' इति स्थिते भसंज्ञायां "श्वयुवमघोनाम्-" इति वकारस्य संप्रसारणे पूर्वरूपे 'यु+उन्' इत्यत्र सवर्णदीर्घे 'यूनस्' इति जाते "श्वयुव-" इति यकारस्यापि संप्रसारणे प्राप्ते-

**न संप्रसारणे संप्रसारणम् ६।१।३७**

**सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न स्यात् । इति यकारस्य न संप्रसारणम् । यूनः । युवभ्यामित्यादि । अर्वा । हे अर्वन् ।**

अनेनात्र संप्रसारणनिषेधे पदान्तसकारस्य रुत्वे विसर्गे 'यूनः' इति रूपम् । अर्वन्-शब्दात् सौ हल्ङ्यादिलोपे उपधादीर्घे सति नलोपः । सम्बोधने सौ "न ङिसम्बुद्ध्योः" इति नलोपनिषेधः । औविभक्तौ 'अर्वन्+औ' इति स्थिते-

**अर्वणस्त्रसावनञः ६।४।१२७**

**नञा रहितस्यार्वन्नित्यस्य 'तृ' इत्यन्तादेशः स्यात्, न तु सौ । अर्वन्तौ । अर्वन्तः । अर्वतः । अर्वद्भ्याम् ।**

अनेनात्र 'तृ' इत्यन्तादेशेऽनुबन्धलोपे उगित्त्वात् "उगिदचाम्-" इति नुमि नुमो नकारस्य "नश्चा-पदान्तस्य-" इति अनुस्वारः, परसवर्णश्च । शसादौ अजादौ विभक्तौ सर्वनामस्थानत्वाभावाद् नुम् न भवति, अतः अर्वतः, अर्वता इति । भ्यामादौ "स्वादिष्वसर्वनामस्थाने" इति पदत्वात् तकारस्य जश्त्वेन दकारः ।

**पथिमथ्यृभुक्षामात् ७।१।८५**

एषामाकारोऽन्तादेशः स्यात्, सौ परे ।

पथिन्-मथिन्-ऋभुक्षिन्-शब्दानामन्त्यस्य (नकारस्य) आकारादेशः सौ परे इत्यर्थः । पथिन्शब्दात् सुविभक्तौ 'पथिन्+स्' इति स्थिते अनेन नकारस्य आत्वे 'पथि+आ+स्' इति जाते-

**इतोऽत्सर्वनामस्थाने ७।१।८६**

**पथ्यादेरिकारस्याकारः स्यात्सर्वनामस्थाने ।**

पथिन्-मथिन्-ऋभुक्षिन्-शब्दानाम् इकारस्य अकारः स्यात् सर्वनामस्थाने परे इत्यर्थः । अनेन इकारस्य अत्वे 'पथ+आ+स्' इति जाते-

**थो न्थः ७।१।८७**

**पथिमथोस्थस्य न्थादेशः सर्वनामस्थाने । पन्थाः । हे पन्थाः । पन्थानौ । पन्थानः ।**

पथिन्-मथिन्-शब्दयोः थकारस्य 'न्थ' आदेशः स्यादित्यर्थः । अनेन न्थादेशे 'पन्थ+आ+स्' इत्यवस्थायां सवर्णदीर्घे रुत्वविसर्गौ पन्था इति रूपं सिद्ध्यति । औविभक्तौ 'पथिन्+औ' इति स्थिते "इतोऽत्-" इति इकारस्य अत्वे "थो न्थः" इति न्थादेशे 'पन्थन्+औ' इति जाते "सर्वनामस्थाने-" इति उपधादीर्घः । एवं 'पन्थानः' इत्यपि । शसि तु 'पथिन्+अस्' इति स्थिते सर्वनामस्थानत्वाभावाद् अत्वं न्थादेशश्च न, तत्र भसंज्ञायाम्-

**भस्य टेर्लोपः ७।१।८८**

**भसंज्ञकस्य पथ्यादेष्टेर्लोपः स्यात् । पथः । पथिभ्याम् । पथिभ्यः । एवं मन्थाः, ऋभुक्षाः ।**

अनेन 'पथिन्' इत्यस्य टेः ('इन्' इत्यस्य) लोपे सकारस्य रुत्वविसर्गौ । भ्यामादौ पदसंज्ञायां नलोपः । एवमेव मथिन्-शब्दात् सौ पूर्ववद् अकारोऽन्तादेशः, इकारस्य अकारः, थस्य न्थादेशश्च ।

**ष्णान्ता षट् १।१।२४**

**षान्ता नान्ता च संख्या षट्संज्ञा स्यात् । पञ्च २ । पञ्चभिः । पञ्चभ्यः २ । "षट्चतुर्भ्यश्चे" ति नुट् ।**

अत्र संख्याशब्देन 'पञ्च, षड्' इति प्रसिद्धसंख्याबोधकशब्दानामेव ग्रहणं न तु "बहुगण-" इति संख्यासंज्ञकानाम्, तत्र षान्तत्वस्य नान्तत्वस्य चासम्भवात् । पञ्चन्-शब्दस्य नित्यबहुवचनान्तत्वात् तस्मात् जसि अनेन षट्संज्ञायां "षड्भ्यो लुक्" इति जसो लुकि नलोपः । शस्विभक्तौ अपि एवम् । हलादौ विभक्तौ पदसंज्ञायां नलोपः । आमि 'पञ्चन्+आम्' इति स्थिते 'षट्चतुर्भ्यश्च' इति नुडागमे 'पञ्चन्+नाम्' इति जाते-

**नोपधायाः ६।४।७**

**नान्तस्योपधाया दीर्घो नामि । पञ्चानाम् । पञ्चसु ।**

अनेन उपधादीर्घे नलोपे 'पञ्चानाम्' इति ।

**अष्टन आ विभक्तौ ७।२।८४**

**अष्टन्-शब्दस्याऽऽत्वं हलादौ ।**

**अष्टाभ्य औश् ७।१।२१**

**कृताकारादष्टनो जश्शसोरौश् । 'अष्टभ्य' इति वक्तव्ये कृतात्व-निर्देशो जश्शसोर्विषये आत्वं ज्ञापयति । अष्टौ २ । अष्टाभिः । अष्टाभ्यः २ । अष्टानाम् । अष्टासु । आत्वाभावे- अष्ट, पञ्चवत् ।**

नकारस्यात्वे कृते सति यः अष्टाशब्दस्तस्मात्परस्य जश्शसोः 'औश्'- इत्यादेशः स्यादित्यर्थः । यद्यपि "अष्टन आ विभक्तौ" इत्यत्र कृताकारनिर्देशः जश्शसोर्विषयेऽपि आत्वं बोधयति । अष्टन्-शब्दोऽपि पञ्चन्शब्दवन् नित्यं बहुवचनान्तः, तस्मात् जसि 'अष्टन्+अस्' इति स्थिते "अष्टन आ विभक्तौ" इति नकारस्य आत्वे सवर्णदीर्घे 'अष्टा+अस्' इति जाते "अष्टाभ्य-" इति 'अस्' इत्यस्य 'औश्' इत्यादेशेऽनुबन्धलोपे 'अष्टा+औ' इत्यत्र वृद्धौ 'अष्टौ' इति । शसि- एवमेव 'अष्टौ' इति रूपम् । हलादौ विभक्तौ नकारस्य आत्वे सवर्णदीर्घे- अष्टाभिः, अष्टाभ्यः इत्यादि । आमि 'अष्टन्+आम्' इति स्थिते "ष्णान्ता षट्" इति षट्संज्ञायां "षट्चतुर्भ्यश्च" इति नुटि 'अष्टन्+नाम् इति जाते "अष्टन आ-" इति नकारस्य आत्वे सवर्णदीर्घे 'अष्टानाम्' इति रूपम् । "अष्टनो दीर्घात्" इति सूत्रे दीर्घग्रहणाज्ज्ञापकाद् अष्टन आत्वं वैकल्पिकम् । तस्मात्तदभावपक्षे- अष्ट, अष्ट, अष्टभिः इति पञ्चन्-शब्दवद् रूपाणि ।

## जकारान्तशब्दनिरूपणम्-

**ऋत्विग्- दधृक्-स्रग्-दिगुष्णिगञ्चु-युजि-क्रुञ्चां च ३।२।५९**

**एभ्यः क्विन् । अञ्चेः सुप्युपपदे । युजि क्रुञ्चोः केवलयोः । क्रुञ्चेर्न लोपाभावश्च निपात्यते । कनावितौ ।**

ऋत्विज्-दधृष्-स्रज्-दिश्-उष्णिह्-अञ्च्-युज्-क्रुञ्च्-शब्दाः क्विन्प्रत्ययान्ता निपात्यन्ते इत्यर्थः । 'अञ्च्' इत्यस्मात् सुबन्तोपपदात्, 'युज्-क्रुञ्च्' इत्यनयोः केवलयोः, उपपदरहितयोः क्विन्प्रत्ययः । 'क्विन्' इत्यत्र ककार-नकारौ इत्संज्ञकौ भवतः । इकार उच्चारणार्थः । ऋतुशब्दोपपदाद् यज्धातोः अनेन सूत्रेण क्विन्प्रत्यये-

**कृदतिङ् ३।१।९३**

**अत्र धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात् ।**

"धातोः" इति सूत्रस्याधिकारे विहितेषु प्रत्ययेषु तिङ्भिन्नप्रत्ययानां कृत्संज्ञा भवतीत्यर्थः । अनेन क्विन्प्रत्ययस्य कृत्संज्ञायां ककारस्य "लशक्वतद्धिते" इति नकारस्य 'हलन्त्यम्" इति इत्संज्ञायां लोपे च कृते, इकारस्य उच्चारणार्थत्वाद् वकार एव अवशिष्टः । तस्य वकारस्य "अपृक्त एकाल्प्रत्ययः" इति अपृक्त-संज्ञायाम्-

**वेरपृक्तस्य ६।१।६७**

**अपृक्तस्य वस्य लोपः ।**

अनेन वकारस्य लोपे "ऋतु+यज्' इति जाते "वचिस्वपि-" इति यकारस्य संप्रसारणे पूर्वरूपे 'ऋतु+इज्' इत्यत्र यणि ऋत्विज्-शब्दः, तस्य कृदन्तत्वात्प्रातिपदिकत्वे सौ हल्ङ्यादिलोपे-

**क्विन्प्रत्ययस्य कुः ८।२।६२**

**क्विन्प्रत्ययो यस्मात्तस्य कवर्गोऽन्तादेशः पदान्ते । अस्यासिद्धत्वाच्चोः कुरिति कुत्वम् । ऋत्विक्, ऋत्विग् । ऋत्विजौ । ऋत्विग्भ्याम् ।**

अनेन जकारस्य कुत्वे प्राप्ते "चोः कुः" इत्यनेनापि कुत्वे प्राप्ते "पूर्वत्रासिद्धम्" इत्यनेन "क्विन्प्रत्ययस्य-" इत्यस्यासिद्धत्वात् "चोः कुः' इति जकारस्य कुत्वेन गकारे "वाऽवसाने" इति वैकल्पिके चर्त्वे 'ऋत्विक्' इति, चर्त्वाभावे 'ऋत्विग्' इति रूपद्वयम् । भ्यामादौ जकारस्य कुत्वे 'ऋत्विग्भ्याम्' इत्यादि । 'युज्' इत्यस्मात् क्विन्नन्तात् सौ 'युज्+स्' इति स्थिते-)

**युजेरसमासे ७।१।७१**

**युजेः सर्वनामस्थाने नुम् स्यादसमासे । सुलोपः । संयोगान्तस्य लोपः । कुत्वेन नस्य ङः- युङ् । युञ्जौ । युञ्जः । युजः । युजा । युग्भ्याम् ।**

असति समासे 'युज् इत्यस्य नुम् स्यात् सर्वनामस्थाने परे इत्यर्थः । अनेन युज्शब्दावयवाद् उकारात्परतो नुमागमेऽनुबन्धलोपे 'युन् ज् + स्' इति जाते "हल्ङ्याब्भ्यः-" इति सुलोपे "संयोगान्तस्य-" इति जकारस्यापि लोपे "क्विन्प्रत्ययस्य कुः" इति कुत्वेन नकारस्य ङकारे युङ् इति । औविभक्तौ "युजेः-" इति नुमि नकारस्य "नश्चापदान्तस्य-" इति अनुस्वारे "अनुस्वारस्य ययि-" इति परसवर्णे युञ्जौ । शसि 'युजः' इति । भ्यामादौ 'युज्+भ्याम्' इति स्थिते "चोः कुः" इति कुत्वे युग्भ्याम् । अत्र 'असमासे' इति पदं समासे नुम्व्यावृत्त्यर्थम् । तस्मात् सुपूर्वाद् युज्-धातोः क्विप्-प्रत्यये तस्य सर्वापहारिलोपे उपपदसमासे सुयुज्शब्दः, तस्य कृदन्तत्वात्प्रातिपदिकत्वं सुविभक्तिश्च । ततः 'सुयुज् + स्' इति स्थिते समासत्वात् नुमभावे हल्ङ्यादिलोपे-

**चोः कुः ८।२।३०**

**चवर्गस्य कवर्गः स्याज्झलि पदान्ते च । सुयुक्, सुयुग् । सुयुजौ । सुयुजः । सुयुग्भ्याम् । खन् । खञ्जौ । खञ्जः । खन्भ्याम् ।**

अनेन जकारस्य कुत्वेन गकारे "वाऽवसाने" इति वैकल्पिके चर्त्वे 'सुयुक्' इति, चर्त्वाभावे 'सुयुग्' इति । क्विप्-प्रत्ययान्तात् खञ्ज्-शब्दात् सौ हल्ङ्यादिलोपे जकारस्य "संयोगान्तस्य-" इति लोपे "निमित्तापाये नैमित्तिकस्याप्यपायः" इति नियमेन अनुस्वारपरसवर्णनिमित्तस्य जकारस्य अपायात्-विनाशात् अनुस्वारपरसवर्णयोरपि निवृत्तौ 'खन्' इति रूपम् । भ्यामादौ हलादौ पदसंज्ञायां जकारस्य "संयोगान्तस्य-" इति लोपः । क्विबन्तात् राज्शब्दात् सुविभक्तौ हल्ङ्यादिना सुलोपे-

**व्रश्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राज-च्छ-शां षः ८।२।३६**

**झलि पदान्ते च । जश्त्वचर्त्वे- राट्, राड् । राजौ । राजः । राड्भ्याम् । एवम्- विभ्राट्, देवेट्, विश्वसृट्, परिमृट् ।**

व्रश्चादीनां सप्तानां छकारान्त-शकारान्तयोश्च षकारोऽन्तादेशः स्यात्, झलि पदान्ते चेत्यर्थः । अनेन जकारस्य षत्वे तस्य "झलां जशोऽन्ते" इति जश्त्वे "वाऽवसाने" इति वैकल्पिके चर्त्वे 'राट्' इति, चर्त्वाभावे 'राड्' इति । एवम् - विभ्राज्-देवेज्-विश्वसृज्-परिमृज्-शब्दानामपि रूपाणि ।

**परौ व्रजेः षः पदान्ते** (वा.) **परावुपपदे व्रजेः क्विप् दीर्घश्च पदान्ते षत्वमपि । परित्यज्य सर्वं व्रजतीति परिव्राट् । परिव्राजौ ।**

परि' इत्युपसर्गपूर्वकाद् व्रज्धातोः अनेन वार्तिकेन क्विपि तस्य सर्वापहारिलोपे दीर्घे परिव्राज्शब्दात् सौ हल्ङ्यादिलोपे अनेनैव वार्तिकेन जकारस्य षत्वे जश्त्वचर्त्वयोः 'परिव्राट्' इति, चर्त्वाभावे 'परिव्राड्' इति ।

**विश्वस्य वसुराटोः ६।३।१२८**

**विश्वस्य दीर्घः स्याद्वसौ राट्शब्दे च परे । राडिति पदान्तोपलक्षणार्थम् । विश्वाराट् । विश्वराजौ । विश्वाराड्भ्याम् ।**

विश्वस्मिन् राजते इत्यर्थे विश्वशब्दोपपदाद् राज्धातोः क्विपि उपपदसमासे विश्वराज्-शब्दः, तस्मात् सौ सुलोपे "व्रश्च-" इति जकारस्य षत्वे जश्त्वचर्त्वयोः अनेन सूत्रेण दीर्घः । चर्त्वाभावे 'विश्वाराड्' इति रूपम् । राट्शब्दे परे एव दीर्घः, स च राड्शब्दे परे न भवतीति न शङ्क्यः, सूत्रे राट्शब्दग्रहणं पदान्तोपलक्षणार्थम् । 'स्वबोधकत्वे सति स्वेतरबोधकत्वमुपलक्षणत्वम्" इत्युक्तत्वाद् राट्शब्दः पदान्तं राज्शब्दं बोधयति । तेन यत्र पदान्ते राज्शब्दे परे पूर्वो विश्वशब्दः तत्र दीर्घो भवतीति बोध्यम् । 'विश्वराजौ' इत्यत्र राज्शब्दस्य पदान्तत्वाभावाद् दीर्घो न ।

**स्कोः संयोगाद्योरन्ते च ८।२।२९**

**पदान्ते झलि च परे यः संयोगस्तदाद्योः सकारककारयोर्लोपः । भृट् । सस्य श्चुत्वेन शः । झलां जश् झशीति शस्य जः । भृज्जौ । भृज्जः । भृड्भ्याम् ।**

भ्रस्ज्धातोः क्विपि संप्रसारणे भृस्ज्शब्दः, तस्मात् सौ सुलोपे अनेन सूत्रेण संयोगादेः सकारस्य लोपे "व्रश्चभ्रस्ज-" इति जकारस्य षत्वे जश्त्वचर्त्वयोः 'भृट्' इति चर्त्वाभावे 'भृड्' इति । औविभक्तौ 'भ्रस्ज् + औ' इति स्थिते संयोगसंज्ञाभावात् सलोपाभावे तस्य श्चुत्वेन शकारे तस्य "झलां जश् झशि" इति जश्त्वेन जकारे 'भृज्जौ' इति । एवं 'भृज्जः' इत्यपि ।

## अभ्यासः

### १. अधो लिखितानां प्रश्नानामुत्तराणि दत्त

(क) “ङावुत्तरपदे प्रतिषेधः” इत्यनेन कस्य प्रतिषेधः ?

(ख) ‘राजभ्याम्’ इत्यत्र “सुपि च” इति दीर्घः कथं न ?

(ग) ‘वृत्रहणौ’ इत्यत्र णत्वं केन सूत्रेण भवति ?

(घ) “मघवा बहुलम्” इत्यत्र बहुलग्रहणात् किं लभ्यते ?

(ङ) अर्वन्शब्दस्य ‘तृ’ इत्यादेशः, पथिन्शब्दस्य आकारादेशः कथम् अन्त्यस्यैव भवति ?

(च) “कृदतिङ्” इति सूत्रं किं करोति ?

(छ) “व्रश्चभ्रस्ज-” इत्यादिना कस्य कस्य षत्वं भवति ?

### २. अधस्तनपङ्क्तीनामाशयं वर्णयत

(क) इह उपधादीर्घे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वं न भवति, बहुलग्रहणात् ।

(ख) ‘अष्टभ्य’ इति वक्तव्ये कृतात्वनिर्देशो जश्शसोर्विषये आत्वं ज्ञापयति ।

(ग) राडिति पदान्तोपलक्षणार्थम् ।

### ३. एतेषां सूत्राणामर्थं लिखत

(क) एकाजुत्तरपदे णः (ख) उगिदचां सर्वनामस्थानेऽधातोः (ग) इतोऽत्सर्वनामस्थाने

(घ) अष्टाभ्य औश् (ङ) विश्वस्य वसुराटोः

### ४. एतान् प्रयोगान् साधयत

राज्ञः, वृत्रहा, वृत्रघ्नः, मघोनः, पन्थाः, पञ्चानाम्, ऋत्विक्, युङ् ।

### ५. युक्तकथनेषु ✓ इति चिह्नं योजयत

(क) नान्तशब्दानां ङौ सम्बुद्धौ च परे नलोपो न भवति ।

(ख) सुब्विधौ, स्वरविधौ, संज्ञाविधौ च नलोपः सिद्धो भवति ।

(ग) इन्-हन्-पूषन्-अर्यमन्-शब्दानां शौ परे एव उपधादीर्घो भवति ।

(घ) संख्यावाचकानां शब्दानां षट्संज्ञा भवति ।

(ङ) 'अष्टन्'शब्दस्य आत्वं वैकल्पिकम्, "अष्टाभ्य औश्" इति सूत्रे 'वा-' ग्रहणात् ।

(च) "स्कोः संयोगाद्योः-" इति संयोगाद्योः सकारककारयोर्लोपः ।

६. **वृत्रहन्-मथिन्-अष्टन्-शब्दानां सर्वासु विभक्तिषु रूपाणि लिखत ।**

७. **अधो निर्दिष्टानां पदानां वाक्येषु प्रयोगं कुरुत**

राज्ञि, युवानः, पथः, पञ्चानाम्, अष्टासु, ऋत्विजम् ।

## विशेषाध्ययनम्

१. **"अर्वणस्त्रसावनञः" इत्यादौ "अलोऽन्त्यस्य" इति परिभाषासूत्रसहकृतेन अन्तादेशो बोध्यः ।**

२. **शब्दरूपसारिणी-**

**राजन्-शब्दस्य रूपाणि**

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | राजा | राजानौ | राजानः |
| **द्वितीया** | राजानम् | राजानौ | राज्ञः |
| **तृतीया** | राज्ञा | राजभ्याम् | राजभिः |
| **चतुर्थी** | राज्ञे | राजभ्याम् | राजभ्यः |
| **पञ्चमी** | राज्ञः | राजभ्याम् | राजभ्यः |
| **षष्ठी** | राज्ञः | राज्ञोः | राज्ञाम् |
| **सप्तमी** | राज्ञि-राजनि | राज्ञोः | राजसु |
| **सम्बोधनम्** | हे राजन् | हे राजानौ | हे राजानः |

**मघवन्-शब्दस्य रूपाणि**

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मघवान्-मघवा | मघवन्तौ-मघवानौ | मघवन्तः-मघवानः |
| द्वितीया | मघवन्तम्-मघवानम् | मघवन्तौ-मघवानौ | मघवतः-मघोनः |
| तृतीया | मघवता-मघोना | मघवद्भ्याम्-मघवभ्याम् | मघवद्भिः-मघवभिः |
| चतुर्थी | मघवते-मघोने | मघवद्भ्याम्-मघवभ्याम् | मघवद्भ्यः-मघवभ्यः |
| पञ्चमी | मघवतः-मघोनः | मघवद्भ्याम्-मघवभ्याम् | मघवद्भ्यः-मघवभ्यः |
| षष्ठी | मघवतः-मघोनः | मघवतोः-मघोनोः | मघवताम्-मघोनाम् |
| सप्तमी | मघवति-मघोनि | मघवतोः-मघोनोः | मघवत्सु-मघवसु |
| सम्बोधनम् | हे मघवन् ! | हे मघवन्तौ ! हे मघवानौ ! | हे मघवन्तः-हे मघवानः ! |

**युवन्-शब्दस्य रूपाणि**

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | युवा | युवानौ | युवानः |
| द्वितीया | युवानम् | युवानौ | यूनः |
| तृतीया | यूना | युवभ्याम् | युवभिः |
| चतुर्थी | यूने | युवभ्याम् | युवभ्यः |
| पञ्चमी | यूनः | युवभ्याम् | युवभ्यः |
| षष्ठी | यूनः | यूनोः | यूनाम् |
| सप्तमी | यूनि | यूनोः | युवसु |
| सम्बोधनम् | हे युवन् ! | हे युवानौ ! | हे युवानः ! |

एवम्- श्वन्शब्दस्यापि रूपाणि- श्वा । श्वानौ । श्वानः इति । शसादौ ह्रस्व उकारो भवति । यथा- शुनः, शुना इत्यादि ।

**पथिन्-शब्दस्य रूपाणि**

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | पन्थाः | पन्थानौ | पन्थानः |
| **द्वितीया** | पन्थानम् | पन्थानौ | पथः |
| **तृतीया** | पथा | पथिभ्याम् | पथिभिः |
| **चतुर्थी** | पथे | पथिभ्याम् | पथिभ्यः |
| **पञ्चमी** | पथः | पथिभ्याम् | पथिभ्यः |
| **षष्ठी** | पथः | पथोः | पथाम् |
| **सप्तमी** | पथि | पथोः | पथिषु |
| **सम्बोधनम्** | हे पन्थाः ! | हे पन्थानौ ! | हे पन्थानः ! |

एवं मथिन्-ऋभुक्षिन्-शब्दयोः रूपाणि भवन्ति ।

३. **बहून् अर्थान् लातीति बहुलम् । उक्तञ्च–**

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ।

विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥ इति ॥

अत्र 'क्वचिदन्यदेव' इति वाक्यमनुसर्तव्यम् । तस्मात् 'मघवान्' इति प्रयोगे उपधादीर्घे कर्तव्ये संयोगान्तलोपस्यासिद्धत्वं न भवति ।

४. **"न सम्प्रसारणे सम्प्रसारणम्" इति ज्ञापकादन्त्यस्य यणः पूर्वं सम्प्रसारणम्, अन्यथा एतन्निषेधारम्भो व्यर्थः स्यात् ।**

# दकारान्तशब्दनिरूपणम्

## त्यदाद्यत्वं पररूपत्वम्-

प्रातिपदिकात् 'त्यद्-'शब्दात् प्रथमाया एकवचने सौ 'त्यद्+स्' इति स्थिते "त्यदादीनामः" इति अकारान्तादेशे "अतो गुणे" इति पररूपे 'त्य + स्' इति जाते-

**तदोः सः सावनन्त्ययोः ७।२।१०६**

**त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात्सौ । स्यः । त्यौ । त्ये । सः । तौ । ते । यः । यौ । ये । एषः । एतौ । एते । एनम् । एनौ । एनान् । एनेन । एनयोः ।**

त्यदादिगणपठितानां शब्दानाम् अन्त्ये अविद्यमानयोः तकार-दकारयोः सकारादेशः स्यात्, सौ परे इत्यर्थः । अनेन सूत्रेण तकारस्य सकारे पदान्तसकारस्य रुत्वविसर्गौ । सौ एव सत्वविधानात् औजसादौ न भवति । तत्र अत्वे पररूपे औविभक्तौ 'त्य + औ' इति स्थिते वृद्धिः, जसि 'त्य + अस्' इति स्थिते सर्वनामत्वात् "जसः शी" इति 'शी' इत्यादेशे गुणः । तद्-शब्दात् सौ अत्वे पररूपे च कृते 'त + स्' इति स्थिते पूर्ववत् तकारस्य सत्वम् । औविभक्तौ अत्वपररूपयोः 'त + औ' इति स्थिते वृद्धिः । जसि पूर्ववत् 'शी' आदेशः । एवं यद्-शब्दस्य यः, यौ, ये इति रूपाणि भवन्ति । एतद्-शब्दात् सौ अत्वपररूपयोः 'एत + स्' इति स्थिते अनेन सूत्रेण तकारस्य सत्वे "आदेशप्रत्यययोः" इति षत्वम् । शेषं पूर्ववत् । एतद्-शब्दस्य अन्वादेशविषये "द्वितीयाटौस्स्वेनः" इति 'एन' इत्यादेशे अम्-औट्-शस्-टा-ओस्-विभक्तिषु एनम्, एनौ, एनान्, एनेन, एनयोः इति रूपाणि ।

**ङे प्रथमयोरम् ७।१।२८**

**युष्मदस्मद्भ्यां परस्य 'ङे' इत्येतस्य प्रथमाद्वितीययोश्चामादेशः ।**

'युष्मद्'-शब्दात् 'अस्मद्-'शब्दात् च प्रथमाविभक्तौ द्वितीयाविभक्तौ चतुर्थ्या एकवचने ङेविभक्तौ च विभक्तेः अमादेश इत्यर्थः । तस्मात् सौ विभक्तौ 'युष्मद् + स्' 'अस्मद् + स्' इति स्थिते अनेन सूत्रेण विभक्तेः सकारस्य अमादेशे 'युष्मद् + अम्' 'अस्मद् + अम्' इति जाते-

**त्वाहौ सौ ७।२।९४**

**अनयोर्मपर्यन्तस्य त्वाहौ स्तः ।**

युष्मद्-अस्मद्-शब्दयोः मपर्यन्तस्य 'त्व', 'अह' एतौ आदेशौ स्तः सौ परे इत्यर्थः । अनेन मपर्यन्तस्य क्रमशः 'त्व', 'अह' आदेशे 'त्व + अद् + अम्' 'अह + अद् + अम्' इति जाते-

**शेषे लोपः ७।२।९०**

**आत्वयत्वनिमित्तेतरविभक्तौ परतोऽनयोष्टिलोपः । त्वम् । अहम् ।**

आत्व-यत्व-निमित्ता या विभक्तिः तां विना अन्यविभक्तौ परे युष्मदस्मत्-शब्दयोः टिलोप इत्यर्थः । अत्र अनेन टेः । 'अद्' इत्यस्य लोपे 'त्व + अम्' 'अह + अम्' इति जाते "अमि पूर्वः" इति पूर्वरूपे 'त्वम्' 'अहम्' इति रूपम् । युष्मदस्मदोः औविभक्तौ 'युष्मद् + औ' 'अस्मद् + औ' इति स्थिते "ङे प्रथमयोरम्" इति 'औ' इत्यस्य अमादेशे 'युष्मद् + अम्' 'अस्मद् + अम्' इति जाते-

**युवावौ द्विवचने ७।२।९२**

**द्वयोरुक्तावनयोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ ।**

द्वित्वार्थवाचिनोः युष्मदस्मदोः मपर्यन्तस्य 'युव-आव' एतौ आदेशौ स्तो विभक्तौ इत्यर्थः । अनेन युष्मदस्मदोः मपर्यन्तस्य क्रमेण 'युव-आव' इत्यादेशे 'युव + अद् + अम्' 'आव + अद् + अम्' इति जाते "अतो गुणे" इति पररूपे 'युवद् + अम्' 'आवद् + अम्' इत्यवस्थायाम् 'शेषे लोपः' इति प्राप्ते तं प्रबाध्य-

**प्रथमायाश्च द्विवचने भाषायाम् ७।२।८८**

**औङ्येतयोरात्वं लोके । युवाम् । आवाम् ।**

प्रथमायाः, द्वितीयायाश्च द्विवचने परे युष्मदस्मदोः आकारः अन्तादेशः स्यात्, लौकिक व्यवहारे इत्यर्थः । अनेन दकारस्य आत्वे 'युव + आ + अम्' ' आव + आ + अम्' इत्यत्र सर्वर्णदीर्घे 'अमि पूर्वः' इति पूर्वरूपे च 'युवाम्' 'आवाम्' इति । जसि जसः अमादेशे 'युष्मद् + अम्' इति स्थिते-

**यूयवयौ जसि ७।२।९३**

**अनयोर्मपर्यन्तस्य यूय-वयौ स्तो जसि । यूयम् । वयम् ।**

अनेन क्रमेण 'यूय', 'वय' इत्यादेशे 'यूय + अद् + अम्' 'वय + अद् + अम्' इति जाते 'शेषे लोपः' इति टिलोपे पूर्वरूपे च कृते 'यूयम्' 'वयम्' इति । द्वितीयाया एकवचने अम्विभक्तौ 'ङे प्रथमयोः-" इति तस्य अमादेशे 'युष्मद् + अम्' 'अस्मद् + अम्' इति स्थिते-

**त्वमावेकवचने ७।२।९७**

**एकस्योक्तावनयोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ ।**

एकवचनविवक्षायां युष्मदस्मदोर्मपर्यन्तस्य 'त्व', 'म' एतौ आदेशौ स्तो विभक्तौ इत्यर्थः । अत्र 'त्व'-'म' इत्यादेशयोः कृतयोः 'त्व + अद् + अम्' 'म + अद् + अम्' इति जाते पररूपे-

**द्वितीयायां च ७।२।८७**

**अनयोरात् स्यात् । त्वाम् । माम् ।**

द्वितीयाविभक्तौ परतः युष्मदस्मदोः आकारोऽन्तादेश इत्यर्थः । अत्र 'त्वद् + अम्' 'मद् + अम्' इति स्थिते दकारस्य आत्वे सवर्णदीर्घे पूर्वरूपे च 'त्वाम्' 'माम्' इति । औट्-विभक्तौ प्रथमाद्विवचनवत्, आत्वं तु अनेन सूत्रेण बोध्यम् । शसि 'युष्मद् + अस्' 'अस्मद् + अस्' इति स्थिते 'द्वितीयायां च' इति दकारस्य आत्वे सवर्णदीर्घे "ङे प्रथमयोः-" इति अमि प्राप्ते तं प्रबाध्य-

**शसो नः ७।१।२९**

**युष्मदस्मद्भ्यां परस्य शसो नः स्यात् । अमोऽपवादः । आदेः परस्य । संयोगान्तस्य लोपः । युष्मान् । अस्मान् ।**

अत्र "अलोऽन्त्यस्य' इति सहकृतेन अन्त्यस्य प्राप्ते "आदेः परस्य" इति सहकृतेन अनेन सूत्रेण 'अस्' इत्यस्य अकारस्य नकारे 'युष्मान् स्' 'अस्मान् स्' इत्यवस्थायां "संयोगान्तस्य लोपः" इति सकारलोपे 'युष्मान्' 'अस्मान्' इति । टा-विभक्तौ 'युष्मद् + आ' 'अस्मद् + आ' इति स्थिते "त्वमावेकवचने" इति मपर्यन्तस्य क्रमशः 'त्व' 'म' इत्यादेशे पररूपे -

**योऽचि ७।२।८९**

**अनयोर्यादेशोऽनादेशेऽजादौ विभक्तौ । त्वया । मया ।**

यस्य कश्चिदपि आदेशो न भवति, तस्मिन् अजादौ विभक्तौ परतो युष्मदस्मदोः अन्त्यस्य यकारादेशो भवति इत्यर्थः । अनेन दकारस्य यत्वे 'त्वया', 'मया' इति । भ्याम्-विभक्तौ "युवावौ द्विवचने" इति मपर्यन्तस्य युवावादेशयोः 'युव + अद् + भ्याम्' 'आव + अद् + भ्याम्' इति स्थिते पररूपे-

**युष्मदस्मदोरनादेशे ७।२।८६**

**अनयोरात्स्यादनादेशे हलादौ विभक्तौ । युवाभ्याम् । आवाभ्याम् । युष्माभिः । अस्माभिः ।**

युष्मदस्मदोः आकारोऽन्तादेश इत्यर्थः । अनेन दकारस्य आत्वे सवर्णदीर्घे 'युवाभ्याम्' 'आवाभ्याम्' इति । भिस्-विभक्तौ 'युष्मद् + भिस्' 'अस्मद् + भिस्' इति स्थिते अनेन दकारस्य आत्वे सवर्णदीर्घः ।

**तुभ्यमह्यौ ङयि ७।२।९५**

**अनयोर्मपर्यन्तस्य तुभ्यमह्यौ स्तो ङयि । टिलोपः । तुभ्यम् । मह्यम् ।**

(ङेविभक्तौ 'युष्मद् + ए' 'अस्मद् + ए' इति स्थिते "त्वमावेकवचने" इति प्राप्ते तं बाधित्वा अनेन मपर्यन्तस्य क्रमेण तुभ्य-मह्यादेशयोः 'तुभ्य + अद् + ए' 'मह्य + अद् + ए' इति जाते "ङे प्रथमयोरम्" इति अमादेशे "शेषे लोपः" इति टिलोपे "अमि पूर्वः" इति पूर्वरूपे 'तुभ्यम्', 'मह्यम्' इति ।)

**भ्यसोऽभ्यम् ७।१।३०**

**आभ्यां परस्य । युष्मभ्यम् । अस्मभ्यम् ।**

युष्मदस्मद्भ्यां परस्य भ्यसः 'अभ्यम्' आदेशः । भ्यस्-विभक्तौ अनेन 'अभ्यम्' इत्यादेशे 'युष्मद् + अभ्यम्' 'अस्मद् + अभ्यम्' इति स्थिते "शेषे लोपः" इति टिलोपे 'युष्मभ्यम्' 'अस्मभ्यम्' इति ।

**एकवचनस्य च ७।१।३२**

**आभ्यां पञ्चम्येकवचनस्य 'अत्' स्यात् । त्वत् । मत् ।**

ङसि-विभक्तौ 'युष्मद् + अस्' 'अस्मद् + अस्' इति स्थिते "त्वमावेकवचने" इति मपर्यन्तस्य क्रमेण 'त्व' 'म' आदेशयोः अनेन 'अस्' इत्यस्य 'अत्', आदेशः । "अनेकाल्-" इति सर्वादेशो बोध्यः । ततः पररूपे 'त्वद् + अत्' 'मद् + अत्' इति जाते "शेषे लोपः" इति टिलोपे 'त्वत्' 'मत्' इति ।

**पञ्चम्या अत् ७।१।३१**

**आभ्यां पञ्चम्या भ्यसोऽत् । युष्मत् । अस्मत् ।**

भ्यस्-विभक्तौ 'युष्मद् + भ्यस्' 'अस्मद् + भ्यस्' इति स्थिते अनेन भ्यसः 'अत्' इत्यादेशे "शेषे लोपः" इति टिलोपे 'युष्मत्' 'अस्मत्' इति । ङस्-विभक्तौ 'युष्मद् + अस्' 'अस्मद् + अस्' इति स्थिते "त्वमावेकवचने" इति प्राप्ते तं बाधित्वा-

**तवममौ ङसि ८।१।९६**

**अनयोर्मपर्यन्तस्य तव-ममौ स्तो ङसि ।**

अनेन युष्मदस्मदोः मपर्यन्तस्य तव-ममादेशयोः कृतयोः पररूपे 'तवद् + अस्' 'ममद् + अस्' इति जाते-

**युष्मदस्मद्भ्यां ङसोऽश् ७।१।२७**

**तव । मम । युवयोः २ । आवयोः २ ।**

युष्मदस्द्भ्यां परस्य ङसः अश् स्यादित्यर्थः । शकार इत्संज्ञकः, शित्त्वात्सर्वादेशश्च । अत्र अशादेशेऽनुबन्धलोपे, "शेषे लोपः" इति टिलोपे- 'तव' 'मम' इति । ओस्-विभक्तौ "युवावौ द्विवचने" इति मपर्यन्तस्य क्रमशः युव-आव-आदेशयोः 'युव + अद् + ओस्' 'आव + अद् + ओस्' इति स्थिते "योऽचि" इति दकारस्य यत्वे पररूपे पदान्तसकारस्य रुत्वविसर्गौ ।

**साम आकम् ७।१।३३**

**आभ्यां साम आकम् । युष्माकम् । अस्माकम् । त्वयि । मयि । युष्मासु । अस्मासु ।**

सकारेण सहित आम् साम्, तस्य-सुट्सहितस्य आम आकमादेश इत्यर्थः । अत्र अनेन आकमादेशे 'युष्मद् + आकम्' 'अस्मद् + आकम्' इति जाते "शेषे लोपः" इति टिलोपे 'युष्माकम्' 'अस्माकम्' इति । ङि-विभक्तौ "त्वमावेकवचने" इति त्वमादेशयोः 'योऽचि" इति दकारस्य यत्वे पररूपे 'त्वयि' 'मयि' इति । सुपि 'युष्मद् + सु' 'अस्मद् + सु' इति स्थिते "युष्मदस्मदोरनादेशे" इति दकारस्य आत्वे सवर्णदीर्घे 'युष्मासु' 'अस्मासु' इति ।

**युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ ८।१।२०**

**पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वान्नावौ स्तः ।**

षष्ठी-चतुर्थी-द्वितीयाभिः सह तिष्ठत इति षष्ठीचतुर्थीद्वितीयास्थौ तयोः=षष्ठ्यादिविशिष्टयोः युष्मदस्मदोः 'वाम्', 'नौ' एतौ आदशौ स्त इत्यर्थः ।

**बहुवचनस्य वस्नसौ ८।१।२१**

**उक्तविधयोरनयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः ।**

षष्ठ्यादिविशिष्टयोः युष्मदस्मदोः षष्ठ्यादिबहुवचनान्तयोः 'वस्', 'नस्' एतावादेशौ स्तः ।)

**तेमयावेकवचनस्य ८।१।२२**

**उक्तविधयोरनयोः षष्ठी-चतुर्थ्येकवचनान्तयोस्ते-मे एतौ स्तः ।**

**त्वामौ द्वितीयायाः ८।१।२३**

**उक्तविधयोर्द्वितीयैकवचनान्तयोस्त्वा-मा एतौ स्तः ।**

**श्रीशस्त्वाऽवतु माऽपीह दत्तात्ते मेऽपि शर्म सः ।**
**स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः ॥१॥**
**सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः ।**
**सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः ॥२॥**

'युष्मदस्मदोः-" इत्यनेन षष्ठ्यादिविशिष्टयोः (एकवचन-द्विवचन-बहुवचनेषु) 'वाम्नौ' इत्यादेशयोः प्राप्तयोः तौ प्रबाध्य षष्ठ्यादिबहुवचनान्तयोः "बहुवचनस्य" इति 'वस्-नस्' इत्यादेशौ, षष्ठयेकवचनान्तयोः

चतुर्थ्येकवचनान्तयोश्च “तेमयौ” इति ‘ते-मे’ एतौ आदेशौ, द्वितीयैकवचनान्तस्य च ‘त्व-मा’ एतौ आदशौ भवतः इति बोध्यम् । पूर्वोक्तसूत्रविहितानामादेशानामत्र द्वयोः पद्ययोः सङ्ग्रहः । अत्र द्वितीया-चतुर्थी-षष्ठीक्रमेण एकद्विबहुवचनक्रमेण चोदाहरणम्-

श्रीशः । श्रिया ईशः - विष्णुः, त्वा = त्वाम्, मा = माम्, इह = अत्र जगति, अवतु = रक्षतु, अत्र ‘त्वाम्’, ‘माम्’ इत्यनयोः “त्वामौ द्वितीयायाः” इति ‘त्वा’, ‘मा’ इत्यादेशौ । सः = श्रीशः, ते = तुभ्यम्, मे = मह्यम् अपि शर्म सुखम्, दत्तात् = ददातु । अत्र चतुर्थ्येकवचनान्तयोः ‘ते’ ‘मे’ इत्यादेशौ । स हरिः ते तव, मे = मम, स्वामी = ईश्वरः । अत्र षष्ठ्येकवचनान्तयोः “तेमयावेकवचनस्य” इति ‘ते’, ‘मे’ इत्यादेशौ । विभुः = सर्वव्यापकः विष्णुः, वाम् = युवाम्, नौ = आवाम्, पातु = रक्षतु । अत्र “युष्मदस्मदोः” इत्यादिसूत्रेण द्वितीयाद्विवचनान्तयोः ‘वाम्’, ‘नौ’ इत्यादेशौ । ईशः = सर्वेश्वरः, वाम् = युवाभ्याम्, नौ = आवाभ्याम्, सुखं ददातु । अत्र चतुर्थीद्विवचनान्तयोः वांनावौ भवतः । हरिः वाम् = युवयोः, नौ = आवयोः, पतिः = पालकः । अत्र षष्ठीद्विवचनान्तयोः वांनावौ । सः = ईश्वरः, वः = युष्मान्, नः = अस्मान्, अव्यात् = रक्षतात् । अत्र द्वितीयाबहुवचनान्तयोः “बहुवचनस्य-” ‘वस्’, ‘नस्’ इत्यादेशौ । (स एव) वः = युष्मान्, नः = अस्मान्, शिवम् = कल्याणम्, दद्यात् । अत्र द्वितीयाबहुवचनान्तयोः वस्नसादेशौ । अत्र = संसारे, सः = हरिः, वः = युष्माकम्, नः = अस्माकम्, सेव्यः = भजनीयः । अत्र षष्ठीबहुवचनान्तयोः वस्नसादेशौ भवत इति बोध्यम् ।

**समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः** (वा.) **एकतिङ् वाक्यम् । तेनेह न- ओदनं पच, तव भविष्यति । इह तु स्यादेव- शालीनां ते ओदनं दास्यामि ।**

निघातः अदुदात्तः, युष्मदस्मदोः आदेशाश्च समानवाक्ये । निमित्तनिमित्तिनोः एकवाक्यस्थत्वे भवन्तीति वक्तव्यमित्यर्थः । एकः तिङ् यस्य तद् एकतिङ् । एकतिङन्तम् वाक्यं भवतीत्यर्थः । तेन - भिन्नवाक्यत्वेन इह । अस्मिन् वाक्ये ‘तव’ इत्यस्य “तेमयावेकवचनस्य” इति ‘ते’ इत्यादेशो न भवति । ‘शालीनां ते-’ इत्यादौ एकवाक्यत्वात् ‘ते’ इत्यादेशो भवत्येवेति भावः ।

**एते वांनावादय आदेशा अनन्वादेशे वा वक्तव्याः** (वा.) **। धाता ते भक्तोऽस्ति, तव भक्तोऽस्तीति वा । अन्वादेशे तु नित्यं स्युः । तस्मै ते नम इत्येव ।**

पूर्वोक्ता वांनावादय आदेशा अन्वादेशभिन्ने वाक्ये वा भवन्तीत्यर्थः । अन्वादेशे तु नित्यं भवन्ति । अत एव ‘धाता ते भक्तोऽस्ति’ इत्यादौ अन्वादेशाभावात् पूर्वोक्ता आदेशा विकल्पेन भवन्ति । अन्वादेशत्वात् ‘तस्मै ते नम’ इत्यादौ तु नित्यं भवन्ति । अन्वादेशस्तु- “किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं बोधयितुं पुनरुपादानम्” ।

**न चवाहाहैवयुक्ते ८।१।२४**

**चादिपञ्चकयोगे नैते आदेशाः स्युः । हरिस्त्वां मां च रक्षतु । कथं त्वां मां वा न रक्षेदित्यादि ।**

'च' इति समुच्चये, 'वा' इति विकल्पे, 'हा' इति अद्भुते, 'अह' इति खेदे, 'एव' इति अवधारणे । एषां योगे पूर्वोक्ता आदेशा न स्युरित्यर्थः । अत्र 'च' इत्यस्य 'वा' इत्यस्य च योगे उदाहरणम् ।

**पश्यार्थैश्चानालोचने ८।१।२५**

**अचाक्षुषज्ञानार्थैर्धातुभिर्योगे नैते आदेशाः स्युः । चेतसा त्वां समीक्षते । आलोचने तु- 'भक्तस्त्वा पश्यति चक्षुषा' ।**

पश्यः = दर्शनम् अर्थो येषां ते पश्यार्थाः, आलोचनम् । चाक्षुषं ज्ञानम्, तद्भिन्नमनालोचनम् । तथा च चाक्षुषज्ञानभिन्नैः दर्शनार्थकैः धातुभिर्योगे इत्यर्थः । अत एव 'चेतसा त्वां समीक्षते' इत्यत्र 'त्वा' इत्यादेशो न, मनसा दर्शनात् । चक्षुषा दर्शने तु 'त्वा' इत्यादेशो भवत्येव ।

**सपूर्वायाः प्रथमाया विभाषा ८।१।२६**

**विद्यमानपूर्वात्प्रथमान्तादन्वादेशेऽप्येते आदेशा वा स्युः । भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते स माम् । त्वा मा इति वा ।**

विद्यमानं पूर्वं यस्याः सा सपूर्वा प्रथमा, उक्तप्रथमान्तात्परयोः युष्मदस्मदोः अन्वादेशेऽपि वांनावादय आदेशा वेत्यर्थः । हे देवदत्त ! त्वमपि भक्तः, अहमपि भक्त इति योजनीयः । अत्र 'तेन' इति पूर्वं विद्यमानं पदम्, ततः परं 'हरिः' इति प्रथमान्तं पदम् ततः परस्य युष्मद्-शब्दस्य अन्वादेशेऽपि त्वादेशविकल्पः ।

**सामन्त्रितम् २।३।४८**

**सम्बोधने या प्रथमा तदन्तमामन्त्रितसंज्ञं स्यात् ।**

**आमन्त्रितं पूर्वमविद्यमानवत् ८।१।७२**

**अग्ने तव । देवास्मान्पाहि ।**

आमन्त्रितसंज्ञकं पूर्वं सदपि अविद्यमानवत् = असद्वद्भवतीत्यर्थः । तेनात्र सम्बोधनस्य आमन्त्रितसंज्ञायाम् 'अनेन सूत्रेण तस्य अविद्यमानवद्भावे पदात्परत्वाभावात्' 'तव' इत्यस्य 'ते' इत्यादेशो न । एवं 'देव' इत्यस्य आमन्त्रितसंज्ञायाम् अविद्यमानवद्भावे 'अस्मान्' इत्यस्य नसादेशो न ।

**नामन्त्रिते समानाधिकरणे सामान्यवचनम् ८।१।७३**

**विशेष्यं समानाधिकरणे विशेषणे आमन्त्रिते परे नाविद्यमानवत् । हरे ! दयालो ! नः पाहि । सुपात्, सुपाद् । सुपादौ ।**

समानम् अधिकरणं यस्य तस्मिन् विशेषणपदे आमन्त्रितसंज्ञके परे पूर्वं यद् विशेष्यपदं तद् अविद्यमानवन्न भवतीत्यर्थः । तथा च अत्र समानाधिकरणविशेषणपदे परे पूर्वं विद्यमानस्य 'हरे' इति विशेष्यपदस्य अविद्यमानत्वाभावात्, 'दयालो' इत्यस्य अविद्यमानत्वेऽपि ततः परस्य 'अस्मान्' इत्यस्य 'नस्' इत्यादेशो भवत्येव । सु शोभनौ पादौ यस्य इत्यर्थे 'सुपाद्'-शब्दः, तस्मात् सौ हल्ङ्यादिलोपे दकारस्य वैकल्पिके चर्त्वे 'सुपात्' इति चर्त्वाभावे 'सुपाद्' इति । शसि- 'सुपाद् + अस्' इति स्थिते भसंज्ञायाम्-

**पादः पत् ६।४।१३०**

**पाच्छब्दान्तं यदङ्गं भं तदवयस्य पाच्छब्दस्य पदादेशः । सुपदः । सुपदा । सुपाद्भ्याम् ।**

पाद्-शब्दः अन्ते यस्य तद् अङ्गसंज्ञकं भसंज्ञकं च तदवयवस्य 'पाद्'-शब्दस्य 'पद्' इत्यादेश इत्यर्थः । अनेन पदादेशे पदान्तसकारस्य रुत्वविसर्गौ । भ्यामादौ हलादौ भसंज्ञाया अभावात् पदादेशो न ।

### अथ थकारान्तशब्दनिरूपणम्-

**अग्निमत्, अग्निमद् । अग्निमथौ । अग्निमद्भ्याम् ।**

'अग्निं मन्थति' इत्यर्थे क्विबन्ताद् 'अग्निमथ्-' शब्दात् सौ सुलोपे "झलां जशोऽन्ते" थकारस्य जश्त्वेन दकारे तस्य चर्त्वविकल्पे 'अग्निमत्' इति, 'अग्निमद्' इति च । भ्यामादौ हलादौ पदसंज्ञायां थकारस्य जश्त्वेन दकारे 'अग्निमद्भ्याम्' इत्यादि ।

# अभ्यासः

## १. अधस्तनप्रश्नानामुत्तराणि दत्त

(क) 'ङे प्रथमयोरम्' इति सूत्रेण कस्य कस्य अमादेशः ?

(ख) युवावादेशौ कस्य केन सूत्रेण भवतः ?

(ग) युष्मदस्मदोः दकारस्य आत्वविधायकानि कानि सूत्राणि ?

(घ) 'युष्मदस्मद्भ्यां ङसोऽश्' इति ङसः आदेः अन्त्यस्य वा अशादेशः ?

(ङ) 'दत्तात्ते मेऽपि शर्म सः' इत्यत्र युष्मदस्मदोः कस्य क आदेशः ?

(च) अन्वादेशशब्दस्य कोऽभिप्रायः ?

(छ) 'अग्ने तव' इत्यत्र किं कार्यं प्रदर्शितमस्ति ?

## २. अधस्तनानां सूत्राणामर्थं लिखत

तदोः सः सावनन्त्ययोः । शेषे लोपः । योऽचि । तवममौ ङसि । साम आकम् । तेमयावेकवचनस्य। पश्यार्थैश्चानालोचने ।

## ३. एतान् प्रयोगान् सम्यक् साधयत

त्वम् । अस्मान् । युवाभ्याम् । युष्मत् । आवयोः । हरिस्त्वां मां च रक्षतु । देवास्मान् पाहि । सुपदः ।

## ४. "समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः" इत्यस्य वार्तिकस्य सोदाहरणमर्थं लिखत ।

## ५. उपयुक्तविकल्पं योजयत

(क) 'द्वितीयायां च' इति ......... आत्वं भवति । (युष्मदस्मदोः, युष्मदस्मदोर्दकारस्य, द्वितीयाविभक्तेः)

(ख) युष्मद्-शब्दस्य चतुर्थी-बहुवचने.......... इति रूपम् । (युष्मेभ्यः, युष्मभ्यः, युष्मभ्यम्)

(ग) युष्मदस्मदोः ङसि ............... इत्यनेन 'अत्' इत्यादेशः । ('एकवचनस्य च', 'पञ्चम्या अत्')

(घ) ............ युष्मदस्मदोः वांनावादेशौ भवतः । (षष्ठ्यादिविभक्त्यन्तयोः, षष्ठ्यादिद्विवचनान्तयोः)

(ङ) 'हरे दयालो नः पाहि' इत्यत्र............. अविद्यमानत्वनिषेधः । ('हरे' इत्यस्य, 'दयालो' इत्यस्य)

## ६. "श्रीशस्त्वावतु-" इत्यादिपद्ययोः व्याख्या कार्या ।

## ७. वाक्येषु प्रयोगं कुरुत

युवाम्, युष्मान्, मह्यम्, आवयोः, त्वयि ।

**विशेषाध्ययनम्**

१. “साम आकम्’ इति सूत्रे “शेषे लोपः” इति अन्त्यलोपपक्षे- इत्युक्तं तत्रेदं वक्तव्यम्- “शेषे लोपः” इत्यस्यार्थे मतद्वयमस्ति । तत्र उक्तादन्यः शेषः, आत्वं यत्वं च प्रागुक्तम् तद्विषयादन्यविभक्तिः शेषशब्दार्थः । तस्मात्- ‘आत्वयत्वनिमित्तेतरविभक्तौ युष्मदस्मदोरन्त्यस्य लोपः’इत्येकम् । अत्र ‘अन्त्यस्य’ इत्यर्थस्तु अलोऽन्त्यपरिभाषया । अपरं मतं च- ‘शेषे’ इति षष्ठ्यर्थे सप्तमी, तेन ‘मपर्यन्ताच्छेषस्य लोप’ इत्यर्थः । एवञ्च- अन्त्यलोपपक्षे एव ‘साम’ इति ससुट्कनिर्देशः सार्थकः, अन्यथा ‘आम आकम्’ इत्यनेनैवेष्टसिद्धिः । ‘मपर्यन्ताच्छेषस्य लोप’ इति पक्षे, कृतेऽपि आकमादेशे ‘अद्’ इत्यस्य लोपे अवर्णात्परत्वाभावेन सुडागमस्य प्राप्तिर्नेति भावः ।

## २. शब्दरूपसारिणी

**सुपाद्-शब्दस्य एतद्-शब्दस्य च रूपाणि-**

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | सुपाद्-सुपात् | सुपादौ | सुपादः |
| **द्वितीया** | सुपादम् | सुपादौ | सुपदः |
| **तृतीया** | सुपदा | सुपाद्भ्याम् | सुपाद्भिः |
| **चतुर्थी** | सुपदे | सुपाद्भ्याम् | सुपाद्भ्यः |
| **पञ्चमी** | सुपदः | सुपाद्भ्याम् | सुपाद्भ्यः |
| **षष्ठी** | सुपदः | सुपदोः | सुपदाम् |
| **सप्तमी** | सुपदि | सुपदोः | सुपात्सु |
| **सम्बोधनम्** | हे सुपाद्-त् | हे सुपादौ | हे सुपादः |

| | | | |
|---|---|---|---|
| **प्रथमा** | एषः | एतौ | एते |
| **द्वितीया** | एतम्-एनम् | एतौ-एनौ | एतान्-एनान् |
| **तृतीया** | एतेन-एनेन | एताभ्याम् | एतैः |
| **चतुर्थी** | एतस्मै | एताभ्याम् | एतेभ्यः |
| **पञ्चमी** | एतस्मात्-द् | एताभ्याम् | एतेभ्यः |
| **षष्ठी** | एतस्य | एतयोः-एनयोः | एतेषाम् |
| **सप्तमी** | एतस्मिन् | एतयोः-एनयोः | एतेषु |

अत्र एनादेशं षत्वं च वर्जयित्वा ‘ए’ इत्यक्षरं विहाय तद्-शब्दस्य रूपाणि भवन्ति ।

# चकारान्तशब्दनिरूपणम्

**अनिदितां हल उपधायाः क्ङिति ६।४।२४**

**हलन्तानामनिदितामङ्गानामुपधाया नस्य लोपः किति ङिति च। उगिदचामिति नुम्। संयोगान्तस्य लोपः। नस्य कुत्वेन ङः, प्राङ्। प्राञ्चौ। प्राञ्चः।**

इत् = ह्रस्व इकारः, इत् = इत्संज्ञकः यस्य तद् इदित्, न इदित् अनिदित्, तेषां हलन्तानामङ्गसंज्ञकानामुपधाया लोपः स्यात्, किति ङिति प्रत्यये परे इत्यर्थः। प्र अञ्चतीत्यर्थे प्रपूर्वकाद् अञ्चधातोः क्विन्-प्रत्यये तस्य सर्वापहारिलोपे 'प्र+अन्च्' इति स्थिते अनेन सूत्रेण नकारस्य लोपे सवर्णदीर्घे प्राच्-शब्दः, तस्य कृदन्तत्वात् प्रातिपदिकत्वे तस्मात् सौ 'प्राच्+स्' इति स्थिते "उगिदचाम्-" इति नुमि 'प्रान्च्+स्' इति जाते सुलोपे 'संयोगान्तस्य लोपः" इति चकारस्य लोपे नकारस्य "क्विन्प्रत्ययस्य कुः" इति कुत्वेन ङकारे 'प्राङ्' इति। औविभक्तौ 'प्राच् + औ' इति स्थिते नुमि अनुस्वारपरसवर्णौ 'प्राञ्चौ' इति, एवं 'प्राञ्चः' इति। शस्-विभक्तौ 'प्र+अच्+अस्' इति स्थिते भसंज्ञायाम्-

**अचः ६।४।१३८**

**लुप्तनकारस्याञ्चतेर्भस्याकारस्य लोपः।**

अनेन 'अच्' इत्यस्य अकारस्य लोपे 'प्र+च्+स्' इति जाते-

**चौ ६।३।१३८**

**लुप्ताकारनकारेऽञ्चतौ परे पूर्वस्याणो दीर्घः। प्राचः। प्राचा। प्राग्भ्याम्। प्रत्यङ्। प्रत्यञ्चौ। प्रतीचः। प्रत्यग्भ्याम्। उदङ्। उदञ्चौ।**

लुप्तौ अकारनकारौ यस्य तस्मिन् अञ्चतौ परे पूर्वस्य अणो दीर्घ इत्यर्थः। अनेन 'प्र' इत्यस्याकारस्य दीर्घे पदान्तसकारस्य रुत्वविसर्गौ प्राचः इति। एवं 'प्राचा' इत्यपि। भ्यामादौ पदसंज्ञायां 'प्राच्+भ्याम्' इत्यत्र चकारस्य कुत्वेन ककारे तस्य जश्त्वेन गकारः। एवं प्रतिपूर्वकाद् 'अञ्च्' इत्यस्माद् नलोपे यणादेशे 'प्रत्यच्'-शब्दः, तस्मात् सौ नुमि सुलोपे नकारस्य कुत्वे 'प्रत्यङ्' इति, औविभक्तौ 'प्रत्यच्+औ' इति स्थिते नुमि अनुस्वारपरसवर्णौ। शसि 'प्रति+अच्+अस्' इति स्थिते "अचः' इति अकारलोपे "चौ" इति इकारस्य

दीर्घे प्रतीच इति । उत्-पूर्वकात् 'अञ्च्' इत्यस्मात् सौ 'उदङ्' इति 'प्राङ्' इतिवत् । शसादौ अजादौ यथा- 'उत्+अच्+अस्' इति स्थिते 'अचः' इति प्राप्ते-

**उद ईत् ६।४।१३९**

**उच्छब्दात्परस्य लुप्तनकारस्याञ्चतेर्भस्याकारस्य ईत् । उदीचः । उदीचा । उदग्भ्याम् ।**

अनेन 'अच्' इत्यस्य अकारस्य ईत्वे 'उत्' इत्यस्य पदत्वात् तकारस्य जश्त्वेन दकारे पदान्तसकारस्य रुत्वे विसर्गे 'उदीचः' इति । एवम् अजादौ विभक्तौ भसंज्ञकस्य अकारस्य ईत्वम् । हलादौ पदसंज्ञायां चकारस्य कुत्वं जश्त्वञ्च ।

**समः समि ६।३।९३**

**अप्रत्ययान्तेऽञ्चतौ परे । सम्यङ् । सम्यञ्चौ । समीचः । सम्यग्भ्याम् ।**

प्रत्ययः अन्ते यस्य प्रत्ययान्तः, न प्रत्ययान्तः अप्रत्ययान्तः, तस्मिन् अञ्चतौ परे 'सम्' इत्यस्य 'समि' इत्यादेश इत्यर्थः । सम्पूर्वकाद् 'अञ्च्' इत्यस्मात् 'क्विन्'-प्रत्यये नलोपे 'सम्' इत्यस्य अनेन 'समि' इत्यादेशे यणि 'सम्यच्'-शब्दः, तस्मात् सौ नुमि सुलोपे संयोगान्तलोपे नकारस्य कुत्वे 'सम्यङ्' इति । शसि 'समि+अच्+अस्' इति स्थिते "अचः" इति अकारलोपे "चौ' इति इकारस्य दीर्घः । एवं 'समीचा' इत्यपि बोध्यम् ।

**सहस्य सध्रिः ६।३।९५**

**अप्रत्ययान्तेऽञ्चतौ परे । सध्र्यङ् । सध्र्यञ्चौ । सध्रीचः । सध्र्यग्भ्याम् ।**

'सह' इत्यस्य 'सध्रि' इत्यादेशः, अप्रत्ययान्तेऽञ्चतौ परे इत्यर्थः । सह अञ्चतीत्यर्थे सहपूर्वकस्य 'अञ्च्' इत्यस्य क्विन्-प्रत्यये नलोपे कृते अनेन 'सह' इत्यस्य 'सध्रि' इत्यादेशे यणि 'सध्र्यच्-' शब्दः, तस्मात् सौ नुमि सुलोपे संयोगान्तलोपे च कृते नकारस्य "क्विन्प्रत्ययस्य कुः" इति कुत्वेन ङकारः । शसि- 'सध्रि+अच्+अस्' इति स्थिते "अचः" इति अकारलोपे "चौ" इति इकारस्य दीर्घः । भ्यामादौ हलादौ पदसंज्ञायां चकारस्य कुत्वेन ककारः, तस्य जश्त्वेन गकारः ।

**तिरसस्तिर्यलोपे ६।३।९४**

**अलुप्ताकारेऽञ्चतावप्रत्ययान्ते तिरसस्तिर्यादेशः । तिर्यङ् । तिर्यञ्चौ । तिरश्चः । तिरश्चा । तिर्यग्भ्याम् ।**

अलुप्ताकारे अप्रत्ययान्ते च अञ्चतौ परे पूर्वस्य 'तिरस्' इत्यस्य 'तिरि' इत्यादेशः । तिरः अञ्चतीत्यर्थे 'तिरस्' इत्यव्ययपूर्वकस्य क्विन्नन्तस्य अञ्च् इत्यस्य नलोपे, ततः पूर्वस्य 'तिरस्' इत्यस्य अनेन 'तिरि'

इत्यादेशे यणि 'तिर्यच्'- शब्दः तस्मात् सौ नुमि सुलोपादिकं पूर्ववत् । शसादौ अचि "अचः" इति अल्लोपे तिरसः सकारस्य श्चुत्वेन शकारे पदान्तसकारस्य रुत्वविसर्गौ । भ्यामादौ हलादौ चकारस्य कुत्वे जश्त्वम् ।

**नाञ्चेः पूजायाम् ६।४।३०**

**पूजार्थस्याञ्चतेरूपधाया नस्य लोपो न । प्राङ् । प्राञ्चौ । नलोपाभावादल्लोपो न, प्राञ्चः । प्राङ्भ्याम् । प्राङ्षु, प्राङ्क्षु । एवं पूजार्थे प्रत्यङ्ङादयः । क्रुङ् । क्रुञ्चौ । क्रुञ्चः । क्रुङ्भ्याम् । पयोमुक्, पयोमुग् । पयोमुचः । पयोमुग्भ्याम् ।**

पूजार्थे वर्तमानाद् अञ्च्-धातोः क्विन्प्रत्यये "अनिदिताम्०-" इति नलोपे प्राप्ते अनेन तन्निषेधः, ततः 'प्र+अञ्च्' इत्यत्र सवर्णदीर्घे 'प्राञ्च्'-शब्दः, तस्मात् सौ हल्ङ्यादिलोपे, संयोगान्तलोपेन चकारस्य निवृत्तौ ञकारस्यापि निवृत्तिः, ततः नकारस्य कुत्वेन ङकारे 'प्राङ्' इति । शसि 'प्र+अञ्च्+अस्' इति स्थिते नलोपाभावाद् "अचः" इति अकारलोपो न, तस्मात् सवर्णदीर्घे कृते पदान्तसकारस्य रुत्वविसर्गौ । भ्याम्-विभक्तौ 'प्राञ्च्+भ्याम्' इति स्थिते पदसंज्ञायां चकारस्य "संयोगान्तस्य-" इति लोपे ञकारस्यापि निवृत्तौ 'प्रान्+सु' इति स्थिते नकारस्य कुत्वेन ङकारे "ङ्णोः कुक्टुक् शरि" इति कुगागमेऽनुबन्ध-लोपे 'प्राङ्क्+सु' इति जाते "आदेशप्रत्यययोः" इति षत्वे ककार-षकारयोः संयोगे क्षे 'प्राङ्क्षु' इति । कुगागमाभावे- 'प्राङ्षु' इति । एवमेव पूजार्थे- प्रत्यङ्, प्रत्यञ्चौ प्रत्यञ्चः इति । 'क्रुञ्च्-' धातोः "ऋत्विग्०-" इत्यादिसूत्रेण क्विन्प्रत्यये तस्य सर्वापहारलोपे क्रुञ्च्-शब्दात् सौ सुलोपे संयोगान्तलोपे नकारस्य कुत्वेन ङकारः । 'पयो मुञ्चति' इत्यर्थे मुच्धातोः क्विपि 'पयोमुच्-' शब्दः, तस्मात् सौ सुलोपे "चोः कुः" इति चकारस्य कुत्वेन ककारे तस्य जश्त्वेन गकारे वैकल्पिके चर्त्वे 'पयोमुक्' इति, चर्त्वाभावे 'पयोमुग्' इति ।

## तकारान्तशब्दनिरूपणम्-

**वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च** (उ.सू.२४१)

**एते निपात्यन्ते, शतृवच्चैषां कार्यं स्यात् । उगित्वान्नुम् ।**

मह पूजायाम्- पृषत्-बृहत्-महत्-गच्छत्-शब्दा अतिप्रत्ययान्ता निपात्यन्ते, एषां शतृ-प्रत्ययान्तवत् कार्यं च स्यादित्यर्थः । शतृवत्कार्ये प्राप्ते अत्रापि "उगिदचाम्-" इति नुम्भवतीति भावः । 'मह' धातोः अतिप्रत्ययान्ते निपातिते महत्-शब्दः, तस्मात् सौ शतृवद्भावे 'उगिदचाम्-" इति नुमि 'महन्त्+स्' इति स्थिते-

**सान्तमहतः संयोगस्य ६।४।१०**

**सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घोऽसम्बुद्धौ सर्वनामस्थाने । महान् । महान्तौ । महान्तः । हे महन् । महतः । महद्भ्याम् ।**

सान्तो यः संयोगः तस्य, महत्-शब्दस्य च यो नकारस्तस्य उपधाया दीर्घः स्यात्, सम्बुद्धिभिन्नसर्वनामस्थाने परे इत्यर्थः । अनेनात्र उपधादीर्घे सुलोपे संयोगान्तलोपे च कृते 'महान्' इति । 'हे महन्' इत्यत्र सम्बुद्धिपरत्वाद् दीर्घाभावः । शसि- सर्वनामस्थानत्वाभावाद् नुम्-दीर्घौ न । धीः अस्यास्तीत्यर्थे, धीशब्दाद् मतुप्-प्रत्यये 'धीमत्-शब्दः, तस्य तद्धितान्तत्वात् प्रातिपदिकत्वे सौ 'धीमत्+स्' इति स्थिते "उगिदचाम्-" इति प्राप्ते-

**अत्वसन्तस्य चाधातोः ६।४।१४**

**अत्वन्तस्योपधाया दीर्घो धातुभिन्नासन्तस्य चासम्बुद्धौ सौ । धीमान् । धीमन्तौ । धीमन्तः । हे धीमन् । शसादौ महद्वत् ।**

अत्वन्तस्य धातुभिन्नासन्तस्य च उपधाया दीर्घः, सम्बुद्धिभिन्ने सौ परे इत्यर्थः । अनेन नित्यं परमपि नुमं बाधित्वा पूर्वं दीर्घे ततो नुमि सुलोपे संयोगान्तलोपे च 'धीमान्' इति । असम्बुद्धौ सौ परे एव दीर्घविधानाद् औ-जस्-सम्बुद्धिषु परेषु दीर्घो न । शसादौ च महत्-शब्दवद्रूपाणि ।

**भातेर्डवतुः** (उ.सू.६३) **डित्वसामर्थ्यादभस्यापि टेर्लोपः । भवान् । भवन्तौ । शत्रन्तस्य तु- भवन् ।**

भाधातोः डवतुप्रत्ययः स्यादित्यर्थः । 'डवतु' इत्यत्र डकार इत्संज्ञकः, उकारश्च उच्चारणार्थः । ततः 'भा+अवत्' इति स्थिते टेर्लोपो भवति इति बोध्यम् । 'भवत्-' शब्दात् "कृत्तद्धिते-" इति सूत्रेण प्रातिपदिकात् सौ "अत्वसन्तस्य-" इति दीर्घे "उगिदचाम्-" इति नुमि हल्ङ्यादिलोपे संयोगान्तलोपे च 'भवान्' इति । भूधातोः लटि "लटः शतृशानचौ-" इत्यनेन शतृप्रत्ययेऽनुबन्धलोपे धातोः ऊकारस्य गुणे अवादेशादौ च यो 'भवत्'शब्दः स शत्रन्तः, तस्य अत्वन्तत्वाभावाद् दीर्घो न भवति । तत्र सौ नुमि सुलोपे संयोगान्तलोपे च 'भवन्' इति रूपम् । दाधातोः लटः शतृप्रत्यये 'ददत्' शब्दः, तस्मात् सौ 'ददत्+स्' इति स्थिते "उगिदचाम्-" इति नुमि प्राप्ते-

**उभे अभ्यस्तम् ६।१।५**

**षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्त-संज्ञे स्तः ।**

'अष्टाध्याय्याः षष्ठाध्यायस्थ-द्वित्वप्रकरणे यद् द्वित्वम्, तत्र द्विरुच्चरितसमुदायस्य अभ्यस्त-संज्ञा स्यादित्यर्थः अनेनात्र 'दद्' इति समुदायस्य अभ्यस्तसंज्ञायाम्-

**नाभ्यस्ताच्छतुः ७।१।७८**

**अभ्यस्तात्परस्य शतुर्नुम् न । ददत् । ददतौ ।**

अभ्यस्तसंज्ञकात्परस्य 'शतृ'-प्रत्ययस्य नुम् न स्यादित्यर्थः । अनेन नुमो निषेधे "उगिदचाम्-" इति प्राप्ते-

**जक्षित्यादयः षट् ६।१।६**

**षड् धातवोऽन्ये जक्षितिश्च सप्तम एतेऽभ्यस्तसंज्ञाः स्युः । जक्षत् । जक्षतौ । जक्षतः । एवम्- जाग्रत्, दरिद्रत्, शासत्, चकासत् । दीधीङ्- दीप्तिदेवनयोः । वेवीङ्-वेतिना तुल्ये । एतौ छान्दसौ । दीध्यत् । वीव्यत् ।**

**जक्षि-जागृ-दरिद्रा-शास्-दीधीङ्-वेवीङ्-चकास्तथा ।**
**अभ्यस्तसंज्ञा विज्ञेया धातवो मुनिभाषिताः ॥१॥**

## पकारान्तशब्दनिरूपणम्-

**गुप्, गुब् । गुपौ । गुपः । गुब्भ्याम् ।**

गुप्-धातोः क्विप्-प्रत्यये गुप्-शब्दः । गुप्धातोः रक्षणमर्थः । 'गुप्' इत्यस्य "कृत्तद्धित-" इति प्रातिपदिकत्वे, तस्मात् सौ सुलोपे जश्त्वचर्त्वयोः 'गुप्' इति, चर्त्वाभावे 'गुब्' इति रूपम् । भ्यामादौ हलादौ "स्वादिष्वसर्वनामस्थाने' इति पदत्वात् पकारस्य जश्त्वम् ।

## शकारान्तशब्दनिरूपणम्-

**त्यदादिषु दृशोऽनालोनचे कञ्च ३।२।६०**

**त्यदादिषूपपदेषु अज्ञानार्थाद् दृशेर्धातोः 'कञ्'- स्यात्, चात् क्विन् ।**

त्यदादिगणपठितेषु शब्देषु उपपदेषु सत्सु ज्ञानभिन्नेऽर्थे वर्तमानाद् दृश्धातोः 'कञ्' प्रत्ययः, 'क्विन्' प्रत्ययश्चेत्यर्थः । अत्र क्विन्- प्रत्ययान्तस्योदाहरणम्- तद्-शब्दे उपपदे दृश्-धातोः अनेन क्विन्प्रत्यये उपपदसमासे 'तद्+दृश्' इति स्थिते-

**आ सर्वनाम्नः ६।३।९१**

**दृग्दृश्वतुषु । तादृक्, तादृग् । तादृगौ । तादृशः । तादृग्भ्याम् । व्रश्चेति षः, जश्त्वचर्त्वे- विट्, विड् । विशौ । विशः । विड्भ्याम् ।**

सर्वनामशब्दस्य आकारोऽन्तादेशः स्यात्, दृग्-दृश्-वतुषु परेषु इत्यर्थः । अनेनात्र तद्-शब्दस्य दकारस्य आकारे सवर्णदीर्घे 'तादृश्' शब्दः, तस्मात् सौ हल्ङ्यादिलोपे कुत्वस्यासिद्धत्वात् 'व्रश्चेति' षत्वे तस्य "झलां जशोऽन्ते" इति जश्त्वेन डकारे तस्य "क्विन्प्रत्ययस्य कुः" इति कुत्वेन गकारे तस्य "वाऽवसाने' इति चर्त्वेन ककारे 'तादृक्' इति, चर्त्वाभावे 'तादृग्' इति रूपम् । प्रवेशार्थकाद् विश्धातोः क्विप्-प्रत्यये विश्-शब्दः, तस्मात् सौ हल्ङ्यादिलोपे "व्रश्चभ्रस्ज-" इति शकारस्य षत्वे षकारस्य जश्त्वेन डकारः तस्य चर्त्वेन टकारः । अदर्शनार्थकात् णश्धातोः "णो नः" इति नत्वे क्विपि नश्-शब्दः, तस्मात् सौ सुलोपे "व्रश्च-" इत्यादिना नित्यं षत्वे प्राप्ते-

**नशेर्वा ८।२।६३**

**नशेः कवर्गोऽन्तादेशो वा पदान्ते । नक्, नग् । नट्, नड् । नशौ । नशः । नग्भ्याम् । नड्भ्याम् ।**

अनेन विभाषया शकारस्य कवर्गादिशेन खकारे तस्य जश्त्व-चर्त्वयोः 'नक्' इति चर्त्वाभावे- 'नग्' इति ।

'व्रश्च-' इति षत्वपक्षे जश्त्व-चर्त्वाभ्यां 'नट्, नड्' इति रूपे ।

**स्पृशोऽनुदके क्विन् ४।२।५६**

**अनुदके सुप्युपपदे स्पृशेः क्विन् । घृतस्पृक्, घृतस्पृग् । घृतस्पृशौ । घृतस्पृशः ।**

उदकशब्दभिन्ने सुबन्ते उपपदे स्पृश्-धातोः क्विन् स्यादित्यर्थः । 'घृतं स्पृशति' इत्यर्थे घृतशब्दोपपदात् स्पृश्-धातोः अनेन क्विन्-प्रत्यये, उपपदसमासे 'घृतस्पृश्-शब्दः, तस्मात् सौ हल्ङ्यादिलोपे कुत्वस्यासिद्धत्वात्पूर्वं "व्रश्च-" इति शकारस्य षत्वे तस्य जश्त्वेन डकारे तस्य कुत्वेन गकारे चर्त्वविकल्पः ।

## षकारान्तशब्दनिरूपणम्-

दधृक्, दधृग् । दधृषौ । दृधृषः । दधृग्भ्याम् । रत्नमुट्, रत्नमुड् । रत्नमुषौ । रत्नमुषः । रत्नमुड्भ्याम् । षट्, षड् । षड्भिः । षण्णाम् । षट्त्सु, षट्सु । यत्तु प्राचा- षण्णां षड्णामित्युदाहृत्तं तत्प्रामादिकमेव, "प्रत्यये भाषायाम्-" इति नित्यवचनात् । रुत्वं प्रति षत्वस्यासिद्धत्वात् ससजुषो रुरिति रुत्वम् ।

धृष्णोति इति दधृक्, प्रागल्भ्यार्थकात् धृष्धातोः "ऋत्विग्दधृक्-" इति क्विन्, द्वित्वादौ निपातिते 'दधृष्-' शब्दः, तस्मात् सौ हल्ङ्यादिलोपे जश्त्वं प्रति कुत्वस्यासिद्धत्वात्पूर्वं षकारस्य जश्त्वेन डकारे ततः कुत्व-चर्त्वयोः 'दधृक्' इति, चर्त्वाभावे 'दधृग्' इति रूपम् । भ्यामादौ हलादौ विभक्तौ अपि षकारस्य जश्त्वे कुत्वे च गकारः । 'रत्नं मुष्णाति' इत्यर्थे रत्नशब्दोपपदात् स्तेयार्थकाद् मुष्-धातोः क्विपि उपपदसमासे 'रत्नमुष्-' शब्दः, ततः सौ हल्ङ्यादि-लोपः, जश्त्वचर्त्वे च रत्नमुट्, रत्नमुड् । षष्-शब्दो नित्यं बहुवचनान्तः, तस्मात् जसि शसि च 'षष्+अस्' इति स्थिते 'ष्णान्ता षट्' इति षट्-संज्ञायां "षड्भ्यो लुक्" इति जश्शसोः लुकि षकारस्य जश्त्वचर्त्वे षट् इति । आम्-विभक्तौ 'षष्+आम्' इति स्थिते षट्संज्ञायां "षट्चतुर्भ्यश्च" इति नुडागमेऽनुबन्धलोपे 'षष्+नाम्' इति जाते षकारस्य जश्त्वेन डकारे तस्य "प्रत्यये भाषायां नित्यम्" इति वार्तिकेन डकारस्य नित्यमनुनासिके णकारे 'षण्णाम्' इति रूपम् । सुपि पदसंज्ञायां जश्त्वे 'षड्+सु' इति जाते "डः सि धुट्" इति धुडागमे डकार-धकारयोः "खरि च" इति चर्त्वे 'षट्त्सु' इति धुडागमाभावपक्षे 'षट्सु' इति रूपम् । 'षण्णाम्' इत्यत्र प्राचीनैः वैयाकरणैः अनुनासिकविकल्पं मत्वा रूपद्वयं यदुक्तं तद् असावधानत्वात् । वस्तुतस्तु प्रत्यये परे उक्तवार्तिकेन नित्यविधानमेवोचितम् । 'पठितुमिच्छति' इत्यर्थे पठ्-धातोः सन्-प्रत्यये द्वित्वादौ 'पिपठिष-'धातुः, तस्मात् क्विपि अकारलोपे 'पिपठिष्-' शब्दः, तस्य कृदन्तत्वात् प्रातिपदिकत्वे सौ हल्ङ्यादिलोपे "ससजुषो रुः" इति रुत्वम् । ततः 'पिपठिर्' इति जाते-

**र्वोरुपधाया दीर्घ इकः ८।२।७६**

**रेफ-वान्तस्य धातोरुपधाया इको दीर्घः पदान्ते । पिपठीः । पिपठिषौ । पिपठिषः । पिपठीर्भ्याम् ।**

अनेन इकारस्य दीर्घे रेफस्य विसर्गे 'पिपठीः' इति रूपम् । एवं भ्यामादौ पदान्तत्वाद् इकारस्य दीर्घो बोध्यः । सुपि पदसंज्ञायां षत्वस्यासिद्धत्वात् "ससजुषो रुः" इति रुत्वे अनेन इकारस्य दीर्घे "खरवसानयोः-" इति खरि परे रेफस्य विसर्गे "विसर्जनीयस्य सः" विसर्गस्य सत्वपक्षे 'पिपठीस् सु' इति जाते-

**नुम्विसर्जनीय-शर्व्यवायेऽपि ८।३।५८**

**एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य सस्य मूर्धन्यादेशः । ष्टुत्वेन पूर्वस्य षः । पिपठीषु, पिपठीःषु । चिकीः । चिकीर्षौ । चिकीर्षु ।**

नुम्, विसर्जनीयः, शर् इत्येतेषां प्रत्येकं व्यवधानेऽपि (न तु यथासम्भवं मिलितानां व्यवधाने) इण्-कवर्गाभ्यां परस्य सकारस्य षत्वमित्यर्थः । अनेन सुपः सकारस्य षत्वे पूर्वसकारस्य ष्टुत्वे 'पिपठीषु' इति । "वा शरि" इति विसर्गपक्षेऽपि अनेनैव षत्वे 'पिपठीःषु' इति रूपम् । 'कर्तुमिच्छति' इत्यर्थे कृधातोः सनि 'चिकीर्ष-' धातुः, तस्मात् क्विपि अकारलोपे 'चिकीर्ष्-'शब्दः तस्मात् सौ सुलोपे षत्वस्यासिद्धत्वात् "रात्सस्य" इति सकारलोपे रेफस्य विसर्गे 'चिकीः' इति । सुपि 'चिकीर्ष्+सु' इति स्थिते षत्वस्यासिद्धत्वात् "रात्सस्य" इति सलोपे "आदेशप्रत्यययोः" इति षत्वम् ।

## सकारान्तशब्दनिरूपणम्

**विद्वान् । विद्वांसौ । हे विद्वन् ।**

वेत्तीति विद्वान्, ज्ञानार्थकाद् विद्-धातोः शतृ-प्रत्यये तस्य "विदेः शतुर्वसुः" इति 'वस्' इत्यादेशे 'विद्वस्' शब्दः, तस्मात् सौ "उगिदचां सर्वनामस्थानेऽधातोः" इति नुमि, "सान्तमहतः-" इति दीर्घे सुलोपे संयोगान्तलोपे 'विद्वान्' इति । अत्र नलोपस्तु न, संयोगान्तलोपस्यासिद्धत्वात् । औविभक्तौ 'विद्वस्+औ' इति स्थिते नुमि दीर्घे "नश्चापदान्तस्य झलि" इति नकारस्यानुस्वारे 'विद्वांसौ' इति । एवं जसादावपि । शसि तु 'विद्वस्+अस्' इति स्थिते भसंज्ञायाम्-

**वसोः सम्प्रसारणम् ६।४।१३१**

**वस्वन्तस्य भस्य संप्रसारणम् । विदुषः । वसुस्त्रंस्विति दत्वम्- विद्वद्भ्याम् ।**

अनेन वकारस्य सम्प्रसारणे "संप्रसारणाच्च" इति पूर्वरूपे सकारस्य षत्वे पदान्तसकारस्य रुत्वे विसर्गे च 'विदुषः' इति । भ्यामादौ हलादौ "वसुस्रंसुध्वंस्वनडुहां दः" इति सकारस्य दत्वे 'विद्वद्भ्याम्' इत्यादि बोध्यम् ।

**पुंसोऽसुङ् ७।१।८९**

**सर्वनामस्थाने विवक्षिते पुंसोऽसुङ् स्यात् । पुमान् । हे पुमन् । पुमांसौ । पुंसः । पुम्भ्याम् । पुंसु । ऋदुशनेत्यनङ्- उशना । उशनसौ ।**

सर्वनामस्थानसंज्ञके प्रत्यये प्रयोक्तव्ये ततः प्रागेव पुंस्-शब्दस्य 'असुङ्' इत्यादेशः स्यादित्यर्थः । 'असुङ्' इत्यत्र उकारः उच्चारणार्थः, ङकारः इत्संज्ञकः, तेन "ङिच्च" इति अन्त्यस्य सकारस्य आदेशः । अनेनात्र सुप्रत्यये विवक्षिते असुङादेशेऽनुबन्धलोपे निमित्तापायाद् अनुस्वारस्यापि निवृत्तिः, ततः 'पुमस्+स्' इति स्थिते उगित्वान्नुमि "सान्तमहतः-" इति दीर्घे सुलोपे संयोगान्तलोपे च 'पुमान्' इति रूपम्। सम्बुद्धौ दीर्घाभावात् 'हे पुमन्' इति । शसादौ विभक्तौ असुङादेशाभावात्- 'पुंसः, पुंसा' इति । भ्यामादौ 'पुंस्+भ्याम्' इति स्थिते सकारस्य संयोगान्तलोपे अनुस्वारस्य निवृत्तावपि पुनः अनुस्वारपरसवर्णौ । उशनस्-शब्दात् सौ "ऋदुशनस्- पुरुदंसोऽनेहसां च" इति अनङि (ङित्वादन्तादेशे) अनुबन्धलोपे 'उशनन्+स्' इति स्थिते "सर्वनामस्थाने-" इति उपधादीर्घे सुलोपे नलोपे च 'उशना' इति रूपम् ।

**अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः** (वा.) **हे उशन** ! हे **उशनन्** ! हे **उशनः । उशनोभ्याम् । अनेहा । अनेहसौ । अनेहसः ।** हे **अनेहः । वेधाः । वेधसौ । वेधसः ।** हे **वेधः । वेधोभ्याम् ।**

उशनस्-शब्दस्य सम्बुद्धौ अनङ्-नलोपयोर्विकल्पः तत्र अनङि नलोपपक्षे 'हे उशन' इति नलोपाभावे 'हे उशनन्' इति, अनङादेशस्याभावे सकारस्य रुत्वे विसर्गे 'हे उशनः' इति रूपत्रयम् । 'उशनस्+भ्याम्' इत्यत्र पदसंज्ञायाम् पदान्तसकारस्य रुत्वे "हशि च" इति उत्वे गुणः । एवं भिसादावपि । 'अनेहस्-'शब्दात् सौ "ऋदुशनस्-" इति अनङि उपधादीर्घः, सुलोपः, नलोपश्च । वेधस्-शब्दात् सौ "अत्वसन्तस्य-" इति दीर्घे सुलोपे सकास्य रुत्वविसर्गौ ।

**अदस औ सुलोपश्च ७।२।१०७**

**सौ परे । तदोरिति सः- असौ ।**

अदस्-शब्दस्य औकारोऽन्तादेशः स्यात् सौ परे, सुलोपश्चेत्यर्थः । अदस्-शब्दात् सौ "त्यदादीनामः' इति प्राप्ते तं प्रबाध्य अनेन सकारस्य औकारादेशे "तदोःसःसावनन्त्ययोः" इति दकारस्य सत्वे "अदस औ-" इत्यनेनैव सुलोपे च कृते 'असौ' इति ।

**औत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः सादुत्वं च** (वा.) **असकौ । असुकः । त्यदाद्यत्वं पररूपत्वम्, वृद्धिः ।**

अदस्-शब्देन अकच्-सहितस्यापि ग्रहणाद् औत्वे प्राप्ते विकल्पेन तत्प्रतिषेधो वक्तव्यः, प्रतिषेधपक्षे सकारात्परस्य अकारस्य उत्वं च इत्यर्थः । अदस्-शब्दस्य "अव्ययसर्वनाम्नामकच् प्राक् टेः" इति अकचि 'अदकस्-शब्दात् सौ 'अदकस्+स्' इति स्थिते औत्वपक्षे सकारस्य औत्वे सुलोपे दकारस्य सत्वे 'असकौ'

इति। औत्वप्रतिषेधपक्षे च दकारस्य सत्वे सति ततः परस्य अकारस्य उत्वे असुकस्+स्' इति जाते त्यदाद्यत्वे पररूपत्वे सकारस्य रुत्वे विसर्गे 'असुकः' इति अदस्-शब्दात् औविभक्तौ त्यदाद्यत्वे पररूपे 'अद+औ' इति स्थिते "वृद्धिरेचि" इति वृद्धौ 'अदौ' इति जाते-

**अदसोऽसेर्दादुदो मः ८।२।८०**

**अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च। आन्तरतम्याद्ध्रस्वस्य उः, दीर्घस्य ऊः। अमू। जसः शी। गुणः।**

असकारान्तस्य अदस्-शब्दस्य दकारात्परस्य ह्रस्वस्य उः, दीर्घस्य ऊः इति लभ्यते। अनेनात्र औकारस्य दीर्घः ऊकारः। जस्-विभक्तौ अत्वे पररूपे 'अद+अस्' इति स्थिते "जसः शी" इति 'शी' इत्यादेशे 'अद+ई' इति जाते "आद् गुणः" इति गुणे 'अदे' इत्यवस्थायाम्-

**एत ईद्बहुवचने ८।२।८१**

**अदसो दात्परस्यैत ईत् स्याद् दस्य च मो बह्वर्थोक्तौ। अमी। पूर्वत्रासिद्धमिति विभक्तिकार्यं प्राक् पश्चादुत्वमत्वे। अमुम्। मुत्वे कृते। घिसंज्ञायां नाभावः।**

अदसः दकारात्परस्य एकारस्य ईकारः, दकारस्य च मकारः बहुवचने इत्यर्थः। अनेन ईत्वे मत्वे च कृते 'अमी' इति रूपम्। अदस्-शब्दाद् औजसादिषु त्यदाद्यत्वे प्राप्ते उत्वमत्वयोश्च प्राप्तयोः "पूर्वत्रासिद्धमि"ति उत्वमत्वविधायकशास्त्रस्य असिद्धत्वात् पूर्वं विभक्तिकार्यम्। अत्वादिकम्, तत उत्वमत्वे भवत इति भावः। अम्-विभक्तौ अत्वे पररूपे च 'अद + अम्' इति स्थिते "अमि पूर्वः" इति पूर्वरूपे 'अदम्' इति जाते "अदसोऽसे-" इति उत्वमत्वयोः 'अमुम्' इति। टा-विभक्तौ अत्वे पररूपे 'अद+आ' इति स्थिते उत्वमत्वयोः 'अमु+आ' इति जाते "शेषो घ्यसखि" इति घिसंज्ञायाम् "आङो नाऽस्त्रियाम्" इति नाभावे 'अमुना' इति रूपम्। यद्यपि- 'पूर्वत्रासिद्धमिति विभक्तिकार्यं प्राक्- "इति पूर्वमुक्तम्, तथापि यद्विभक्तिकार्यं प्रति मुत्वं निमित्तं न भवति, तदेव विभक्तिकार्यं मुत्वात्प्राग्भवतीति बोध्यम्। अत एवात्र 'मुत्वे कृते घिसंज्ञायां नाभावः' इत्युक्तम्। ननु प्रथमं मुत्वे कृतेऽपि नाभावे कर्तव्ये मुत्वस्यासिद्धत्वेन घेः परत्वाभावाद् नाभावोऽसम्भव इति चेत्, उच्यते-

**न मु ने ८।२।३**

**नाभावे कर्तव्ये कृते च मुभावो नासिद्धः। अमुना। अमूभ्याम्। अमीभिः। अमुष्मै। अमीभ्यः। अमुष्मात्। अमुष्य। अमुयोः। अमीषाम्। अमुष्मिन्। अमीषु।**

अनेनात्र नाभावे कर्तव्ये मुभावस्य असिद्धत्वाभावेन घेः परत्वाद् नाभावे प्रतिबन्धकाभावः। भ्याम्-विभक्तौ अत्वे पररूपे 'अद + भ्याम्' इत्यत्र "सुपि च" इति दीर्घे 'अदा + भ्याम्' इति जाते आकारस्य ऊत्वम्,

दकारस्य मत्वञ्च । भिस्-विभक्तौ अत्वे पररूपे 'अद+भिस्' इति स्थिते "अतो भिस ऐस्" इति प्राप्ते "नेदमदसोरकोः" इति तन्निषेधे "बहुवचने झल्येत्" इति एत्वे 'अदे + भिस्' इत्यवस्थायां "एत ईद्बहुवचने" इति ईत्वे मत्वे च सकारस्य रुत्वविसर्गौ । ङे-विभक्तौ अत्वे पररूपे 'सर्वनाम्नः स्मै' इति 'स्मै' इत्यादेशे उत्वे मत्वे सकारस्य षत्वम् । भ्यस्-विभक्तौ 'अदेभ्यस्' इति स्थिते ईत्वमत्वे । ङसि-विभक्तौ "अद + अस्" इति स्थिते "ङसिङ्योः-" इति 'स्मात्' इत्यादेशे उत्वमत्वयोः षत्वम् । ङस्-विभक्तौ 'अद + अस्' इति स्थिते "टाङसिङसाम्-" इति 'स्य' इत्यादेशे उत्वमत्वयोः कृतयोः सकारस्य षत्वम् । ओसि-'अद+ओस्' इति स्थिते 'ओसि च" इति एत्वेऽयादेशे उत्वमत्वे सकारस्य रुत्वविसर्गौ । आम्-विभक्तौ 'अद + आम्' इति स्थिते "आमि सर्वनाम्नः सुट्" इति सुटि एत्वे 'अदे + साम्' इति जाते ईत्वं मत्वं षत्वं च । ङि-विभक्तौ 'अद + इ' इति स्थिते 'स्मिन्' इत्यादेशे उत्वमत्वे षत्वं च । सुपि 'अद + सु' इति स्थिते "बहुवचने-" इति एत्वे ईत्व-मत्वयोः षत्वम् ।

## अभ्यासः

### १. अधो लिखितानां प्रश्नानामुत्तराणि दत्त

(क) 'अच' इति कस्य अकारस्य लोपः ?

(ख) सह-शब्दस्य 'सध्रि' इत्यादेशः कुत्र भवति ?

(ग) पूजार्थकस्य अञ्च्-धातोः नकारस्य लोपः कथं न ?

(घ) 'महान्' इतिवत् 'हे महन्' इत्यत्र दीर्घः कथं न ?

(ङ) शत्रन्तस्य भवत्-शब्दस्य किमर्थं 'भवन्' इति रूपम्, तत्र दीर्घनिषेधः केन ?

(च) पदान्तसकारस्य रुत्वविधायकेन 'ससजुषो रुः' इति सूत्रेण 'पिपठिष्' इत्यस्य षकारस्य कथं रुत्वम् ?

(छ) 'पुंसोऽसुङ्' इति सूत्रेण अन्त्यस्यैव 'असुङ्' कथम्, सम्पूर्णस्य कथं न ?

### २. एतेषां सूत्राणामर्थं वदत

उद ईत् । सान्तमहतः संयोगस्य । त्यदादिषु दृशोऽनालोचने कञ्च । र्वोरुपधाया दीर्घ इकः । अदसोऽसेर्दादुदो मः । न मु ने ।

### ३. अधोऽङ्किताः प्रयोगाः साधनीयाः

प्राङ् । प्रतीचः । धीमान् । ददत् । षष्णाम् । विदुषः । अमू । अमुना ।

### ४. अमीषां शब्दानां सर्वासु विभक्तिषु रूपाणि लिखत

उदच्, धीमत्, पुंस्, वेधस् ।

## ५. रिक्तस्थानं पूरयत

(क) "अनिदिताम्-" इति नकारस्य लोपः ........... प्रत्यये परे ।

(ख) .......... अञ्च्धातौ परे ........... इति सूत्रेण ............... इत्यस्य 'समि' इत्यादेश ।

(ग) अभ्यस्तसंज्ञकात् परस्य ............ प्रत्ययस्य ........... इति सूत्रेण नुम्निषेधः ।

(घ) 'तद् + दृश्' इति स्थिते ......... इति सूत्रेण ............ आत्वे ............. इति रूपम् ।

(ङ) ............... सुपि उपपदे स्पृश्धातोः .......... इति सूत्रेण .............. प्रत्ययः ।

## ६. युक्तकथनेषु ✓ इति चिह्नम्, अयुक्तकथनेषु ✕ इति चिह्नं योजयत

(क) 'चौ' इति सूत्रेण अकारस्य लोपो भवति ।

(ख) प्रपूर्वकाद् अञ्च्धातोः नलोपाभावपक्षे जश्शसोः 'प्राञ्चः' इति समानं रूपम् ।

(ग) शत्रन्तस्य डवतुप्रत्ययान्तस्य च भवत्-शब्दस्य औ-जसोः द्वितीयादौ च समानं रूपम् ।

(घ) उशनस्-शब्दस्य सम्बुद्धौ परे "ऋदुशनस्-" इति अनङादेशाभावात् 'हे उशनः' इत्येव रूपम् ।

(ङ) 'असकौ' इति अदस्-शब्दस्य अकचि कृते औविभक्तौ रूपम् ।

## ७. केषां धातूनाम् अभ्यस्तसंज्ञा भवति ? स्पष्टयत ।

## ८. अधस्तनानां पदानां वाक्येषु प्रयोगं दर्शयत

महान्तः, जाग्रत्, तादृशः, पुंसः, अमुम्, अमुष्मै, अमुष्मिन् ।

### विशेषाध्ययनम्-

## १. शब्दरूपावलिः

**महत्-तादृश्-पिपठिष्-विद्वस्-अदस्-शब्दानां रूपाणि**

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | महान् | महान्तौ | महान्तः |
| **द्वितीया** | महान्तम् | महान्तौ | महतः |
| **तृतीया** | महता | महद्भ्याम् | महद्भिः |
| **चतुर्थी** | महते | महद्भ्याम् | महद्भ्यः |

| | | | |
|---|---|---|---|
| **पञ्चमी** | महतः | महद्भ्याम् | महद्भ्यः |
| **षष्ठी** | महतः | महतोः | महताम् |
| **सप्तमी** | महति | महतोः | महत्सु |
| **सम्बोधनम्** | हे महन् | हे महान्तौ | हे महान्तः |

| **विभक्तयः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | तादृक्-तादृग् | तादृशौ | तादृशः |
| **द्वितीया** | तादृशम् | तादृशौ | तादृशः |
| **तृतीया** | तादृशा | तादृग्भ्याम् | तादृग्भिः |
| **चतुर्थी** | तादृशे | तादृग्भ्याम् | तादृग्भ्यः |
| **पञ्चमी** | तादृशः | तादृग्भ्याम् | तादृग्भ्यः |
| **षष्ठी** | तादृशः | तादृशोः | तादृशाम् |
| **सप्तमी** | तादृशि | तादृशोः | तादृक्षु |
| **सम्बोधनम्** | हे तादृक्-ग् | हे तादृशौ | हे तादृशः |

| **विभक्तयः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | पिपठीः | पिपठिषौ | पिपठिषः |
| **द्वितीया** | पिपठिषम् | पिपठिषौ | पिपठिषः |
| **तृतीया** | पिपठिषा | पिपठीर्भ्याम् | पिपठीर्भिः |
| **चतुर्थी** | पिपठिषे | पिपठीर्भ्याम् | पिपठीर्भ्यः |
| **पञ्चमी** | पिपठिषः | पिपठीर्भ्याम् | पिपठीर्भ्यः |
| **षष्ठी** | पिपठिषः | पिपठिषोः | पिपठिषाम् |
| **सप्तमी** | पिपठिषि | पिपठिषोः | पिपठीष्षु-पिपठीःषु |
| **सम्बोधनम्** | हे पिपठीः | हे पिपठिषौ | हे पिपठिषः |

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | विद्वान् | विद्वांसौ | विद्वांसः |
| **द्वितीया** | विद्वांसम् | विद्वांसौ | विदुषः |
| **तृतीया** | विदुषा | विद्वद्भ्याम् | विद्वद्भिः |
| **चतुर्थी** | विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः |
| **पञ्चमी** | विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः |
| **षष्ठी** | विदुषः | विदुषोः | विदुषाम् |
| **सप्तमी** | विदुषि | विदुषोः | विद्वत्सु |
| **सम्बोधनम्** | हे विद्वन् | हे विद्वांसौ | हे विद्वांसः |

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | असौ | अमू | अमी |
| **द्वितीया** | अमुम् | अमू | अमून् |
| **तृतीय** | अमुना | अमूभ्याम् | अमीभिः |
| **चतुर्थी** | अमुष्मै | अमूभ्याम् | अमीभ्यः |
| **पञ्चमी** | अमुष्मात्-द् | अमूभ्याम् | अमीभ्यः |
| **षष्ठी** | अमुष्य | अमुयोः | अमीषाम् |
| **सप्तमी** | अमुष्मिन् | अमुयोः | अमीषु |

२. **सान्तेषु उशनस्-अनेहस्-वेधस्-शब्दानां प्रायः समानानि रूपाणि भवन्ति, सुविभक्तौ तु 'उशना' 'अनेहा' इति विसर्गरहितं रूपम्, 'वेधस्' इत्यस्य च 'वेधाः' इति विसर्गसहितं रूपमिति भेदः । चन्द्रमस्- शब्दस्यापि 'वेधस्' शब्दवद्रूपाणि भवन्ति । यथा- चन्द्रमाः, चन्द्रमसौ इति । अन्यत्र समानम्, यथा- उशनोभ्याम्, अनेहोभ्याम्, वेधोभ्याम्, चन्द्रमोभ्याम् इत्यादि ।**

# हलन्तस्त्रीलिङ्गनिरूपणम्

**नहो धः ८।२।३४**

नहो हस्य धः स्याज्झलि पदान्ते च ।

नह्-धातोः हस्य धः स्याद् झलि परे पदान्ते च इत्यर्थः । बन्धनार्थकाद् 'णह्'-धातोर्णस्य "णो नः" इति नत्वे 'नह्' इति ।

**नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनिषु क्वौ ६।३।११६**

**क्विबन्तेष्वेषु पूर्वस्याऽणो दीर्घः । उपानत्, उपानद् । उपानहौ । उपानहः । उपानद्भ्याम् । उपानत्सु । क्विन्नन्तत्वात्कुत्वेन हस्य घः । जश्त्वचर्त्वे – उष्णिक्, उष्णिग् । उष्णिहौ । उष्णिग्भ्याम् ।**

क्विप्-प्रत्ययान्तेषु मह्-वृत्-वृष्-व्यध्-रुच्-सह्-तन्-धातुषु परेषु पूर्वस्य अणः दीर्घः स्यादित्यर्थः । अनेनात्र नह् -धातोः पूर्वस्य अणः (पकाराद् अकारस्य) दीर्घे 'उपानह्शब्दः, तस्मात् कृदन्तात् प्रातिपदिकात् सौ 'उपानह् + स्' इति स्थिते 'हल्ङ्याब्भ्यो दीर्घात्-' इति सुलोपे "हो ढः" इति हस्य ढत्वे प्राप्ते तं प्रबाध्य "नहो धः" इति हस्य धत्वे 'उपानध्' इति जाते "झलां जशोऽन्ते" इति धकारस्य जश्त्वेन दकारे वैकल्पिके चर्त्वे 'उपानत्' इति चर्त्वाभावे 'उपानद्' इति । औजसादौ पदान्तत्वाभावाद् झल्परत्वाभावाच्च हस्य धत्वं न । भ्यामादौ हलादौ च हस्य धत्वं जश्त्वं च । सुपि हस्य धत्वे "खरि च" इति चर्त्वम् । 'उष्णिह्-' शब्दः "ऋत्विग्दधृक्-" इति क्विन्-प्रत्ययान्तः, छन्दोविषयवाची स्त्रीलिङ्गः, तस्मात् सु-विभक्तौ हल्ङ्यादिलोपे "क्विन्प्रत्ययस्य कुः" इति हकारस्य कुत्वेन घकारे तस्य जश्त्वे चर्त्वे च 'उष्णिक्' इति, चर्त्वाभावे 'उष्णिग्' इति ।

## वकारान्तशब्दनिरूपणम्–

**द्यौः । दिवौ । दिवः । द्युभ्याम् ।**

दिव्-शब्दात् सौ "दिव औत्" इति वकारस्य औत्वे 'दि + औ स्' इति जाते यणि सकारस्य रुत्वे विसर्गे 'द्यौः' इति । भ्याम्-विभक्तौ 'दिव् + भ्याम्' इति स्थिते "दिव उत्" इति वकारस्य उत्वे यणि 'द्युभ्याम्' इति ।

## रेफान्तशब्दनिरूपणम्–

**गीः । गिरौ । गिरः । एवं पूः । चतस्रः २ । चतसृभिः । चतसृभ्यः २ । चतसृणाम् । चतसृषु ।**

गिर्-शब्दात् सौ सुलोपे "र्वोरुपधायाः-" इति दीर्घे रेफस्य विसर्गे 'गीः' इति । एवं पुर्-शब्दस्यापि रूपाणि- पूः, पुरौ, पुरः इति । चतुर्-शब्दो नित्यं बहुवचनान्तः, तस्मात् जसि शसि च त्रिचतुरोरिति 'चतसृ' इत्यादेशे 'चतसृ + अस्' इति स्थिते "ऋतो ङि-" इति प्राप्तं गुणं पूर्वसवर्णदीर्घम् "ऋत उत्" इति प्राप्तम् उत्वं च प्रबाध्य "अचि र ऋतः" इति ऋकारस्य रत्वे 'चतस्रस्' इति जाते रुत्वविसर्गौ । आमि 'चतसृ + आम्' इति स्थिते "ह्रस्वनद्यापो नुट्" इति नुटि "नामि" इति दीर्घे प्राप्ते "न तिसृचतसृ" इति निषेधे- "ऋवर्णान्नस्य णत्वं वाच्यम्" इति नस्य णत्वे 'चतसृणाम्' इति ।

## मकारान्तशब्दनिरूपणम्-

**का । के । काः । सर्वावत् ।**

किम्-शब्दात् सुविभक्तौ "किमः कः" इति कादेशे 'क + स्' इति स्थिते स्त्रीत्वार्थविवक्षायाम् "अजाद्यतष्टाप्" इति टापि सवर्णदीर्घे 'का + स्' इत्यवस्थायां "हल्ङ्याब्भ्यो दीर्घात्-" इति सुलोपे 'का' इति रूपम् । औविभक्तौ कादेशे टापि सवर्णदीर्घे 'का + औ' इति स्थिते "औङ आपः" इति 'शी' इत्यादेशेऽनुबन्धलोपे 'का + ई' इत्यत्र गुणे 'के' इति रूपम् । जसि 'का + अस्' इति स्थिते "दीर्घाज्जसि च" इति पूर्वसवर्णदीर्घनिषेधात् सवर्णदीर्घे 'काः' इति । सर्वत्र सर्वाशब्दवद्रूपाणि भवन्ति । स्त्रीत्वेऽर्थे वर्तमानाद् इदम्-शब्दात् सुविभक्तौ 'इदम् + स्' इति स्थिते-

**यः सौ ७।२।११०**

**इदमो दस्य यः स्यात्सौ । "इदमो मः" । इयम् । त्यदाद्यत्वम्, पररूपत्वम्, टाप् । "दश्च" इति मः । इमे । इमाः । इमाम् । इमे । इमाः । अनया । आभ्याम् । आभिः । अस्यै । अस्याः २ । अनयोः २ । आसाम् । अस्याम् । आसु ।**

अनेन दकारस्य यत्वे 'इयम् + स्' इति जाते "त्यदादीनामः" इति प्राप्ते तं प्रबाध्य "इदमो मः" इति मकारस्य मकारे एव आदेशे हल्ङ्यादिलोपे 'इयम्' इति । औ-विभक्तौ "त्यदादीनामः" इति अत्वे पररूपे च 'इद+औ' इति स्थिते टाप्-प्रत्यये सवर्णदीर्घे 'इदा+औ' इत्यवस्थायाम्, 'दश्च' इति दकारस्य मकारे 'इमा + औ' इति जाते "औङ आपः" इति शीभावः गुणश्च । जसि अत्वे पररूपे टापि "इदा + अस्" इति स्थिते दकारस्य मकारे "दीर्घाज्जसि च" इति पूर्वसवर्णदीर्घनिषेधात्सवर्णदीर्घः । शसि-पूर्वसवर्णदीर्घः । विभक्तौ अत्वादौ "अनाप्यकः" इति इद्भागस्य 'अन्' इत्यादेशे 'अना + आ' इति जाते "आङि चापः" इति आप एत्वे अयादेशः । भ्याम् - विभक्तौ 'इदा + भ्याम्' इति स्थिते "हलि लोपः" इति इद्भागस्य लोपे 'आभ्याम्' इति । एवम् - 'आभिः' इत्यपि । ङेविभक्तौ 'इदा + ए' इति स्थिते "सर्वनाम्नः स्याड्ढ्रस्वश्च" इति स्याडागमे ह्रस्वे च कृते इद्भागस्य लोपे 'अस्या + ए' इति जाते "वृद्धिरेचि" इति वृद्धिः । ङसिङसोः 'इदा + अस्' इति स्थिते स्याट्, ह्रस्वः, इद्भागस्य लोपः, सवर्णदीर्घश्च । ओसि "अनाप्यकः" इति इद्भागस्य अनादेशे अत्वे पररूपे टापि 'अना+ ओस्' इति जाते "आङि चापः" इति एत्वे अयादेशः । आमि अत्वे

पररूपे टापि 'इदा + आम्' इति स्थिते "आमि सर्वनाम्नः सुट्" इति सुडागमे इद्भागस्य लोपः । ङिविभक्तौ 'इदा + इ' इति स्थिते "ङेराम्नद्याम्नीभ्यः" इति आमि स्याडागमे ह्रस्वे इद्भागस्य लोपश्च । सुपि 'इदा + सु' इति स्थिते इद्भागस्य लोपः । अत्र "द्वितीयाटौस्स्वेनः" इति एनादेशविषये- एनाम्, एने, एनाः, एनया, एनयोः इति रूपाणि भवन्ति ।

## जकारान्तशब्दनिरूपणम्-

**स्रक्, स्रग् । स्रजौ । स्रजः । स्रग्भ्याम् ।**

स्रज्शब्दः स्त्रीलिङ्गः, क्विन्प्रत्ययान्तश्च । तस्मात् सौ "क्विन्प्रत्ययस्य कुः" इति कुत्वं जश्त्वचर्त्वे च । एवं भ्यामादावपि कुत्वं जश्त्वं च ।

## दकारान्तशब्दनिरूपणम्-

**त्यदाद्यत्वे टाप् । स्या । त्ये । त्याः । एवं तद्, यद्, एतद् ।**

त्यद्-शब्दात् सौ त्यदाद्यत्वे पररूपे टापि 'त्या + स्' इति जाते "तदोः सः-" इति तकारस्य सत्वे "हल्ङ्याब्भ्यः-" इति सुलोपः । एवं सर्वत्र अत्वे, पररूपे, टापि च कृते सर्वाशब्दवद्रूपाणि । एवमेव तद्शब्दस्य- सा, ते, ताः इति रूपाणि, यद्शब्दस्य- या, ये, याः इति रूपाणि, एतद्-शब्दस्य- एषा, एते, एताः इति च रूपाणि भवन्ति ।

## चकारान्तशब्दनिरूपणम्-

**वाक्, वाग् । वाचौ । वाचः । वाग्भ्याम् । वाक्षु ।**

वाच्-शब्दात् सौ हल्ङ्यादिलोपे "चोः कुः" इति कुत्वेन ककारः, तस्य जश्त्वेन गकारः, चर्त्वेन ककारः । भ्यामादौ- कुत्वजश्त्वे । सुपि कुत्वे जश्त्वेऽपि "खरि च" इति चर्त्वेन ककारे सकारस्य षत्वे 'क्-ष्' इत्यनयोः संयोगे क्षः ।

## पकारान्तशब्दनिरूपणम्-

**अप्-शब्दो नित्यं बहुवचनान्तः । आपः । अपः ।**

अप्-शब्दः स्त्रीलिङ्गः, नित्यं बहुवचनान्तश्च । तस्मात् । जसि 'अप्+अस्' इति स्थिते "अप्तृन्तृच्-" इत्यादिना दीर्घे सकारस्य रुत्वविसर्गौ । शसि-सर्वनामस्थानत्वाभावाद् दीर्घो न । भिस्-विभक्तौ 'अप् + भिस्' इति स्थिते-

**अपो भि ७।४।४८**

**अपस्तकारो भादौ प्रत्यये । अद्भिः । अद्भ्यः । अपाम् । अप्सु ।**

अप्-शब्दस्य तकारोऽन्तादेशः भकारादौ प्रत्यये परे इत्यर्थः । अनेनात्र पकारस्य तकारे तस्य “झलां जशोऽन्ते” इति जश्त्वेन दकारे सकारस्य रुत्वविसर्गौ । एवं भ्यस्-विभक्तावपि ।

### शकारान्तशब्दनिरूपणम्-

**दिक्, दिग् । दिशौ । दिशः । दिग्भ्याम् । “त्यदादिषु-” इति दृशेः क्विन्विधानादन्यत्रापि कुत्वम् । दृक्, दृग् । दृशौ । दृशः । दृग्भ्याम् ।**

दिश्-शब्दः “ऋत्विग्-” इत्यादिना क्विन्प्रत्ययान्तः स्त्रीलिङ्गः । तस्मात् सौ सुलोपे “व्रश्चभ्रस्ज-” इति शकारस्य षत्वे तस्य जश्त्वेन डकारे “क्विन्प्रत्ययस्य कुः” इति कुत्वेन गकारे चर्त्वविकल्पः । एवं भ्यामादावपि षत्व-जश्त्व-कुत्वानां क्रमः । यद्यपि दृश्-शब्दः अत्र क्विप्-प्रत्ययान्तः, तथापि ‘क्विन्प्रत्ययस्य कुः’ इति सूत्रे क्विन्प्रत्ययो दृष्टो यस्मादिति बहुव्रीहिसमासाश्रयणेन अत्र क्विन्प्रत्ययाभावेऽपि ‘तादृश्’ इत्यादौ क्विन्प्रत्ययदर्शनादत्रापि कुत्वं भवतीति भावः । दृश् - शब्दात् सौ सुलोपे “व्रश्च-” इति षत्वे तस्य जश्त्वेन डकारे तस्य कुत्वेन गकारे चर्त्वविकल्पः ।

### षकारान्तशब्दनिरूपणम्-

**त्विट्, त्विड् । त्विषौ । त्विषः । त्विड्भ्याम् । त्विट्त्सु, त्विट्सु । ससजुषोरिति रुत्वम् । सजूः । सजुषौ । सजूर्भ्याम् । आशीः । आशिषौ । आशीर्भ्याम् ।**

त्विष्-शब्दः क्विप्-प्रत्ययान्तः, तस्मात् सौ सुलोपे जश्त्वे चर्त्वविकल्पः । सुपि- जश्त्वे ‘त्विड्+सु’ इति स्थिते “डः सि धुट्” इति धुडागमे “खरि च” इति चर्त्वे ‘त्विट्त्सु’ इति । धुडागमाभावे- ‘त्विट्सु’ इति । ‘सह जुषति’ इत्यर्थे ‘सहपूर्वकात् जुष्-धातोः क्विप्, “सहस्य सः संज्ञायाम्” इति ‘सह’ इत्यस्य ‘स’ इत्यादेशः । सजुष्-शब्दात् सौ सुलोपे “ससजुषो रुः” इति षकारस्य रुत्वे “र्वोरुपधाया-” इति दीर्घे रेफस्य विसर्गे ‘सजूः’ इति । आङ्पूर्वकात् शास्धातोः क्विप्, उपधाया इत्वम् “शासिवसि-” इति षत्वञ्च । आशिष्-शब्दात् सौ सुलोपे षत्वस्यासिद्धत्वाद् रुत्वे “र्वोरुपधाया-” इति दीर्घे रेफस्य विसर्गः । भ्यामादावप्येवम् ।

### सकारान्तशब्दनिरूपणम्-

**असौ । त्यदाद्यत्वम्, टाप् । औङः शी । उत्वमत्वे - अमू । अमूः । अमुया । अमूभ्याम् । अमूभिः । अमुष्यै । अमूभ्यः २ । अमुष्याः २ । अमुयोः २ । अमूषाम् । अमूषु ।**

स्त्रीत्वेऽर्थे अदस्-शब्दात् सौ “अदस औ सुलोपश्च” इति औकारे अन्तादेशे सुलोपे च ‘अद + औ’ इति स्थिते वृद्धौ “तदोः सः-” इति दकारस्य सत्वे ‘असौ’ इति । औविभक्तौ “त्यदादीनामः” इति अत्वे गुणे टाप्-प्रत्यये ‘अदा+औ’ इति स्थिते “औङ आपः” इति शीभावे गुणे ‘अदे’ इति जाते “अदसोऽसेः-” इति ऊत्वे मत्वे च ‘अमू’ इति । जसि अत्वे पररूपे टापि ‘अदा + अस्’ इति स्थिते “दीर्घाज्जसि च” इति पूर्वसवर्ण-दीर्घनिषेधात् सवर्णदीर्घे ऊत्वे मत्वे सकारस्य रुत्वविसर्गौ । अमि- ‘अमूम्’ इति । टाविभक्तौ “आङि चापः”

इति एत्वे अयादेशे 'अदया' इत्यवस्थायाम् उत्वमत्वे । भ्यामादौ हलादौ अत्वे पररूपे टापि उत्वमत्वे । ङेविभक्तौ 'अदा + ए' इति स्थिते "सर्वनाम्नः स्याट्-" इति स्याडागमे ह्रस्वे च 'अदस्या + ए' इत्यत्र वृद्धौ उत्वमत्वे षत्वं च । एवं ङसिङसोरपि स्याडागमः ह्रस्वश्च ङेवत्, सवर्णदीर्घः विशेषः । ओसि 'अदा + ओस्' इति स्थिते "आङि चापः" इति एत्वे अयादेशे सकारस्य रुत्वविसर्गौ । आमि सुडागमः ऊत्वमत्वे सकारस्य षत्वम् । ङौ "ङेराम्नद्याम्नीभ्यः" इति आमि स्याडागमः, ह्रस्वः, उत्वमत्वे षत्वम् । सुपि ऊत्वमत्वे षत्वञ्च ।)

## अभ्यासः

### १. अधस्तनानां प्रश्नानामुत्तराणि दत्त

(क) 'उपानह्-' शब्दस्य हकारस्य धत्वं केन सूत्रेण ?

(ख) क्विबन्तेषु केषु धातुषु परेषु पूर्वस्य अणो दीर्घो भवति ?

(ग) 'चतसृणाम्' इत्यत्र 'नामि' इति दीर्घः कथं न ?

(घ) 'आपः' इत्यत्र दीर्घः केन सूत्रेण ?

(ङ) स्त्रीलिङ्गे अदस्-शब्दस्य शस्-विभक्तौ किं रूपम् ?

### २. सूत्राणामर्थं लिखत

नहि-वृत्ति-वृषि-व्यधि-रुचि-सहि-तनिषु क्वौ । यः सौ । अपो भि ।

### ३. एते प्रयोगाः साधु साधनीयाः

उपानत्, द्युभ्याम्, इमे, अद्भिः, अमू, अमुष्यै, अमुयोः ।

### ४. अमीषां शब्दानां सर्वासु विभक्तिषु रूपाणि लिखत

दिव्, इदम्, अप्, त्विष्, आशिष् ।

### ५. रिक्तस्थानं पूरयत

(क) 'उपानत्सु' इत्यत्र हकारस्य धकारे कृते ......... इति सूत्रेण चर्त्वम् ।

(ख) गिर्-शब्दात् सुविभक्तौ ............... इति सूत्रेण उपधादीर्घः ।

(ग) 'अनया' इत्यत्र "अनाप्यकः" इति .......... इत्यस्य ................. आदेशः ।

(घ) 'अपः' इत्यत्र .............. संज्ञाया अभावात् .............. इति उपधादीर्घो न ।

(ङ) 'त्विड्भ्याम्' इत्यत्र ............ इति सूत्रेण पदसंज्ञायां ............... इति सूत्रेण जश्त्वम् ।

६. **अधस्तनानां पदानां वाक्येषु प्रयोगं कुरुत**

उपानहौ, गिरः, चतस्रः, इमाः, अस्याम्, दिशः, अमूभिः ।

**विशेषाध्ययनम्–**

**शब्दरूपावलिः**

**उपानत्–गिर्–वाच्–दिश्–शब्दानां रूपाणि–**

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | उपानत्-उपानद् | उपानहौ | उपानहः |
| द्वितीया | उपानहम् | उपानहौ | उपानहः |
| तृतीया | उपानहा | उपानद्भ्याम् | उपानद्भिः |
| चतुर्थी | उपानहे | उपानद्भ्याम् | उपानद्भ्यः |
| पञ्चमी | उपानहः | उपानद्भ्याम् | उपानद्भ्यः |
| षष्ठी | उपानहः | उपानहोः | उपानहाम् |
| सप्तमी | उपानहि | उपानहोः | उपानत्सु |
| सम्बोधनम् | हे उपानत्-द् | हे उपानहौ | हे उपानहः |

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | गीः | गिरौ | गिरः |
| द्वितीया | गिरम् | गिरौ | गिरः |
| तृतीया | गिरा | गीर्भ्याम् | गीर्भिः |
| चतुर्थी | गिरे | गीर्भ्याम् | गीर्भ्यः |
| पञ्चमी | गिरः | गीर्भ्याम् | गीर्भ्यः |
| षष्ठी | गिरः | गिरोः | गिराम् |
| सप्तमी | गिरि | गिरोः | गीर्षु |
| सम्बोधनम् | हे गीः | हे गिरौ | हे गिरः |

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | वाक्-वाग् | वाचौ | वाचः |
| **द्वितीया** | वाचम् | वाचौ | वाचः |
| **तृतीया** | वाचा | वाग्भ्याम् | वाग्भिः |
| **चतुर्थी** | वाचे | वाग्भ्याम् | वाग्भ्यः |
| **पञ्चमी** | वाचः | वाग्भ्याम् | वाग्भ्यः |
| **षष्ठी** | वाचः | वाचोः | वाचाम् |
| **सप्तमी** | वाचि | वाचोः | वाक्षु |
| **सम्बोधनम्** | हे वाक्-ग् | हे वाचौ | हे वाचः |

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | दिक्-ग् | दिशौ | दिशः |
| **द्वितीया** | दिशम् | दिशौ | दिशः |
| **तृतीया** | दिशा | दिग्भ्याम् | दिग्भिः |
| **चतुर्थी** | दिशे | दिग्भ्याम् | दिग्भ्यः |
| **पञ्चमी** | दिशः | दिग्भ्याम् | दिग्भ्यः |
| **षष्ठी** | दिशः | दिशोः | दिशाम् |
| **सप्तमी** | दिशि | दिशोः | दिक्षु |
| **सम्बोधनम्** | हे दिक्-ग् | हे दिशौ | हे दिशः |

'गिर्' शब्दवत् 'पुर्'-शब्दस्य, दिश्-शब्दवत् दृश्-शब्दस्य च रूपाणि भवन्ति ।

# हलन्तनपुंसकलिङ्गनिरूपणम्

### हकारान्तशब्दनिरूपणम्–

**स्वमोर्लुक् । दत्वम्– स्वनडुत् । स्वनडुही । चतुरनडुहोरित्याम् – स्वनड्वांहि । पुनस्तद्वत् । शेषं पुंवत् ।**

सु । शोभनाः अनड्वाहः । वृषभा यस्मिन् कुले तत् - स्वनडुत् । स्वनडुह् - शब्दात् नपुंसकलिङ्गात् सुविभक्तौ 'स्वनडुह् + स्' इति स्थिते "स्वमोर्नपुंसकात्" इति तस्य लुकि "वसुस्रंसुध्वंस्वनडुहां दः" इति दकारान्तादेशे चर्त्वविकल्पः । औविभक्तौ 'स्वनडुह् + औ' इति स्थिते "नपुंसकाच्च" इति शीभावः । जसि स्वनडुह् - अस्' इति स्थिते 'जश्शसोः शि" इति शिभावे तस्य सर्वनामस्थानत्वात् "चतुरनडुहोरामुदात्तः" इति आमि 'स्वनडु + आ + ह् + इ' इति जाते "नपुंसकस्य झलचः" इति नुमि "नश्चापदान्तस्य झलि" इति नकारस्याऽनुस्वारे यणि 'स्वनड्वांहि' इति । द्वितीयायां पुनःप्रथमावद्रूपाणि-स्वनडुत्, स्वनडुही, स्वनड्वांहि इति । तृतीयादौ पुंल्लिङ्गवद्रूपाणि भवन्ति ।

### रेफान्तशब्दनिरूपणम्–

**वाः । वारी । वारि । वारा । वार्भ्याम् । चत्वारि ।**

वार्-शब्दादपि स्वमोर्लुक् रेफस्य विसर्गः । औविभक्तौ शीभावः । जसि शिभावः झलन्तत्वाभावात् नुम् न । चतुर्-शब्दाद् जश्शसोः शिभावे सर्वनामस्थानत्वात् 'चतुरनडुहोराम्-' इति आमि यणादेशे 'चत्वारि' इति ।

### मकारान्तशब्दनिरूपणम्–

**किम् । के । कानि । इदम् । इमे । इमानि ।**

किम्-शब्दात् सुविभक्तौ "स्वमोर्नपुंसकात्" इति तस्य लुक् । विभक्तिपरत्वाभावात् कादेशो न । औविभक्तौ 'किम् + औ' इति स्थिते "किमः कः" इति कादेशे शीभावः, गुणश्च । जसि कादेशे शिभावे "नपुंसकस्य-" इति नुमि "सर्वनामस्थाने चासम्बुद्धौ" इति उपधादीर्घः । इदम्-शब्दादपि स्वमोर्लुक् । औविभक्तौ "त्यदादीनामः" इति अत्वे पररूपे 'इद + औ' इति स्थिते शीभावे गुणे 'दश्च' इति दकारस्य मकारः । जसि अत्वे पररूपे शिभावे 'इद + इ' इति स्थिते "नपुंसकस्य-" इति नुमि उपधादीर्घे दकारस्य मकारः । द्वितीयायां पुनः प्रथमावद्रूपाणि ।

**अन्वादेशे नपुंसके एनद्वक्तव्य** (वा.) **एनत् । एने । एनानि । एनेन । एनयोः** २ ।

अन्वादेशविषये नपुंसके इदम्-शब्दस्य 'एनत्' इत्यादेशः स्यादिति वक्तव्यः । 'एनत्' इत्यादेशे अमो लुक् । 'एने, एनानि' इति, 'इमे, इमानि' इतिवत् । शेषं पुंवत् ।

## नकारान्तशब्दनिरूपणम्–

**व्योम । व्योम्नी, व्योमनी । व्योमानि । ब्रह्म । ब्रह्मणी । ब्रह्माणि ।**

व्योमन्-शब्दात् सौ अमि च "स्वमोर्नपुंसकात्" इति स्वमोर्लुकि नलोपः । औङि शीभावे 'व्योमन् + ई' इति स्थिते "विभाषा ङिश्योः" इति मकाराद् अकारस्य लोपविकल्पः; तस्मात् रूपद्वयम् । जश्शसोः शिभावे उपधादीर्घः । एवं 'ब्रह्म' इत्यपि 'व्योम' इतिवत् । औङि शीभावे "विभाषा ङिश्योः" इति प्राप्ते "न संयोगाद्वमन्तात्" इति तन्निषेधः, "अट्कुप्वाङ्-" इति णत्वम् ।

**सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः** (वा.) **हे ब्रह्म, हे ब्रह्मन् ।** **'रोऽसुपि'** । **अहः** । **'विभाषा ङिश्योः'** । **अह्नी, अहनी । अहानि ।**

नकारान्तानां नपुंसकानां नलोपविकल्प इत्यर्थः । अनेन नलोपपक्षे- "हे ब्रह्म' इति नलोपाभावे- 'हे ब्रह्मन्' इति । अहन् - शब्दात् स्वमोर्लुकि "रोऽसुपि" इति नकारस्य रेफादेशे रेफस्य विसर्गः । औङि शीभावे "विभाषा ङिश्योः" इति हकाराद् अकारस्य वा लोपः ।

**अहन् ८।२।६८**

**अहन्नित्यस्य रुः पदान्ते । अहोभ्याम् । दण्डि । दण्डिनी । दण्डीनि । सुपथि । टिलोपः– सुपथी । सुपन्थानि ।**

'अहन् + भ्याम्, इति स्थिते पदसंज्ञायाम् अनेन सूत्रेण नकारस्य रुत्वे, "हशि च" इति उत्वे "आद् गुण" इति गुणः । दण्डिन्-शब्दात् स्वमोर्लुक् नलोपश्च । औङि शीभावः । जश्शसोः शिभावे उपधादीर्घः । नलोपे च सुपथिन्-शब्दात् स्वमोर्लुक् । औङि शीभावे नपुंसके सर्वनामस्थानसंज्ञाया अभावाद् भसंज्ञायां "भस्य टेर्लोपः" इति टिलोपः । जश्शसोः शिभावे 'सुपथिन् + इ' इति स्थिते "शि सर्वनामस्थानम्" इति सर्वनामस्थानसंज्ञायाम् "इतोऽत्सर्वनामस्थाने" इति थकाराद् इकारस्य अत्वे थकारस्य च "थो न्थः" इति न्थादेशे 'सुपन्थन् - इ' इति जाते उपधादीर्घः ।

## जकारान्तशब्दनिरूपणम्–

**ऊर्क्, ऊर्ग् । ऊर्जी । नरजानां संयोगः–ऊर्न्जि ।**

क्विप्-प्रत्ययान्तात् ऊर्ज्-शब्दात् स्वमोर्लुक् कुत्वचर्त्वे । जश्शसोः शिभावः, झलन्तत्वात् "नपुंसकस्य-"

इति नुम्, स च मित्त्वाद् ऊकारात्परो भवति, तस्माद् नकार-रेफजकाराणां क्रमेण संयोगः, नकारात्परं रेफस्योच्चारणमिति भावः ।

## दकारान्तशब्दनिरूपणम्–

**त्यद् । त्ये । त्यानि । तत् । ते । तानि । यत् । ये । यानि । एतत् । एते । एतानि ।**

त्यद्-तद्-यद्-एतद्-शब्दानां स्वमोर्लुकि त्यदाद्यत्वम्, पररूपम्, "तदोः सः-" इति सत्वञ्च न भवति, लुका लुप्तत्वात् । अन्यत्र तु अन्वादिकं भवत्येव ।

## चकारान्तशब्दनिरूपणम्–

**"अवङ् स्फोटायनस्य" इति अवङ् ।**

**गवाक्शब्दस्य रूपाणि क्लीबेऽर्चागतिभेदतः ।**
**असन्ध्यवङ्पूर्वरूपैर्नवाधिकशतं मतम् ॥ १ ॥**
**स्वम्सुप्सु नव, षड्भादौ षट्के स्युस्त्रीणि जश्शसोः ।**
**चत्वारि शेषे दशके रूपाणीति विभावय ॥ २ ॥**

**गवाक्, गवाग् । गोची । गवाञ्चि । पुनस्तद्वत् । गोचा । गवाग्भ्याम् ।**

गोशब्दोपपदाद् अञ्च्-धातोः "ऋत्विग्०-" इत्यादिना क्विन्प्रत्यये तस्य सर्वापहारलोपे नलोपे च "अवङ् स्फोटायनस्य" इति गोशब्दावयवस्य ओकारस्य अवङादेशे गवाच्शब्दः । तस्य क्लीबे । नपुंसके, अर्चागतिभेदतः । अचार्थे गत्यर्थे च भिन्नरूपत्वाद्, असन्धिः । "सर्वत्र विभाषा गोः" इति प्रकृतिभावः, अवङ् । "अवङ् स्फोटायनस्य" इति अवङ्-आदेशः, "एङः पदान्तादति" इति पूर्वरूपं च, एभिः कार्यैः, नवाधिकशतम् रूपाणि भवन्ति । सु-अम्-सुप्-विभक्तिषु नव-नव-रूपाणि, भादौ षट्के- भकारादौ षट्सु भ्याम्-भिस्-भ्यस्सु षड्-षड् रूपाणि, जश्शसोः त्रीणि-त्रीणि, शेषे दशके । अवशिष्टासु दशविभक्तिषु प्रत्येकं चत्वारि - चत्वारि रूपाणि भवन्तीति विभावय । त्वं निश्चिनु इत्यर्थः । यथा- गत्यर्थे "अनिदिताम्-" इति नलोपे अवङादेशे गवाच्-शब्दात् स्वमोर्लुकि- कुत्वे जश्त्वचर्त्वयोश्च-गवाक्-गवाग् इति, "सर्वत्र विभाषा-" इति प्रकृतिभावपक्षे गो अक् - गो अग् इति, पूर्वरूपपक्षे- गोऽक्, गोऽग् इति । पूजार्थे स्वमोर्लुकि संयोगान्तलोपे नकारस्य "क्विन्प्रत्ययस्य कुः" इति कुत्वेन ङकारे-गवाङ्, गो अङ्, गोऽङ् इति । औङः शीभावे भसंज्ञायाम् "अचः" इति अकारलोपे गत्यर्थे- 'गोची' इति एकं रूपम् गो इत्यस्मात् परतः अकाराभावाद् अवङ्-प्रकृतिभावादिकं न । पूजायां तु-अवङादिना गवाञ्ची, गोअञ्ची, गोऽञ्ची इति । जश्शसोः शिभावे गत्यर्थे नलोपेऽपि 'शि' इत्यस्य सर्वनामस्थानत्वाद् "उगिदचाम्-" इति नुमि अनुस्वारपरसवर्णौ । तेन अवङ्-

प्रकृतिभाव-पूर्वरूपेषु गवाञ्चि, गोअञ्चि, गोऽञ्चि इति । पूजार्थेऽपि-नलोपाभावात् तस्यैव अनुस्वारपरसवर्णयोः पूर्ववद्रूपाणि भवन्ति । टाविभक्तौ गत्यर्थे लुप्तनकारत्वाद् "अचः" इति अकारलोपे 'गोचा' इति एकमेव रूपम् । पूजार्थे- गवाञ्चा, गोअञ्चा, गोऽञ्चा इति रूपत्रयम् । भ्यामादावपि-गत्यर्थे-गवाग्भ्याम्, गोअग्भ्याम्, गोऽग्भ्याम् इति । पूजाऽर्थे-गवाङ्भ्याम्, गोअङ्भ्याम्, गोऽङ्भ्याम् इत्यादीनि रूपाणि भवन्ति ।

## तकारान्तशब्दनिरूपणम्-

**शकृत् । शकृती । शकृन्ति । ददत् । ददती ।**

शकृत्-शब्दः विष्ठावाची, तस्मात् स्वमोर्लुकि - 'शकृत्' इति । औङि शीभावः । जश्शसोः शिभावे "नपुंसकस्य-" इति नुमि अनुस्वारपरसवर्णौ । ददत्-शब्दः शतृप्रत्ययान्तः, अत्र सर्वनामस्थानत्वाभावाद् "उगिदचाम्-" इति नुम्न । जश्शसोः शिभावे तस्य सर्वनामस्थानत्वाद्" उगिदचाम्-" इति नित्यं नुमि प्राप्ते-

**वा नपुंसकस्य ७।१।७९**

**अभ्यस्तात्परो यः शतुरवयवस्तदन्तस्य क्लीबस्य नुम्वा स्यात्, सर्वनामस्थाने । ददन्ति, ददति । तुदत् ।**

अभ्यस्तसंज्ञकात्परो यः शतृप्रत्ययः तदन्तस्य नपुंसकस्य सर्वनामस्थाने परे नुम्वा स्यादित्यर्थः ।

अनेनात्र वैकल्पिके नुमागमे अनुस्वारपरसवर्णयोः 'ददन्ति' इति, तदभावे 'ददति' इति रूपम् । 'तुदत्' इत्यपि शत्रन्तः, 'ददत्' इतिवत् । तुदत्-शब्दाद् औङः शीभावे सर्वनामस्थानत्वाभावाद् नुमि अप्राप्ते-

**आच्छीनद्योर्नुम् ७।१।८०**

**अवर्णान्तादङ्गात्परो यः शतुरवयवस्तदन्तस्य नुम्वा शीनद्योः । तुदन्ती, तुदती । तुदन्ति । भात् । भान्ती, भाती । भान्ति । पचत् ।**

अवर्णान्ताद् अङ्गात् परः यः शतृप्रत्ययावयवः तदन्तस्य नुम्वा शीप्रत्यये नदीसंज्ञके च परे इत्यर्थः । अत्र 'तुदत् - ई' इति स्थिते अनेन वैकल्पिके नुमि अनुस्वारपरसवर्णयोः 'तुदन्ती' इति, तदभावे- 'तुदती' इति रूपम् । जश्शसोः शिभावे "उगिदचाम्०-" इति नित्यं नुम् । भाधातोः शतृप्रत्यये भात्-शब्दः, तस्मात् स्वमोर्लुक्, जश्त्वचर्त्वे च । औङः शीभावे "आच्छीनद्योः-" इति नुम्विकल्पः । जश्शसोः शिभावे पूर्ववत् नित्यं नुम् । पच्धातोः शतृप्रत्यये पचत्-शब्दः, तस्मात् स्वमोर्लुकि जश्त्वचर्त्वे । औङः शीभावे 'पचत् + ई' इति स्थिते "आच्छीनद्योः-" इति विकल्पे प्राप्ते-

**शप्श्यनोर्नित्यम् ७।१।८१**

**शप्-श्यनोरात्परो यः शतुरवयवस्तदन्तस्य नित्यं नुम् शीनद्योः । पचन्ती । पचन्ति । दीव्यत् । दीव्यन्ती। दीव्यन्ति ।**

अनेन नित्यं नुम् । जश्शसोः शिभावे "उगिद्चाम्-" इति नुम् । दिव्धातोः शतृप्रत्यये श्यन्विकरणे "हलि च" इति दीर्घे दीव्यत्-शब्दः, तस्मात् स्वमोर्लुकि जश्त्वचर्त्वे । औङः शीभावे "शप्श्यनोः-" इति नुम् ।

**धनुः । धनुषी । धनूंषि । एवं चक्षुर्हविरादयः ।**

धन्-धातोः औणादिके उस्-प्रत्यये सकारस्य षत्वे धनुष्-शब्दः, तस्मात् स्वमोर्लुकि षत्वस्यासिद्धत्वाद्रुत्वे विसर्गे 'धनुः' इति । औङः शीभावे- 'धनुषी' इति । जश्शसोः शिभावे "नपुंसकस्य-" इति नुमि 'धनु न् स् + इ इति स्थिते "सान्तमहतः-" इति दीर्घे 'नुम्विसर्जनीयशर्व्यवायेऽपि" इति षत्वे "नश्चापदान्तस्य-" इति अनुस्वारः। एवं चक्षुष् - हविष् - इत्यादिशब्दानां रूपाणि धनुष्-शब्दवद् भवन्ति ।

## सकारान्तशब्दनिरूपणम्-

**पयः । पयसी । पयांसि । पयोभ्याम् । सुपुम् । सुपुंसी । सुपुमांसि । अदः । विभक्तिकार्यम्, उत्वमत्वे- अमू । अमूनि । शेषं पुंवत् ।**

पयस्-शब्दात् स्वमोर्लुक् सकारस्य रुत्त्वविसर्गौ । जश्शसोः शिभावे "नपुंसकस्य-" इति नुमि "सान्तमहतः-" इति दीर्घः, "नश्च-" इति अनुस्वारश्च । भ्यामादौ 'पयस् + भ्याम्' इति स्थिते पदसंज्ञायां सकारास्य रुत्वे "हशि च" इति उत्वे गुणः । सु । शोभनाः पुमांसः यस्मिन् तत् कुलम् । सुपुम् । सुपुंस् - शब्दात् स्वमोर्लुकि संयोगान्तलोपः, झल्परत्वाभावाद् अनुस्वारनिवृत्तिश्च । जश्शसोः शिभावे सर्वनामस्थानत्वात् "पुंसोऽसुङ्" इति असुङ् - अन्तादेशे 'सुपुमस् + इ' इति जाते "नपुंसकस्य-" इति नुमि "सान्तमहतः-" इति दीर्घः, "नश्च-" इति अनुस्वारश्च । नपुंसकाद् अदस्-शब्दात् स्वमोर्लुक् सकारस्य रुत्वविसर्गौ । औङः शीभावे त्यदाद्यत्वे पररूपे गुणे च कृते 'अदे' इति जाते ऊत्वमत्वे । जश्शसोः शिभावे त्यदाद्यत्वे पररूपे 'अद + इ' इति स्थिते "नपुंसकस्य-" इति अजन्तत्वात् नुम्, उपधादीर्घः, ऊत्वमत्वे च । टादौ विभक्तौ पुंवद् रूपं बोध्यम् ।

## अभ्यासः

१. **अधो लिखितानां प्रश्नानामुत्तराणि दत्त**

(क) स्वनडुह्-शब्दाज्जसि शिभावे केन सूत्रेण किं कार्यम् ?

(ख) 'दण्डीनि' इत्यत्र केन सूत्रेण दीर्घः ?

(ग) शीभावे 'सुपथिन्+ई' इति स्थिते केन सूत्रेण किं कार्यम्, किञ्च रूपम् ?

(घ) 'तुदन्ति' इत्यत्र केन सूत्रेण नुमागमः, रूपमिदं कस्यां विभक्तौ भवति ?

(ङ) 'पयोभ्याम्' इत्यत्र ओकारः कथम् आगतः ?

२. **अधस्तनानां सूत्राणामर्थं लिखत**

वा नपुंसकस्य । आच्छीनद्योर्नुम् । शप्श्यनोर्नित्यम् ।

३. **अमीषां रूपाणां सिद्धिप्रकारं प्रदर्शयत**

स्वनडुही । इमानि । गवाक् । पचन्ती । धनूंषि । अमूनि ।

४. **एतेषु प्रयोगेषु प्रकृति-प्रत्ययविभागं दर्शयत**

व्योम्नी, सुपथी, एतानि, सकृन्ति ।

५. **युक्तेषु कथनेषु ✓ इति चिह्नं योजयत**

(क) किम्-इदम्-एतदादिशब्दानां टादौ विभक्तौ नपुंसकेऽपि पुंवद्रूपाणि भवन्ति ।

(ख) ब्रह्मन्शब्दात् सम्बुद्धौ "न ङिसम्बुद्धयोः" इति नलोपनिषेधः ।

(ग) अन्वादेशविषये नपुंसके इदम्-शब्दस्य 'एनत्' इत्यादेशो भवति ।

(घ) गवाक्-शब्दस्य नपुंसके भ्याम्विभक्तौ षड् रूपाणि भवन्ति ।

(ङ) ददत्-शब्दाद् जसि शिभावे सर्वनामस्थानत्वाद् "उगिदचाम्-" इति नुमागमः ।

(च) 'पचन्ति' इत्यत्र "शप्श्यनोर्नित्यम्" इति नुमागमः ।

(छ) 'अदः' इत्यत्र त्यदाद्यत्वं न भवति विभक्तेर्लुकालुप्तत्वात् ।

६. **"गवाक्छब्दस्य रूपाणि-" इत्यादिकारिके विलिख्य, तयोर्व्याख्या कर्तव्या ।**

**विशेषाध्ययनम्-**

## १. शब्दरूपावलिः

**वार्-अहन्-दण्डिन्-ददत्-धनुष्-शब्दानां सर्वासु विभक्तिषु रूपाणि**

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वाः | वारी | वारि |
| द्वितीया | वाः | वारी | वारि |
| तृतीया | वारा | वार्भ्याम् | वार्भिः |
| चतुर्थी | वारे | वार्भ्याम् | वार्भ्यः |
| पञ्चमी | वारः | वार्भ्याम् | वार्भ्यः |
| षष्ठी | वारः | वारोः | वाराम् |
| सप्तमी | वारि | वारोः | वार्सु |
| सम्बोधनम् | हे वाः | हे वारी | हे वारि |

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अहः | अह्नी-अहनी | अहानि |
| द्वितीया | अहः | अह्नी-अहनी | अहानि |
| तृतीया | अह्ना | अहोभ्याम् | अहोभिः |
| चतुर्थी | अह्ने | अहोभ्याम् | अहोभ्यः |
| पञ्चमी | अह्नः | अहोभ्याम् | अहोभ्यः |
| षष्ठी | अह्नः | अह्नोः | अह्नाम् |
| सप्तमी | अह्नि-अहनि | अह्नोः | अहःसु |
| सम्बोधनम् | हे अहः | हे अह्नी-हे अहनी | हे अहानि |
| | | | |

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | दण्डि | दण्डिनी | दण्डीनि |
| द्वितीया | दण्डि | दण्डिनी | दण्डीनि |
| तृतीया | दण्डिना | दण्डिभ्याम् | दण्डिभिः |

| | | | |
|---|---|---|---|
| **चतुर्थी** | दण्डिने | दण्डिभ्याम् | दण्डिभ्यः |
| **पञ्चमी** | दण्डिनः | दण्डिभ्याम् | दण्डिभ्यः |
| **षष्ठी** | दण्डिनः | दण्डिनोः | दण्डिनाम् |
| **सप्तमी** | दण्डिनि | दण्डिनोः | दण्डिषु |
| **सम्बोधनम्** | हे दण्डिन् | हे दण्डिनी | हे दण्डीनि |

| **विभक्तयः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | ददत् | ददती | ददन्ति |
| **द्वितीया** | ददत् | ददती | ददन्ति |
| **तृतीया** | ददता | ददद्भ्याम् | ददद्भिः |
| **चतुर्थी** | ददते | ददद्भ्याम् | ददद्भ्यः |
| **पञ्चमी** | ददतः | ददद्भ्याम् | ददद्भ्यः |
| **षष्ठी** | ददतः | ददतोः | ददताम् |
| **सप्तमी** | ददति | ददतोः | ददत्सु |
| **सम्बोधनम्** | हे ददत् | हे ददती | हे ददन्ति |

| **विभक्तयः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | धनुः | धनुषी | धनूंषि |
| **द्वितीया** | धनुः | धनुषी | धनूंषि |
| **तृतीया** | धनुषा | धनुर्भ्याम् | धनुर्भिः |
| **चतुर्थी** | धनुषे | धनुर्भ्याम् | धनुर्भ्यः |
| **पञ्चमी** | धनुषः | धनुर्भ्याम् | धनुर्भ्यः |
| **षष्ठी** | धनुषः | धनुषोः | धनुषाम् |
| **सप्तमी** | धनुषि | धनुषोः | धनुष्षु, धनुःषु |
| **सम्बोधनम्** | हे धनुः | हे धनुषी | हे धनूंषि |

एवम् - इन्नन्तानां नपुंसकानां दण्डिन् - शब्दवत्, तुदत्-पचत्-दीव्यत्-शब्दानां ददत्-शब्दवत्, किन्तु औङि नुमागम इति विशेषः । धनुष्-शब्दवत् चक्षुष्-हविष्-शब्दयोश्च रूपाणि भवन्ति ।

# अव्यय-निरूपणम्

**स्वरादिनिपातमव्ययम् ११।३७**

**स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः ।**

१. **स्वर्** २. **अन्तर्** ३. **प्रातर्** ४. **पुनर्** ५. **सनुतर्** ६. **उच्चैस्** ७. **नीचैस्** ८. **शनैस्** ९. **ऋधक्** १०. **ऋते** ११. **युगपत्** १२. **आरात्** १३. **पृथक्** १४. **ह्यस्** १५. **श्वस्** १६. **दिवा** १७. **रात्रौ** १८. **सायम्** १९. **चिरम्** २०. **मनाक्** २१. **ईषत्** २२. **जोषम्** २३. **तूष्णीम्** २४. **बहिस्** २५. **अवस्** २६. **अधस्** २७. **समया** २८. **निकषा** २९. **स्वयम्** ३०. **वृथा** ३१. **नक्तम्** ३२. **न** ३३. **नञ्** ३४. **हेतौ** ३५. **इद्धा** ३६. **अद्धा** ३७. **सामि** ३८. **वत्** ३९. **ब्राह्मणवत्** ४०. **क्षत्रियवत्** ४१. **सना** ४२. **सनत्** ४३. **सनात्** ४४. **उपधा** ४५. **तिरस्** ४६. **अन्तरा** ४७. **अन्तरेण** ४८. **ज्योक्** ४९. **कम्** ५०. **शम्** ५१. **सहसा** ५२. **विना** ५३. **नाना** ५४. **स्वस्ति** ५५. **स्वधा** ५६. **अलम्** ५७. **वषट्** ५८. **श्रौषट्** ५९. **वौषट्** ६०. **अन्यत्** ६१. **अस्ति** ६२. **उपांशु** ६३. **क्षमा** ६४. **विहायसा** ६५. **दोषा** ६६. **मृषा** ६७. **मिथ्या** ६८. **मुधा** ६९. **पुरा** ७०. **मिथो** ७१. **मिथस्** ७२. **प्रायस्** ७३. **मुहुस्** ७४. **प्रबाहुकम्** ७५. **प्रवाहिका** ७६. **आर्यहलम्** ७७. **अभीक्ष्णम्** ७८. **साकम्** ७९. **सार्धम्** ८०. **नमस्** ८१. **हिरूक्** ८२. **धिक्** ८३. **अथ** ८४. **अम्** ८५. **आम्** ८६. **प्रताम्** ८७. **प्रशान्** ८८. **मा** ८९. **माङ्** (आकृतिगणोऽयम्) ९०. **च** ९१. **वा** ९२. **ह** ९३. **अह** ९४. **एव** ९५. **एवम्** ९६. **नूनम्** ९७. **शश्वत्** ९८. **युगपत्** ९९. **भूयस्** १००. **कूपत्** १०१. **सूपत्** १०२. **कुवित्** १०३. **नेत्** १०४. **चेत्** १०५. **चण्** १०६. **यत्र** १०७. **कच्चित्** १०८. **नह** १०९. **हन्त** ११०. **माकिः** १११. **माकिम्** ११२. **नकिः** ११३. **नकिम्** ११४. **माङ्** ११५. **नञ्** ११६. **यावत्** ११७. **तावत्** ११८. **त्वै** ११९. **न्वै** १२०. **द्वै** १२१. **रै** १२२. **श्रौषट्** १२३. **वौषट्** १२४. **स्वाहा** १२५. **स्वधा** १२६. **वषट्** १२७. **तुम्** १२८. **तथाहि** १२९. **खलु** १३०. **किल** १३१. **अथो** १३२. **अथ** १३३. **सुष्ठु** १३४. **स्म** १३५. **आदह** ।

**उपसर्ग–विभक्ति–स्वर–प्रतिरूपकाश्च** (ग.सू.)

उपसर्गप्रतिरूपका विभक्त्यन्तप्रतिरूपकाः अच्प्रतिरूपकाश्च चादिगणे पाठ्या इत्यर्थः । उपसर्गप्रतिरूपकम् - अवदत्तम् इति । सुबन्तप्रतिरूपकम् - अहंयुरिति । तिङन्तप्रतिरूपकम्- अस्तिक्षीरेति । स्वरप्रतिरूपकाश्च - अ,आ,इ,ई इत्यादयः । १३६. **अवदत्तम्** १३७. **अहंयुः** १३८. **अस्तिक्षीरा** १३९. **अ** १४०. **आ** १४१. **इ** १४२. **ई** १४३. **उ** १४४. **ऊ** १४५. **ए** १४६. **ऐ** १४७. **ओ** १४८. **औ** १४९. **पशु** १५०. **शुकम्** १५१. **यथाकथा च** १५२. **पाट्** १५३. **प्याट्** १५४. **अङ्ग** १५५. **है** १५६. **हे** १५७. **भो** १५८. **अये** १५९. **द्य** १६०. **विषु** १६१. **एकपदे** १६२. **युत्** १६३. **आतः** । **चादिरप्याकृतिगणः** ।

**तद्धितश्चासर्वविभक्तिः १।१।३८**

**यस्मात् सर्वा विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात् । परिगणनं कर्तव्यम् । तसिलादयः प्राक् पाशवः, शस् प्रभृतयः प्राक् समासान्तेभ्यः, अम्, आम्, कृत्वोऽर्थाः, तसिवती, नानाञौ इति । एतदन्तमव्ययम् । अत इत्यादि ।**

यस्माद् वचनत्रयात्मिका विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययं स्यादिति सूत्रार्थः । तसिलादय इति । 'पञ्चम्यास्तसिल्' इति विहितो यस्तसिल् तदादयो 'याप्येपाशप्' इति विहितः पाशप्प्रत्ययपर्यन्ताः, एवं 'बह्वल्पार्थात्' इति विहितो यः शस्तदादयः 'समासान्ताः' इति सूत्रपर्यन्ताः । 'अमु' इत्यनेन 'अमु च च्छन्दसि' इत्यम्, आम् इत्यनेन 'किमेत्तिङव्यय-' इत्याम् च गृह्यते । 'कृत्वोऽर्था' इति । 'सङ्ख्यायाःक्रियाभ्यावृत्तिगणने-' इति विहिताः कृत्वसुजादयः । तसिवतीति । 'तेनैकदिक्' 'तसिश्च' गृह्यते । 'विनञ्भ्यान्नानाञौ-' इति विहितौ नानाञौ इति उपरि चर्चितानां परिगणनं कर्तव्यमित्याशयो बोध्यः ।

**कृन्मेजन्तः १।१।३९**

**कृद्यो मान्त एजन्तश्च तदन्तमव्ययम् । स्मारं स्मारम् । जीवसे । पिबध्यै ।**

स्मारं स्मारमिति । स्मृधातोः 'आभीक्ष्णे णमुल् च' इति णमुल् प्रत्यये 'अचो ञ्णिति' इति वृद्धौ रपरत्वे 'नित्यवीप्सयोः' इति द्वित्वे अत्र मान्तकृदन्तत्वादव्ययत्वं बोध्यं 'कृन्मेजन्त' इत्यनेन जीवसे इति । 'जीव' धातोः असे प्रत्यये एजन्तत्वादव्ययत्वम् । पिबध्यै इति । पाधातोः शध्यै प्रत्यये शित्वात् पिबादेशे एजन्तत्वादेवाव्ययत्वं बोध्यम् ।

**क्त्वातोसुन्कसुनः १।१।४०**

**एतदन्तमव्ययम् । कृत्वा । उदेतोः । विसृपः ।**

क्त्वा-तोसुन्-कसुन्-प्रत्ययान्तमप्यव्ययं भवतीति सूत्रार्थः । कृधातोः 'समानकर्तृकयोः-' इति क्त्वा 'कृत्वा' इति । उत्पूर्वादिण्धातोः 'भावलक्षणे स्थेण्-' इति तोसुन् प्रत्यये उदेतोरिति । विपूर्वकात् सृप्धातोः 'सृपितृदोः-' इति कसुन् प्रत्यये 'विसृपः' इति ।

**अव्ययीभावश्च १।१।४१**
**अधिहरि ।**

अव्ययीभावसमासश्च अव्ययसंज्ञः स्यादित्यर्थः । विभक्त्यर्थे अव्ययीभावे 'अधिहरि' इति ।

**अव्ययादाप्सुपः २।४।८२**

**अव्ययाद् विहितस्यापः सुपश्च लुक् स्यात्। तत्र शालायाम्। विहितविशेषणान्नेह अत्युच्चैसौ। अव्ययसंज्ञायां यद्यपि तदन्तविधिरस्ति तथापि न गौणे। आब्ग्रहणं व्यर्थम्, अव्ययस्यालिङ्गत्वात्।**

तत्र शालायामिति। 'तत्र' इत्यस्याव्ययत्वाद् आपो लुक् प्रकृतसूत्रेण भवतीति। विहितविशेषणादिति। अत्र सूत्रार्थे अव्ययात् परस्येत्यनुक्त्वा अव्ययाद् विहितस्येति व्याख्यानाद् 'अत्युच्चैसौ' इत्यत्र समासाद् विहितस्य सुपः अव्ययभूतादुच्चैश्शब्दात् परत्वेऽपि ततो विहितत्वाभावाद् न लुगिति बोध्यम्। स्वरादिगणे केवलोच्चैश्शब्दपाठेऽपि 'प्रयोजनं सर्वनामाव्ययसंज्ञायाम्' इति वचनात् स्वराद्यन्तस्यापि अव्ययत्वं स्यादिति मनसि निधाय उक्तम्, अव्ययसंज्ञायां यद्यपि तदन्तविधिरस्तीत्यादि। आब्ग्रहणं व्यर्थमिति। 'अव्ययादाप्सुपः' इति सूत्रे आब्ग्रहणं व्यर्थमव्ययस्यालिङ्गत्वादित्याशयः।

तथा च श्रुतिः -

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥ इति।**

अत्र च - त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु सर्वेषु वचनेषु च यद् न व्येति। विकारं न प्राप्नोति, किन्तु सदृशम् - एकप्रकारमेव भवति, तदव्ययमिति योजना बोध्या।

**वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।**
**आपं चैव हलन्तानां यथा वाचा निशा दिशा॥**
**अवगाहः, वगाहः। अपिधानम्, पिधानम्।**

अव, अपि इत्युपसर्गयोः, अकारस्य लोपो हलन्तानाम् आपं च भागुरिनामक आचार्यो वष्टि- इच्छतीत्यर्थः।

प्रचलितानामव्ययशब्दानां कस्मिन्नर्थे प्रयोगो भवतीति निदर्शनम् -

स्वर्, स्वर्गे, पारत्रिकसुखविशेषे, परलोके च। अन्तर्, मध्ये, प्रातर्, प्रत्यूषे। पुनर्, अप्रथमे, विशेषे च। सनुतर्, अन्तर्धाने। उच्चैस्, महति। नीचैस्, अल्पे। शनैस्, क्रियामान्द्ये। ऋधक्, सत्ये, वियोगशैघ्र्यसामीप्यलाघवेष्वपीति पक्षान्तरम्। ऋते, वर्जने। युगपद्, एककाले। आराद्, दूरसमीपयोः। पृथग्, भिन्ने। ह्यस्, अतीतेऽह्नि। श्वस्, अनागतेऽह्नि। दिवा, दिवसे। रात्रौ, निशि। सायम्, निशामुखे। चिरम्, बहुकाले। मनाक्, अल्पे। ईषद्, अल्पे। तूष्णीम्, मौने। बहिस्, बाह्ये। अवस्, बाह्ये। समया, समीपे, मध्ये च। वृथा, व्यर्थे। नक्तम्, रात्रौ। नञ्, निषेधे। सहसा, आकस्मिकाविमर्शयोः। क्षमा, क्षान्तौ। स्वस्ति, मङ्गले। विना, वर्जने। नाना, अनेकविनार्थयोः। मृषा, मिथ्या, वितथे। मुधा, व्यर्थे। पुरा, अविरते, चिरातीते, भविष्यदासन्ने च। प्रायस्, बाहुल्ये। आभीक्ष्णम्, पौनः पुन्ये। साकं सार्धम्, सहार्थे। स्वधा, पितृदाने। अलम्, भूषणपर्याप्तिशक्तिवारणनिषेधेषु। नमस्, नतौ। हिरुग्, वर्जने।

धिग्, निन्दाभर्त्सनयोः । आम्, अङ्गीकारे । प्रतान्, विस्तारे । कामम्, स्वाच्छन्द्ये । मा माङ्, निषेधे । झटिति, द्राक्, तरसा, शैघ्ये । भुवर्, अन्तरिक्षे । सुदि, शुक्लपक्षे । वदि, कृष्णपक्षे । नूनम्, निश्चये । परम्, किन्त्वर्थे । संवत्, वर्षे । अवश्यम्, निश्चये । स्म, अतीते, पादपूरणे च । किल, वार्तायाम्, अलीके च । तथा हि, निर्दशने । खलु, निषेधवाक्यालङ्‌कारनिश्चयेषु । श्रौषट्, वौषट्, स्वाहा । देवहविर्दाने । अथ, मङ्गलानन्तरारम्भप्रश्नकात्स्न्याधिकारप्रतिज्ञासमुच्चयेषु । कच्चित्, इष्टप्रश्ने । अह, अद्‌भुते खेदे च । रोदसि, द्यावापृथिव्यर्थे । कु, कुत्सिते । सपदि, शैघ्ये । साक्षात्, प्रत्यक्षे । भूयस्, पुनरर्थे । इव, सादृश्ये । यत्, हेतौ । तत्, हेतौ, । आहोस्विद्, विकल्पे । अनु, वितर्के । प्रादुस्, प्रकाशे । आविस्, प्रकाशे । अनिशम्, नित्यम्, सदा, अजस्रम्, सततम् । सातत्ये । च, समुच्चयान्वाचयेतरेतरयोगसमाहारेषु । वा, विकल्पादिषु । एवम्, उक्तपरामर्शे । एव, अवधारणे । नूनम्, निश्चये तर्के च । चेत्, यद्यर्थे । शश्वत्, पौनः पुन्ये, नित्ये सहार्थे च । हन्त, हर्षे, विषादे, अनुकम्पायाम्, वाक्यारम्भे च ।

## अभ्यासः

### १. प्रश्नानामुत्तराणि दत्त

(क) अव्ययसंज्ञाविधायकं सूत्रं किम् ?

(ख) मान्तस्य एजन्तस्य च कृतोऽव्ययत्वं केन सूत्रेण भवति ?

(ग) 'अव्ययादाप्सुपः' इति सूत्रं किं करोति ?

(घ) अव्ययलक्षणं किम् ?

(ङ) भागुरिमतेन कयोराद्यल्लोपो भवति ?

### २. अधस्तनसूत्राणामर्थं निर्दिशत

(क) तद्धितश्चासर्वविभक्तिः (ख) कृन्मेजन्तः (ग) क्त्वातोसुन्कसुनः ।

### ३. अधो लिखितानां शब्दानामर्थं प्रकाशयत

श्वस्, बहिस्, सायम्, चिरम्, अधस्, प्रातर्, प्रायस् ।

### ४. निर्दिष्टशब्दान् प्रयुज्य वाक्यं रचयत

ऋते, प्रायस्, यत्र, वृथा, उपांशु, तूष्णीम्, विना ।

## ५. समीचीनेषु कथनेषु ✓ इति चिह्नं दर्शयत

(क) अव्ययसंज्ञकानां शब्दानां त्रिषु लिङ्गेषु रूपाणि समानानि भवन्ति ।

(ख) अव्ययेभ्यः सुपो लुग् भवति ।

(ग) अव्ययीभावसमासस्य अव्ययसंज्ञा न भवति ।

(घ) क्त्वाप्रत्ययान्तानां शब्दानाम् अव्ययसंज्ञा भवति ।

(ङ) अव्ययशब्दानां सर्वासु विभक्तिषु रूपाणि विकारं न प्राप्नुवन्ति ।

## ६. रिक्तस्थाने उपयुक्तविकल्पं योजयत

(क) स्वरादिगणपठितानां स्वरादीनाञ्च ....... भवति । (अव्ययसंज्ञा, कृत्संज्ञा)

(ख) अपिधानम् इत्यत्र ........ मते वैकल्पिकोऽकारलोपो भवति । (सर्वेषां मते, भागुरिमते)

(ग) 'जीवसे' इत्यत्र .......... अव्ययत्वम् । (एजन्तत्वात्, मान्तत्वात)

(घ) 'अत्युच्चैसौ' इत्यत्र विभक्तिलोपः ...... । (भवति, न भवति)

## ७. सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु

वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् । अस्याशयं प्रकाशयत ।

# न्यायखण्डः

# अनुमानप्रमाणम्

न्यायशास्त्रे प्रमाणादयः षोडशपदार्थाः स्वीक्रियन्ते, प्रतिपाद्यन्ते च । एवमेव वैशेषिके द्रव्यादयः सप्त पदार्था इति । तत्र न्यायशास्त्रे द्वितीयपदार्थत्वेन प्रमाणम् उद्दिष्टम् । तर्कसङ्ग्रहकारेणान्नम्भट्टेन तदेव न्यायाभिमतं प्रमाणपदार्थम्, एवमेव वैशेषिकाभिमतान् द्रव्यादीन् सप्तपदार्थानादाय तर्कसङ्ग्रहनामा ग्रन्थो व्यतन्यत । एतावता अन्नम्भट्टकृतः ग्रन्थोऽसौ न्यायवैशेषिकशास्त्रयोः मेलनबिन्दुरिति । अथ चान्नम्भट्टो ग्रन्थान्ते न्यायाभिमतानां प्रमाणप्रमेयादीनां द्रव्यादिषु सप्तस्वेव पदार्थेष्वन्तर्भावात् सप्तैव पदार्थाः सिद्ध्यन्तीत्यपि स्पष्टीकरोति ।

तर्कसङ्ग्रहाख्ये ग्रन्थे प्रत्यक्षपरिच्छेदे प्रत्यक्षप्रमाणविषयकं विवरणं प्रस्तुत्य अनुमानपरिच्छेदे अनुमानप्रमाणविषयकं विवरणं प्रस्तुतं वर्तते । एवमेव उपमानपरिच्छेदे उपमानविषयकं विवरणमस्ति चेत् शब्दपरिच्छेदे शब्दप्रमाणविषयकं विवरणमस्ति । तथैव तर्कसङ्ग्रहस्यान्ते अवशिष्टपरिच्छेदे अवशिष्टगुणानां विवरणपूर्वकं कर्माद्यभावपर्यान्ताः पदार्था विवृताः सन्ति ।

अमुष्मिन् लेखनव्यापारे तर्कसङ्ग्रहशैलीं तत्र प्रतिपादितविषयाँश्चादायानुमानप्रमाणं तत्सम्बद्धाँश्च विषयान् विवृत्य उपमानशब्दप्रमाणे वितन्येते । तदनु अभावपर्यन्ता अवशिष्टविषयाश्च विव्रियन्ते । तत्रादावनुमानप्रमाणविवृत्तिरुपक्रम्यते-

अनुमानं तावन्न्यायशास्त्राभिमतप्रमाणेष्वन्यतमम् । प्रमाणञ्च प्रमासाधनम् । प्रमा हि यथार्थानुभवः । प्रत्यक्षानुमित्युपमितिशाब्दभेदाच्चतुर्विधो यथार्थानुभवः । प्रमाणञ्च पुनर्यथाक्रमं प्रत्यक्षानुमानोपमानशब्दभेदेन चतुर्विधम् ।

प्रत्यक्षज्ञानं प्रति इन्द्रियं करणम् । तदेव प्रमाणम् । एतावता इन्द्रियं प्रत्यक्षम् । इन्द्रियार्थसन्निकर्षश्च व्यापारः । चाक्षुषादिप्रत्यक्षज्ञानं फलम् । अथ चानुमितिं प्रति पक्षधर्मताज्ञानानन्तरं जायमानं व्याप्तिज्ञानं करणम् । परामर्शो व्यापारः । अनुमितिः फलम् ।

जिज्ञासूनां भवतु सारल्यमिति धिया अत्र चतुर्विधानामपि प्रमाणानां करणं व्यापारः फलञ्च यथायथं स्पष्टीक्रियते-

| **करणम् (प्रमाणम्)** | **व्यापारः** | **फलम्** |
|---|---|---|
| इन्द्रियम् | इन्द्रियार्थसन्निकर्षः | चाक्षुषादिप्रत्यक्षज्ञानम् |
| व्याप्तिज्ञानम् | परामर्शः | अनुमितिज्ञानम् |

| | | |
|---|---|---|
| सादृश्यज्ञानम् | अतिदेशवाक्यार्थस्मरणम् | संज्ञासंज्ञिसम्बन्धज्ञानम् |
| पदज्ञानम् | पदार्थस्मरणम् | शाब्दज्ञानम् |

अत्र करणत्वेन इन्द्रियादिकं निर्दिष्टम् । करणञ्चासाधारणं कारणमिति । असाधारणत्वञ्च व्यापारवत्त्वम् । अतो व्यापारवदसाधारणं कारणं करणमिति दृष्ट्या उपरितनं विवरणं दत्तम् । एतच्च प्राचीनमतानुरोधेन किंवा अर्वाचीनमतानुरोधेनेति । प्रायो नवीनास्तु फलाव्यवहितपूर्ववर्त्तिकारणत्वं करणत्वमित्याचक्षते । तर्कसङ्ग्रहकारेण यथेच्छं प्राचीननवीनानां मतमवलम्बितम् । यथा तत्रभवता अन्नम्भट्टेन प्रत्यक्षोपमानविषये प्राचीनानां मतमवलम्बितं लभ्यते चेदनुमितिकरणविषये तु फलाव्यवहितपूर्ववर्त्तित्वं कारणत्वमिति नवीनमतमादाय लिङ्गपरामर्शस्यैव अनुमितिकरणत्वं प्रतिपादितमस्ति । इदन्तु पाणिनिसूत्रादिविरुद्धम्, वस्तुतस्तु व्यापारवत्कारणं करणमित्येव साध्विति शास्त्रविचक्षणाः । अतो व्याप्तिज्ञानमेव करणं परामर्शस्तु व्यापार एव । यच्च मुक्तावलीकारेण विश्वनाथपञ्चाननेन स्पष्टत उक्तम्- **व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् ।**

प्रत्यक्षविषये पुनस्तर्कसङ्ग्रहकारेण **एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं तत्करणमिन्द्रियम् । तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्** इत्यादिवचनरचनेन इन्द्रियस्यैव प्रत्यक्षप्रमाणत्वे निष्कृष्टेऽपि तर्कभाषादौ .... **तस्याः (प्रमायाः) करणं त्रिविधम् । कदाचिद् इन्द्रियम्, कदाचिद् इन्द्रियार्थसन्निकर्षः, कदाचिज्ज्ञानम् । कदा पुनरिन्द्रियं करणम् ? यदा निर्विकल्पकरूपा प्रमा फलम् ।** .... **कदा पुनरिन्द्रियार्थसन्निकर्षः करणम् ? यदा निर्विकल्पकानन्तरं सविकल्पकं नामजात्यादियोजनात्मकं डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयमिति विशेषणविशेष्यावगाहि ज्ञानमुत्पद्यते तदा ।** .... **कदा पुनर्ज्ञानं करणम् ? यदा उक्तसविकल्पकानन्तरं हानोपादानोपेक्षाबुद्धयः फलम्** .... इत्यादिकमुक्त्वा प्रत्यक्षप्रमाणं यथावस्थं पृथक् पृथग् भवतीति स्पष्टीकृतं लभ्यते । अत्र तु लेखनव्यापारे तर्कसङ्ग्रहमेवाधारीक्रियमाणत्वाद् इन्द्रियमेव प्रत्यक्षप्रमाणमित्येव स्थिरीक्रियते । एवमेव अनुमितौ व्याप्तिज्ञानस्यैव करणत्वे समीचीनेऽपि तर्कसङ्ग्रहकारेण लिङ्गपरामर्शस्यैव अनुमितिकरणत्वं स्थिरीकृतम् । अतोऽत्र लेखनव्यापारे तदेवाऽऽदाय विचारो वितन्यते ।

एतावतोपर्युक्तविवरणेन प्रत्यक्षे इन्द्रियस्य करणत्वेऽपि (प्रमाणत्वेऽपि) अनुमानादौ ज्ञानस्यैवेति विवेकः । अनुमित्यादिषु त्रिष्वपि ज्ञानेषु ज्ञानानामेव प्रमाणत्वेऽपि तत्स्वरूपभेदेन तानि त्रिविधान्यपि करणीभूतानि ज्ञानानि भिद्यन्ते इति ध्येयम् ।

अत्र तावत्तर्कसङ्ग्रहग्रन्थकृदन्नम्भट्टोऽ**नुमितिकरणमि**त्यादिनाऽनुमानं विवृणोति-

**मूलम्**

**अनुमितिकरणमनुमानम् । परामर्शजन्यं ज्ञानमनुमितिः । व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः । यथा 'वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानं परामर्शः । तज्जन्यं पर्वतो वह्निमान् इति ज्ञानमनुमितिः ।**

## विवरणम्

अनुमानं तावत् पश्चाज्जायमानं मानम् । अतश्चोक्तं वात्स्यायनेन मुनिना **मितेन लिङ्गेन लिङ्गिनोऽर्थस्य पश्चान्मानमनुमानम् ।** ज्ञातं किञ्चन लिङ्गं भवति, तेन च ज्ञातेन=मितेन अज्ञातस्य लिङ्गिनो ज्ञानमेवानुमानम् । 'अनु' उपसर्गपूर्वकात् 'माङ् माने' इत्यस्माद्धातोः अनुमीयतेऽनेनेति करणे ल्युटा अनुमानपदं निष्पद्यते । तच्च न्यायशास्त्रे 'लिङ्गपरामर्शः' इत्यप्युच्यते । तद्विग्रहश्च 'लिङ्गस्य परामर्शः' इति । परामर्शश्च **व्याप्तिविशिष्टपक्षधर्मताज्ञानम्** इति । लिङ्गञ्च व्याप्तिबलेनार्थगमकमिति । व्याप्तिर्हि साहचर्यनियमः । स च 'यत्र यत्र धूमस्तत्र तत्र वह्नि'रिति । प्रथमन्तावत् कश्चन भूयो भूयो धूमं पश्यन् वह्निमपि पश्यति ततश्चाग्निधूमयोर्भूयोदर्शनेन वह्निधूमयोः स्वाभाविकसम्बन्धरूपाया व्याप्तेः 'यत्र यत्र धूमस्तत्र तत्र वह्नि'रित्यवधारणात्मकं ज्ञानं तस्य भवति । स च गृहीतव्याप्तिको जनः कदाचन अरण्यादिकं गच्छति । ततः स दूरत उड्डीयमानं धूमं पश्यन्नाह- 'धूमवानयं पर्वतः' इति । यच्च पक्षधर्मताज्ञानमित्युच्यते । ततो 'यत्र यत्र धूमस्तत्र तत्र वह्नि'रिति रूपाया व्याप्तेः स्मरणं तस्य भवति । तत उभाभ्यां पक्षधर्मताज्ञानव्याप्तिस्मरणाभ्यां 'वह्निव्याप्यधूमवानयं पर्वतः' इति परामर्शो जायते । ततः 'पर्वतो वह्निमान्' इत्यनुमितिः । इत्येवं भूयोदर्शन-व्याप्तिग्रहण-पक्षधर्मताज्ञान-व्याप्तिस्मृति-परामर्श-अनुमितीनां क्रम एवानुमानप्रक्रिया ।

अनुमानस्य परिष्कृतलक्षणन्तु- अनुमितित्वावच्छिन्नकार्यतानिरूपितकरणताश्रयत्वम् अनुमानत्वम् । तथाश्रयत्वञ्च परामर्शे । इदं नवीनमतम् । यच्च तर्कसङ्ग्रहकारेण अवलम्बितम् । प्राचीनमतानुसारेण तु अनुमितित्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वे सति अनुमितिजनकव्यापारजनकत्वम् अनुमानत्वमिति, तदाश्रयत्वञ्च व्याप्तिज्ञानपक्षधर्मताज्ञानयोः । अत्र लक्षणघटकव्यापारश्च 'तज्जन्यत्वे सति तज्जन्यजनकः' इति । 'पर्वतो वह्निमान् धूमाद्' इत्यत्र व्याप्तिज्ञानजन्यत्वे सति 'पर्वतो वह्निमान्' इत्येवंरूपाया अनुमितेर्जनकत्वं परामर्शे वर्तते । 'पर्वतो वह्निमान्' इत्यत्र लक्षणसमन्वयश्चेत्थम्- 'पर्वतो वह्निमान्' इत्यनुमितित्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वे सति अनुमितिजनकपरामर्शरूपव्यापारजनकत्वञ्च व्याप्तिज्ञानात्मकेऽनुमाने वर्तत इति ॥

'व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः' इत्यत्र घटकीभूतां व्याप्तिं परामर्शञ्च निरूपयन् ग्रन्थकृदाह-

## मूलम्

**यत्र यत्र धूमस्तत्र तत्राग्निरिति साहचर्यनियमो व्याप्तिः । व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता ।**

## विवरणम्

**अनुमानस्याङ्गानि-** मूलतोऽनुमानस्याङ्गद्वयं स्वीक्रियते व्याप्तिः पक्षधर्मता च । यथाह तर्कभाषाकारः केशवमिश्रः- **अनुमानस्य द्वे अङ्गे व्याप्तिः पक्षधर्मता चेति ।** हेतुसाध्ययोरविनाभावसम्बन्धरूपाया

व्याप्तेर्ज्ञानमन्तरा अनुमानमसम्भवम् । व्याप्यस्य पर्वतादिवृत्तित्वरूपपक्षधर्मताज्ञानमन्तरा च तदसम्भवमिति । अत्र तदेवानुमानाङ्गद्वयं व्याप्तिः पक्षधर्मता चेति विव्रियते-

व्याप्तिः- व्याप्तिर्नाम केत्यत्राह- **यत्र यत्रे**त्यादि । 'साहचर्यनियमः' इति व्याप्तेर्लक्षणम् । तदभिलापकं वाक्यम् 'यत्र यत्र धूमस्तत्र तत्राग्निः' इति । साहचर्यं सामानाधिकरण्यम् । तस्य नियमः- अव्यभिचारः । कादाचित्कं साहचर्यं न व्याप्तिः । सार्वकालिकं साहचर्यमपेक्षितं भवति । यथा वह्निधूमयोः । यत्र यत्र धूमः स्यात्, तत्र तत्र सर्वत्रापि वह्निरपि स्यात् । एतादृशं वह्निसाहचर्यं धूमे वर्तत इति वह्निव्याप्तिर्धूमे वर्तते । तेन च धूमो वह्निव्याप्यो भवति । एवं ययोरव्यभिचरितः सम्बन्धो भवति, तयोर्व्याप्तिर्भवत्येव । यत्र तु कादाचित्कं साहचर्यम्, तत्र तु न व्याप्तिः । यथा लेखनीपुस्तिकयोः ।

व्याप्तेः स्वरूपविषयकं विवरणं न न्यायसूत्रे स्पष्टं लभ्यते । भाष्यकारेण वात्स्यायनमुनिनापि न स्पष्टं व्याप्तिर्विवृता, परं तत्रभवता 'तत्पूर्वकम्' इत्यत्रस्थतत्पदव्याख्यानावसरे **लिङ्गलिङ्गिनोः सम्बन्धदर्शनम्** इत्युल्लिखितं वर्तते । तदेव व्याप्तिपरिचायकमिति सुवचम् । न्यायवार्तिककारेण च **लिङ्गलिङ्गिसम्बन्धदर्शनमाद्यं प्रत्यक्षम्** इत्युक्त्वा लिङ्गलिङ्गिसम्बन्धरूपव्याप्तिस्वरूपं संसूचितम् । तात्पर्यटीकायां **लिङ्गलिङ्गिसम्बन्धदर्शनमाद्यं प्रत्यक्षमिति** अनूद्य उपर्युक्तं वार्तिककारमतं स्वीकृतमिति भाति । न्यायदर्शने स्पष्टतया व्याप्तिपदस्य प्रयोगः सर्वप्रथममनेन तात्पर्यटीकाकारेण वाचस्पतिमिश्रेणैव कृतः । जयन्तभट्टेन च व्याप्तिर्नामाविनाभावो नित्यसाहचर्यमिति उक्त्वा हेतोरविनाभावो नित्यसाहचर्यं वा व्याप्तिरिति मतं प्रतिपादितम्- ...**नियमस्मृतेरिति, विव्रियतां कोऽयं नियमो नाम ? व्याप्तिरविनाभावो नित्यसाहचर्यमित्यर्थः ।** उदयनश्च निरुपाधिकसम्बन्धाद् अव्यभिचारमेव व्याप्तित्वेनोररीकरोति- **स्वाभाविको निरुपाधिरित्यर्थः । यद्यपि व्यभिचाराव्यभिचारव्याप्तौ औपाधिकत्वानौपाधिकत्वे, ताभ्याञ्च व्यभिचाराव्यभिचाराविति नियमः ।** तत्त्वचिन्तामणिकारश्च अनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिरिति समाशङ्क्य 'साध्याभाववदवृत्तित्वम्' इत्यादिपूर्वपक्षव्याप्तिमुक्त्वा **प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभाव-प्रयियोगितावच्छेका-वच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्ति**रिति सिद्धान्तितम् । निष्कर्षश्च हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यमिति । 'पर्वतो वह्निमान् धूमाद्' इत्यत्र धूमरूपे सद्धेतौ लक्षणसमन्वयः- हेतुः धूमः, तदधिकरणं पर्वतः, तद्वृत्तिर्योऽत्यन्ताभावो घटात्यन्ताभावः, न तु वह्न्यत्यन्ताभावः, तादृशाभावप्रतियोगी घटः, अप्रतियोगि साध्यञ्च वह्न्यात्मकम्, तदधिकरणं पर्वतः, तद्वृत्तित्वं धूमे इति ।

तर्कसङ्ग्रहकारोऽन्नम्भट्टश्च **साहचर्यनियमो व्याप्तिरि**त्याह । अस्यार्थस्तु नियतसाहचर्यं व्याप्तिरिति । नियतत्वञ्च व्यापकत्वम् । साहचर्यं पुनः सामानाधिकरण्यम् । तथा च व्याप्यनियतसाध्यसामानाधिकरण्यं व्याप्तिरित्यर्थः । वह्निधूमयोश्च धूमनियतवह्निसामानाधिकरण्यमिति ।

पुनर्दृढीभवामः- साहचर्यनियमो नाम अव्यभिचरितत्वम् । तदेव व्याप्तिरिति । अव्यभिचरितत्वञ्च व्यभिचाराभावः । व्यभिचारो नाम तदभाववत्यपि सत्त्वम् । यथा 'धूमवान् वह्नेः' इत्युक्ते सति

धूमवति महानसादौ यद्यपि वह्निर्वर्तते, अथापि धूमाभाववति तप्तायःपिण्डेऽपि वह्निर्वर्तते। अतो वह्नौ धूमसाहचर्यनियमो नास्ति, धूमाभाववति तप्तायःपिण्डादौ वह्निवृत्तेः। अयमेव व्यभिचार इत्युच्यते। ततश्च साध्याभाववद्वृत्तित्वं व्यभिचारः। साध्याभाववदवृत्तित्वमव्यभिचारः। अयमेव व्याप्तिरिच्युच्यते।

एवञ्च 'पर्वतो वह्निमान् धूमाद्' इत्यत्र लक्षणसमन्वयः। साध्यो वह्निः। तदभावो वह्न्यभावः। तथाऽभाववान् ह्रदादिः। तद्वृत्तित्वं धूमे वर्तते। अतो लक्षणं समन्वितम्। 'धूमवान् वह्नेः' इत्यत्र साध्यो धूमः। साध्याभावो नाम धूमाभावः। तद्वद् अयोगोलकम्। तद्वृत्तिः वह्निः। अतस्तद्वृत्तित्वं वह्नौ। साध्याभाववद्वृत्तित्वाभावाभावान्नातिव्याप्तिः।

पक्षधर्मता- अनुमानस्याङ्गद्वये व्याप्तिस्तावदनुमानस्य तार्किकमङ्गं पक्षधर्मता च मनोवैज्ञानिकम्। 'व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः' इत्यत्र घटकीभूता पक्षधर्मता का ? इत्यत्र तर्कसङ्ग्रहकारः- **व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मतेति**। परामर्शघटकव्याप्तेः स्वरूपमभिधाय तद्घटकस्य पक्षधर्मत्वस्य स्वरूपमाह - **व्याप्यस्ये**त्यादि। व्याप्यः = व्याप्त्याश्रयो हेतुः। तस्य पक्षे वर्तमानत्वमेव पक्षधर्मतापदार्थः। हेतोः पक्षवृत्तित्वज्ञानं पक्षधर्मताज्ञानमित्युच्यते। 'पर्वतो वह्निमान् धूमाद्' इत्यत्र व्याप्यो धूमादिः, तन्निष्ठपर्वतादिनिरूपितवृत्तित्वं पक्षधर्मता। एतन्नाम पक्षे हेतोः स्थितिरेव पक्षधर्मता। पुनर्दृढीभवामः- यदनुमीयते=साध्यते तदनुमेयम्=साध्यम्। येन साध्यते, स हेतुः। यत्र साध्यते सः पक्षः, हेतोः पक्षसत्त्वं पक्षधर्मतेति विवेकः। निष्कर्षे गृहीतायां व्याप्तौ पक्षधर्मतायाञ्चाधिगतायां परामर्शद्वारा अनुमितिर्जायते। एतावता व्याप्तिज्ञानं परामर्शो वानुमानम्॥

लिङ्गपरामर्श एव अनुमितिकरण वक्ष्यते। तत्र चानुमितिः कतिविधा ? अनुमितौ लिङ्गपरामर्शस्य कथं करणत्वम् ? इत्यादि आशङ्कां परिहर्तुं ग्रन्थकारोऽनुमानं विभजते-

**मूलम्**

**अनुमानं द्विविधम्- स्वार्थं परार्थं च।**

**विवरणम्**

स्वार्थं सम्पन्ना अनुमितिः स्वार्थानुमितिः। परार्थं सम्पन्ना अनुमितिः परार्थानुमितिः। स्वस्य अर्थः प्रयोजनं यस्मात् तत् स्वार्थम्। परस्यार्थः प्रयोजनं यस्मात् तत् परार्थम्। अथवा स्वः स्वकीयः अर्थः साध्यसंशयनिवृत्तिरूपः प्रयोजनविशेषः यस्मात् तदिति व्युत्पत्त्या स्वीयसंशयनिवृत्तिजनकमित्यर्थः। एवमेव परार्थमिति। एतावता अनुमितिकरणीभूतमनुमानं स्वार्थपरार्थभेदाद् द्विविधम्॥

ग्रन्थकर्ताऽनुमानस्य द्वैविध्यं स्पष्टीकृत्य ततः स्वार्थानुमानं विवृणोति-

**मूलम्**

**तत्र स्वार्थं स्वानुमितिहेतुः । तथाहि स्वयमेव भूयो दर्शनेन 'यत्र यत्र धूमस्तत्र तत्राग्निः' इति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति– 'यत्र यत्र धूमस्तत्र तत्राग्निः' इति । तदनन्तरं 'वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानमुत्पद्यते । अयमेव लिङ्गपरामर्श इत्युच्यते । तस्मात् 'पर्वतो वह्निमान्' इति ज्ञानमनुमितिरुत्पद्यते । तदेतत् स्वार्थानुमानम् ।**

**विवरणम्**

स्वार्थानुमानं नाम स्वस्यैव कृते जायमानमनुमानमिति । स्वार्थानुमितिप्रकारश्चेत्थम्– कश्चन पुरुष आदौ महानसादिषु धूमं पश्यन् अथ च तत्रैव वह्निञ्च पश्यन् तयोः साहचर्यं गृह्णाति । अथ च तयोः साहचर्यस्य भूयो दर्शनेन व्यभिचाराभावञ्चात्मसात्कृत्य 'यत्र यत्र धूमस्तत्र तत्र वह्निः' इति धूमे वह्निनिरूपितां व्याप्तिं गृह्णाति । इदमेव व्याप्तिज्ञानम् । ततश्च कदाचन पर्वतादौ गतस्य गृहीतव्याप्तिकस्य जनस्य पर्वते धूमं दृष्ट्वा 'धूमवान् पर्वतः' इति ज्ञानं जायते, इदञ्च पक्षधर्मज्ञानम् । यच्च पक्षधर्मताज्ञानञ्चोच्यते । ततश्च पूर्वं गृहीतां 'यत्र यत्र धूमस्तत्र वह्निः, किंवा धूमो वह्निव्याप्यः' इति व्याप्तिं स्मरति, तदनन्तरं 'तादृशवह्निव्याप्यो धूमः पर्वतेऽस्ति' इत्याख्यं ज्ञानं जायते, यच्च परामर्शः । ततो 'वह्निमान् पर्वतः' इति ज्ञानं जायते । इदमेव ज्ञानं स्वार्थानुमितिरिति । तत्साधनमनुमानम् । अनुमीयते अनेनेत्यनुमानम् इति करणार्थकप्रत्यये तु ज्ञानकरणमर्थः । अस्यानुमानस्य स्वानुभवरूपत्वात् स्वार्थानुमानमिति व्यवहारः ॥

स्वार्थानुमानं निरुच्य ग्रन्थकर्ता 'यत्तु' इत्यादिना परार्थानुमाननिरूपणमारभते-

**मूलम्**

**यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुङ्क्ते तत्परार्थानुमानम् । यथा पर्वतो वह्निमान्, धूमवत्त्वात्, यो यो धूमवान् स स वह्निमान्, यथा महानसम्, तथा चायम्, तस्मात् तथा इति । अनेन प्रतिपादिताल्लिङ्गात् परोऽप्यग्निं प्रतिपद्यते ।**

**विवरणम्**

स्वार्थानुमानस्य वर्णितपूर्वकत्वादिहाधुना परार्थानुमानं विव्रियते- स्वज्ञानानन्तरं परप्रतिपत्तिसाधकं परार्थानुमानम् । कश्चिज्जनः स्वानुभवानन्तरमन्यस्यापि तादृशानुमित्युत्पिपादयिषया कानिचन वाक्यानि प्रयुङ्क्ते, तानि च वाक्यानि श्रुत्वा परोऽपि पदार्थं निश्चिनोति । अतस्तादृशवाक्यप्रयोग एव मूलम् । तत्रादौ साध्ययुक्तपक्षवचनं निर्दिश्यते, सैव प्रतिज्ञा । यथा 'पर्वतो वह्निमान्' । ततो हेतुरुच्यते । यथा 'धूमवत्त्वात्' । ततः साध्यहेत्वोः साहचर्यप्रदर्शनपूर्वकम् उदाहरणमुच्यते- यथा 'यथा महानसम्' इति । ततः 'तथा चायम् = अयमपि पर्वतस्तथैव धूमवान् अस्ति' इत्युच्यते । ततः 'तस्मात्तथा = वह्निव्याप्यधूमवत्त्वादयमपि पर्वतः वह्निमान्' इत्युच्यते । एतावता एतेषां वाक्यानां परस्यानुमितिं प्रति हेतुत्वाद् एतानि पञ्च वाक्यानि

'परार्थानुमानम्' इति भण्यन्ते । तानि च वाक्यानि 'न्यायः' किंवा 'परमो न्यायः' इत्युच्यन्ते । अतश्चोच्यते न्यायप्रयोज्यत्वे सति ज्ञानत्वं परार्थानुमानस्य लक्षणम् ।

प्रसङ्गेऽत्र भाष्यकारवात्स्यायनवचनमपीदं स्मर्तुं योग्यम्- **साधनीयस्यार्थस्य यावति शब्दसमूहे सिद्धिः परिसमाप्यते तस्य पञ्चाऽवयवाः प्रतिज्ञादयः समूहमपेक्ष्य अवयवा उच्यन्ते । तेषु प्रमाणसमवायः । आगमः प्रतिज्ञा, हेतुरनुमानम्, उदाहरणं प्रत्यक्षम्, उपनयनमुपमानम्, सर्वेषामेकार्थसमवाये सामर्थ्यप्रदर्शनं निगमनमिति । सोऽयं परमो न्यायः ॥**

ननु 'धूमादग्निमनुमाय परप्रतिपत्त्यर्थं पञ्चावयववाक्यं प्रयुङ्क्ते' इत्युक्तम् । तत्र के ते पञ्चावयवाः ? इत्यत्रोच्यते-

## मूलम्

**प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः । 'पर्वतो वह्निमान्' इति प्रतिज्ञा । 'धूमवत्त्वाद्' इति हेतुः । 'यो यो धूमवान् स स वह्निमान्, यथा महानसम्' इत्युदाहरणम् । 'तथा चायम्' इत्युपनयः । 'तस्मात्तथा' इति निगमनम् ।**

## विवरणम्

साधनीयस्य अर्थस्य यावति शब्दसमूहे सिद्धिर्जायते, तत्र प्रयुक्ताः प्रतिज्ञादय तस्य समूहपेक्ष्य अवयवा उच्यन्ते । समूहश्च पुनः परमो न्यायः । एतावता न्यायशास्त्रे अनुमानप्रमाणस्य तत्रापि परार्थानुमानस्य वैशिष्ट्यं प्रतिपादितं भवति । तथा च परार्थानुमानवाक्यस्य एकदेशीभूताः प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनानि पञ्च अवयवाः । अत्र तावत् क्रमशस्तेषां विवरणमुपस्थाप्यते-

### (क) प्रतिज्ञा

साध्यनिर्देशः प्रतिज्ञा । अत्र साध्यपदेन प्रज्ञापनीयधर्मविशिष्टो धर्मीति । अतः साध्यवत्तया पक्षवचनं प्रतिज्ञा इति फलितार्थः । एतदेव ज्ञापयन् **साध्यविशिष्टपक्षबोधकवचनं प्रतिज्ञा** इति न्यायबोधिनीकारः । तदुदाहरणञ्च- 'पर्वतो वह्निमान्' इति वाक्यं प्रतिज्ञा ।

### (ख) हेतुः

तृतीयान्तं पञ्चम्यन्तं वा वचनं हेतुः । यथा 'पर्वतो वह्निमान् धूमाद्' इत्यत्र 'धूमाद्' इति वाक्यम् हेतुः ।

(ग) **उदाहरणम्**

उदाह्रियतेऽनेन धर्मयोः साध्यसाधनभाव इति उदाहरणम्। तथा च व्याप्तिप्रतिपादकदृष्टान्तवचनमुदाहरणम् । यथा 'पर्वतो वह्निमान् धूमाद्' इत्यत्र पर्वते धूमहेतुना वह्नौ साध्ये 'यथा महानसम्' इति वाक्यमुदाहरणम् ।

(घ) **उपनयः**

उदाहृतव्याप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकवचनमुपनयः । यथा 'पर्वतो वह्निमान् धूमाद्' इत्यत्र धूमहेतुना वह्नौ साध्ये 'तथा चायम् = वह्निव्याप्यधूमवाँश्चायं पर्वतः' इति वाक्यमुपनयः ।

(ङ) **निगमनम्**

हेतुकथनपूर्वकं प्रतिज्ञायाः पुनर्वचनम् एव निगमनम् । किंवा पक्षे साध्यस्याबाधितत्वप्रतिपादकवचनं निगमनम् । यथा 'पर्वतो वह्निमान् धूमाद्' इत्यत्र धूमहेतुना वह्नौ साध्ये 'तस्मात्तथा = धूमवत्त्वादयं पर्वतो वह्निमान्' इति निगमनम् ।

सूत्रकारोऽक्षपादश्च प्रतिज्ञादीन् अवयवान् परिचाययन् तेषां लक्षणानि चेत्थमाह- **साध्यनिर्देशः प्रतिज्ञा, उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः, तथा वैधर्म्यात्, साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम्, तद्विपर्ययाद्वा विपरीतम्, उदाहरणापेक्षस्तथात्युपसंहारो न तथेति वा साध्यस्योपनयः, हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् ॥**

स्वार्थपरार्थभेदेन अनुमितेः द्वैविध्ये तत्करणमनुमानमपि स्वार्थपरार्थभेदेन द्विविधमेव सिद्धम् । तत्र उभयत्र व्यापारो भिन्न वा समान इति जिज्ञासां निराकर्तुं ग्रन्थकृदन्नम्भट्ट आह-

## मूलम्

**स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणम् । तस्माल्लिङ्गपरामर्शोऽनुमानम् ।**

## विवरणम्

केचन प्राचीना 'ज्ञायमानं लिङ्गमनुमितिकरणमि'ति आचक्षते । वस्तुतस्तु अनुमितौ ज्ञायमानस्य लिङ्गस्य नापेक्षितत्वम् । लिङ्गज्ञानेनैवालम् 'इयं यज्ञशाला वह्निमती (आसीत्) अतीतधूमाद्, इयं यज्ञशाला च वह्निमती (भविष्यति) भविष्यधूमाद्' इत्यादौ लिङ्गाभावेऽपि अनुमितिदर्शनाद् इत्येव मनसि निधाय ग्रन्थकृदाचष्टे- **लिङगपरार्श एवे**ति । एतन्नाम लिङ्गस्य व्याप्यत्वेन पक्षे ज्ञानमेव परामर्शः । तदेव अनुमितिकरणमिति । फलाव्यवहितपूर्ववर्त्तिकारणत्वं करणत्वमिति नवीनानुरोधेन तर्कसङ्ग्रहकारेण

लिङ्गपरामर्शस्य अनुमितिकरणत्वं प्रतिपादितम्। उपरिष्टात् स्वार्थपरार्थभेदेनानुमानस्य द्वैविध्ये उक्तत्वे अनुमितेरपि द्वैविध्यं स्पष्टम्। द्विविधे अपि अनुमानज्ञाने लिङ्गपरामर्श एव करणमिति। लिङ्गपरामर्शो नाम ज्ञानविशेषः। स च तृतीयज्ञानम्। आदौ महानसादौ वह्निधूमयोर्व्याप्तौ गृह्यमाणायां यद्धूमज्ञानं जायते। तद् आद्यं धूमज्ञानम्। एतन्नाम महानसादौ तु असकृद् धूमज्ञानं जायते। परं यदा धूमे वह्निनिरूपिता व्याप्तिर्गृहीता भवति, तदा जायमानं धूमज्ञानमाद्यम्। ततः पक्षे धूमस्य यज्ज्ञानं भवति, तद् द्वितीयम्। ततः पुनर्वह्निव्याप्यत्वेन धूमस्य पर्वतादौ जायमानं ज्ञानमेव तृतीयम्। एतदेव परामर्श इति। उभयत्रापि अनुमितौ इदमेव करणमिति अन्नम्भट्टः॥

'स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणमि'ति उक्तम्। तत्र लिङ्गपदं घटकत्वेन आगतमस्ति। लिङ्गञ्च हेतुः। तस्य वैविध्यं प्रतिपादयति ग्रन्थकृद् 'लिङ्गमि'त्यादिना-

### मूलम्

**लिङ्गं त्रिविधम्- अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति।**

### विवरणम्

लीनमर्थं गमयति इति लिङ्गम्। एतन्नाम अज्ञातार्थगमकमेव लिङ्गम्। उपर्युक्ते विवरणे द्वितीयावयवत्वेन गृहीतो हेतुः। स च वचनरूपः। एतन्नाम अवयवत्वेन गृहीतो हेतुस्तावद्वचनरूपः। तदर्थत्वेन गृह्यमाणे तदेव लिङ्गमिति। लिङ्गञ्च अन्वयव्यतिरेकि-केवलान्वयि-केवलव्यतिरेकिभेदेन त्रिविधम्॥

त्रैविध्येन ज्ञापितस्य लिङ्गस्य अन्वयव्यतिरेकिरूपमाद्यं भेदं निरूपयति-

### मूलम्

अन्वयेन व्यतिरेकेण च व्याप्तिमद् अन्वयव्यतिरेकि। यथा वह्नौ साध्ये धूमवत्त्वम्। यत्र धूमस्तत्राग्निर्यथा महानसमित्यन्वयव्याप्तिः। यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति, यथा ह्रद इति व्यतिरेकव्याप्तिः।

### विवरणम्

अन्वयो नाम सम्बन्धः। सम्बन्धकृत्साहचर्यम् अन्वयसाहचर्यम् अर्थात् साध्यसाधनयोः साहचर्यमन्वयसाहचर्यम्। व्यतिरेको नाम अभावः। अर्थात् प्रकृतप्रसङ्गे साध्याभावो हेत्वभावश्च। तयोः साहचर्यं व्यतिरेकसाहचर्यम्। किंवा साध्यसाधनाभावयोः साहचर्यं व्यतिरेकसाहचर्यम्। तथा च अन्वयसाहचर्यप्रयोज्यव्याप्तिमत्त्वे सति व्यतिरेकसाहचर्यप्रयोज्यव्याप्तिमान् अन्वयव्यतिरेकी हेतुः। यथा धूमः। एवमेव स्पष्टीकुर्वन्नाह केशवमिश्रः- **यत्र यत्र धूमवत्त्वं तत्र तत्र वह्निमत्त्वं यथा महानसे इत्यन्वयव्याप्तिः। महानसे धूमवह्न्योरन्वयसद्भावात्। एवञ्च यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रदे इतीयं व्यतिरेकव्याप्तिः। महाह्रदे धूमाग्न्योर्व्यतिरेकस्य सद्भावदर्शनात्।** एतावता धूमे अन्वयव्याप्तिव्यतिरेकव्याप्त्युभयसम्भवाद् धूमोऽन्वयव्यतिरेकी हेतुरिति॥

त्रैविध्येन ज्ञापितस्य लिङ्गस्य केवलान्वयिरूपं द्वितीयं भेदं व्याकुर्वन्नन्नम्भट्ट आह-

### मूलम्

**अन्वयमात्रव्याप्तिकं केवलान्वयि । यथा– घटोऽभिधेयः, प्रमेयत्वात्, पटवदिति । अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति, सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च ।**

### विवरणम्

लिङ्गं नाम हेतुरित्युक्तपूर्वमेव । द्वितीयो हेतुः केवलान्वयी । तल्लक्षणन्तु **व्यतिरेकव्याप्तिशून्यत्वे सति अन्वयव्याप्तिमत्त्वम्, अथवा केवलान्वयिसाध्यकत्व**मिति गोवर्द्धनाचार्यः । साध्ये केवलान्वयित्वञ्चात्यन्ताभावाप्रतियोगिकत्वम् । यथा 'शब्दोऽभिधेयः प्रमेयत्वाद्' इत्यत्र शब्दः पक्षः, तस्याभिधेयत्वं साध्यं हेतुश्च प्रमेयत्वमिति । अत्र 'यत्र यत्र प्रमेयत्वं तत्र तत्र अभिधेयत्वमि'ति सम्भवेऽपि यत्र यत्र अभिधेयत्वाभावस्तत्र तत्र प्रमेयत्वाभाव इति व्यतिरेकव्याप्तेरसम्भवाद् व्यतिरेकव्याप्तिशून्यत्वे सति अन्वयव्याप्तिमत्त्वात् प्रमेयत्वस्य केवलान्वयित्वं निराबाधम् ॥

त्रैविध्येन ज्ञापितस्य लिङ्गस्य केवलव्यतिरेकिरूपं तृतीयं भेदं स्पष्टीकुर्वन्नाह-

### मूलम्

**व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि । यथा– पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात् । यदितरेभ्यो न भिद्यते न तद् गन्धवद्, यथा जलम् । न चेयं तथा । तस्मान्न तथेति । अत्र 'यद् गन्धवत् तदितरभिन्नम्' इत्यन्वयदृष्टान्तो नास्ति पृथिवीमात्रस्य पक्षत्वात् ।**

### विवरणम्

व्यतिरेकमात्रव्याप्तिमान् हेतुः केवलव्यतिरेकी । किंवा निश्चितान्वयव्याप्तिशून्यत्वे सति व्यतिरेकव्याप्तिमत्त्वं केवलव्यतिरेकित्वम् । यथा 'पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्' । अत्र पृथ्वीमात्रं पक्षः । पृथ्वीतरजलाद्यष्टभेदः साध्यः । गन्धश्च हेतुरिति । अत्र यद् गन्धवत्तदितरभेदवद् इत्यत्र अन्वयदृष्टान्तो नास्ति । परन्तु यत्र यत्र पृथिवीतरभेदाभावस्तत्र तत्र गन्धाभावो यथा जलादिकम् इति व्यतिरेकदृष्टान्तोऽस्ति । एतत्सर्वं मनसि निधाय ग्रन्थकृद् भट्टः 'यदितरेभ्यो न भिद्यते न तद् गन्धवत्, यथा जलम्' इति व्यतिरेकव्याप्तिं प्रदर्शयति । तथा व्यतिरेकव्याप्तिमान् हेतुरेव केवलव्यतिरेकीति ।

पुनर्दृढीभवामः- 'पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्' । अत्र पृथिवी पक्षः । साध्यश्च इतरभेदः (जलादिभेदः) । हेतुर्हि गन्धः । एतद्विवरणप्राक् स्पष्टार्थं तद्भिन्नं प्रसिद्धं 'पर्वतो वह्निमान् धूमाद्' इत्यनुमानाकारमादाय विवेचनमुपक्राम्यामः । तत्र पक्षः पर्वतः । तत्र पर्वतरूपं पक्षं विहाय महानसादावपि हेतुभूतो धूमोऽस्ति । अतो 'यत्र यत्र धूमस्तत्र वह्निः, यथा महानसम्' इति दृष्टान्तश्चास्ति । परमत्र तु पक्षः पृथिवी । हेतुः पुनर्गन्धः । अत्र यावन्तोऽपि पक्षभिन्नाः (पृथिवीभिन्नाः) पदार्था वर्तन्ते, तत्र न कुत्रापि गन्धोऽस्ति । अतः

पृथिवीरूपं पक्षं विहाय किमपि गृहीत्वा 'यत्र यत्र गन्धवत्त्वं तत्र तत्र जलादिभेदः' यथा इदम् इति वक्तुमेव न शक्यते । अतः पृथिव्याः पक्षत्वे पृथिवीतरस्य साध्यत्वे गन्धवत्त्वस्य च हेतुत्वे हेतोरन्वयव्याप्तिर्न सम्भवति, अतोऽस्माभिः किं वाच्यमिति चेद् 'यत् पृथिवीतरेभ्यः=जलादिभ्यो न भिद्यते (किंवा जलादिकमेव) न तद् गन्धवत्' यथा जलम्, वायुः, आकाशमित्यादिकं वाच्यम् । तत इयञ्च पक्षीभूता पृथिवी तथा नास्ति (जलाद्यभिन्ना नास्ति अपितु जलादिभिन्ना एवास्ति), अतो नेयं तथा (नेयं पृथिवी जलाद्यभेदवती), तस्मात् जलाद्यभेदाभाववत्त्वाद् इयं पृथिवी जलाद्यभिन्ना नास्ति अपितु जलादिभिन्नैवेति ।

एवमेवेदमपि अवधेयम्- जीवच्छरीरम् आत्मवत् प्राणादिमत्त्वादिति । यदात्मवन्न भवति तत्प्राणादिमन्न भवति । यथा घटः । एतच्च जीवच्छरीरं न अप्राणादिमत् तस्मात् नाऽनात्मवदिति । अत्र अन्वयव्याप्तेरभावात् प्राणादिमद्धेतुः केवलव्यतिरेकीति ।

उपर्युक्तेषु त्रिष्वपि हेतुषु अन्वयव्यतिरेकी हेतुः पक्षसत्त्वादिपञ्चरूपोपपन्नः सन्नेव स्वसाध्यं साधयितुं क्षमते । केवलव्यतिरेकी हेतुश्च सपक्षसत्त्वमतिरिच्य अवशिष्टचतूरूपोपपन्नः सन् स्वसाध्यं साधयितुं समर्थते । केवलान्वयी च विपक्षसत्त्वमतिरिच्यावशिष्टचतूरूपोपपन्नः सन् स्वसाध्यं साधयितु प्रबलः । तदन्ये हेतवश्च हेत्वाभासाः ॥

उपरिष्टात् परामर्शलक्षणे व्याप्तिविशिष्टपक्षधर्मताज्ञानमिति उक्तत्वाद् अथ च केवलव्यतिरेकिविवेचनक्रमस्यान्ते 'पृथिवीमात्रस्य पक्षत्वादि'त्यत्रापि पक्षपदस्योद्दिष्टत्वात् पक्षः कः ? इति प्रश्नः स्वाभाविकः । अतः पक्षस्य विवेच्यत्वात् तत्प्रसङ्गात् सपक्षविपक्षयोरपि विश्लेषणगर्भितत्वात्तल्लक्षणान्याह-

## मूलम्

**सन्दिग्धसाध्यवान् पक्षः । यथा धूमवत्त्वे हेतौ पर्वतः । निश्चितसाध्यवान् सपक्षः, यथा तत्रैव महानसम् । निश्चितसाध्याभाववान् विपक्षः, यथा तत्रैव महाह्रदः ।**

## विवरणम्

साध्यप्रकारकसन्देहविशेष्यत्वं पक्षत्वम् । किंवा सन्देहविषयकसाध्याश्रयत्वं पक्षत्वम् । पर्वतो वह्निमान् न वेति सन्देहविषयीभूतसाध्याश्रयत्वं पर्वते वर्तत इति रीत्या लक्षणसमन्वयो जायते । उक्तलक्षणे सन्दिग्धपदानुपादाने सपक्षे अतिव्याप्तिः । सपक्षे निश्चितसाध्यस्य स्थितेः ।

लक्षणमिदमनुमितेः पूर्वं साध्यसन्देहो नियमेन जायते इत्यभिप्रायेण प्राचीनैः कृतम् । वस्तुतस्तु गगनं मेघवन्न वेति सन्देहाभावदशायामपि गेहमध्यस्थपुरुषस्य घनघर्जनश्रवणेनैव 'गगनं मेघवदि'त्यनुमितेः दर्शनात् प्राचीनैः कृतं लक्षणं विहाय नव्यैरनुमित्युद्देश्यत्वं पक्षत्वमिति लक्षणं निष्कृष्टम् । प्रसङ्गेऽत्र कारिकावलीकारेण विश्वनाथेन निष्कृष्टत्वे कृतं बहुग्राह्यं लक्षणञ्चावधेयम्-

**सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते ।**

**स पक्षः** .... **॥७०॥**

सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता, तद्वान् पक्ष इत्यर्थः । 'पर्वतो वह्निमान् धूमादि'त्यत्र पर्वतः पक्ष इति ।

पक्षलक्षणानन्तरं सपक्षलक्षणन्तु सुगमम् । तल्लक्षणं कुर्वन् ग्रन्थकृदाह- **निश्चिते**ति । साध्यप्रकारकनिश्चयविशेष्यत्वं सपक्षत्वम् । निश्चयश्च 'महानसं वह्निमद्' इत्याकारकः । पक्षेऽतिव्याप्तिवारणाय निश्चितेति । एवमेव साध्येऽतिव्याप्तिवारणाय साध्यवानिति । एतावता 'पर्वतो वह्निमान् धूमाद्' इत्यत्र महानसादिः सपक्षः ।

पक्षसपक्षलक्षणानन्तरं विपक्षं लक्षयन्नाह- **निश्चिते**ति । साध्याभावप्रकारकनिश्चयविशेष्यत्वं विपक्षत्वमिति । 'पर्वतो वह्निमान् धूमाद्' इत्यत्र साध्यो वह्निः, साध्याभावश्च वह्न्यभावः । वह्न्यभावनिश्चयश्च ह्रदे (महाह्रदे) । अतः 'ह्रदः (महाह्रदः) वह्न्यभाववान्' इत्याकारको बोध एव निश्चयात्मक इति । सपक्षेऽतिव्याप्तिवारणाय **साध्ये**ति । एतन्नाम 'निश्चितसाध्याभाववान्' इत्यत्र 'निश्चिताभाववान् विपक्षः' इति उच्यमाने निश्चिताभावपदेन वह्न्यात्मकं वह्न्यभावाभावमादाय अथ च घटाभावञ्चादाय सपक्षीभूते महानसादावतिव्याप्तिरिति । तन्निवारणाय साध्यपदमुपात्तम् । एवमेव सपक्षेऽतिव्याप्तिवारणाय **अभावे**ति । एतन्नाम लक्षणेऽभावपदं विहाय 'निश्चितसाध्यवान्' इत्युच्यमाने सति सपक्षेऽतिव्याप्तिः । तन्निवारणार्थं अभावपदमुपात्तम् । 'पर्वतो वह्निमान् धूमाद्' इत्यत्र जलह्रदो विपक्षः ।

## पदानामर्थपरिचयः

| | | |
|---|---|---|
| न्यायः | = | गौतमीयशास्त्रम्, तच्च प्रमाणैरर्थपरीक्षकम् । |
| प्रमाणम् | = | प्रमासाधनम् । |
| प्रमा | = | यथार्थानुभवः । |
| अप्रमा | = | अयथार्थानुभवः । |
| अभिमतम् | = | सम्मतम् । |
| चतुर्विधः | = | चतुःप्रकारकः । |
| यथाक्रमम् | = | क्रमेण, क्रमम् अनतिक्रम्य । |
| जिज्ञासुः | = | ज्ञातुकामः । |
| करणम् | = | असाधरणं कारणम् । |
| व्यापारः | = | तज्जन्यत्वे सति तज्जन्यजनकः (सम्बन्धविशेषः) । |
| नवीनाः | = | नव्याः । |

| | | |
|---|---|---|
| सन्निकर्षः | = | इन्द्रियार्थसम्बन्धविशेषः । |
| लिङ्गम् | = | सूचकम्/हेतुः । |
| लिङ्गी | = | साध्यः । |
| तावत् | = | अत्र पाठे वाक्यालङ्कारः । |
| व्याप्तिः | = | साध्याभाववदवृत्तित्वरूपः सम्बन्धविशेषः । |
| अवधारणात्मकम् | = | निश्चयात्मकम् । |
| भूयोदर्शनम् | = | असकृद्दर्शनम् । |
| अङ्गम् | = | अवयवः । |
| साहचर्यम् | = | सामानाधिकरण्यम् । |
| अनूद्य | = | अनूच्य । |
| औपाधिकत्वम् | = | उपाधिकृतम्, उपाधिसाहित्यम् । |
| अनौपाधिकत्वम् | = | उपाधिराहित्यम् । |
| उत्पिपादयिषा | = | उत्पादयितुमिच्छा । |
| सुगमम् | = | सरलम् । |

## अभ्यासः

### १. विवेचनात्मकमुत्तरं देयम्

(क) अनुमितिप्रक्रिया विविच्यताम् ।

(ख) अनुमानवैविध्यं साधु प्रकाश्यताम् ।

(ग) पञ्चावयववाक्यानि सोदाहरणानि प्रदर्श्यन्ताम् ।

(घ) लिङ्गवैविध्यं निर्दिश्य केवलान्वयिस्वरूपं प्रकाश्यताम् ।

(ङ) केवलव्यतिरेकि लिङ्गं साधु निरूप्यताम् ।

### २. वर्णनात्मकमुत्तरं देयम्

(क) कोऽयं परामर्शः ? इति निरूप्यताम् ।

(ख) व्याप्तिर्वर्णनीया ।

(ग) पक्षधर्मतायाः स्वरूपं प्रकाश्यताम् ।

(घ) स्वार्थानुमितिः कथं जायते ? इति स्पष्टीक्रियताम् ।

(ङ) उपनयवाक्यं वर्ण्यताम् ।

(च) निगमनस्य स्वरूपं प्रकाश्यताम् ।

(छ) अन्वयव्यतिरेकिणः स्वरूपं वर्ण्यताम् ।

(ज) विपक्षो निरूप्यताम् ।

## ३. अतिसङ्क्षिप्तमुत्तरं देयम्

(क) तर्कसङ्ग्रहे कति परिच्छेदाः सन्ति ?

(ख) न्यायशास्त्रे कति प्रमाणानि सम्मतानि ?

(ग) अनुमानस्य लक्षणं किम् ?

(घ) व्याप्तिः का ?

(ङ) पक्षधर्मता का ?

(च) हेतोः लक्षणं किम् ?

(छ) निगमनस्य स्वरूपं किम् ?

(ज) केवलव्यतिरेकिणः स्वरूपं किम् ?

(झ) सपक्षः कः ?

(ञ) विपक्षः कः ?

## ४. कक्षाभ्यासः/गृहाभ्यासः

(क) न्यायशास्त्राभिमतप्रमाणविषये कक्षायां सतीर्थ्यैः सह विमृश्यताम् ।

(ग) पञ्चावयवान् आदाय गुरुणा सतीर्थ्यैः सह संवादो विधेयः ।

(ख) परार्थानुमितिविषये एकं लेखं विरचय्य गुरवे प्रदर्श्यताम् ।

(घ) लिङ्गमादाय कक्षायां मित्रैः सह प्रश्नोत्तरकार्यं विधेयम् ।

(ङ) पक्षसपक्षविपक्षविषये कक्षायां गुरुणा सतीर्थ्यैश्च सह संवादो विधेयः ।

(च) पक्षविषयकमनुच्छेदद्वयं लेख्यम् ।

(छ) विपक्षमादाय अनुच्छेदद्वयं लेख्यम् ।

# हेत्वाभासः

अनुमितिप्रक्रियानिरूपणानन्तरम् अनुमितौ प्रयोक्तव्यस्य हेतोः दोषाः किंवा दुष्टा हेतवो विवेच्या भवन्ति । तदेवात्रोपक्रम्यते । प्रसङ्गेऽत्र आलोककर्तुरधस्तनं वाक्यमवधातुमुचितमतस्तदत्रादावुपन्यस्यते-

"एवमनुमितिः साङ्गा निरूपिता । अनुमितिर्यथार्थानुभवविशेषः । तस्या हेतुर्व्याप्तिज्ञानम्, व्याप्तिविशिष्टपक्षधर्मताज्ञानरूपपरामर्शो वा । तत्र व्याप्तिर्नाम का ? पक्षत्वं नाम किम् ? सपक्षत्वम्, विपक्षत्वम् च किम् ? इत्यादिकं सर्वं निरूपितम् । यथा प्रत्यक्षे प्रमाभ्रमविभागस्तथानुमितावपि प्रमाभ्रमविभागो वर्तते । प्रत्यक्षे तत्कारणानामिन्द्रियादीनां दोषाद् भ्रमो भवति । तथैवानुमितौ तद्धेतुभूतव्याप्तिपक्षधर्मतादिवैकल्यरूपदोषाद् भ्रमो भवति । व्याप्तिपक्षधर्मतादिविशिष्टत्वं सद्धेतूनां लक्षणं चेद् व्याप्तिपक्षधर्मताद्यन्यतमशून्यत्वं दुष्टहेतूनां स्वरूपम् । यथा 'पर्वतो वह्निमान्, धूमाद्' इत्यत्र धूमः सद्धेतुः, तथा 'पर्वतो धूमवान् वह्नेः' इत्यत्र वह्निर्दुष्टो हेतुः । 'यत्र धूमस्तत्र वह्निः' इति वह्निधूमयोर्नियतं साहचर्यं वर्तते, धूमवह्न्योस्तु न तथा साहचर्यं नियतम्, तप्तायोगोलके वह्नेस्सत्त्वेऽपि धूमस्यादर्शनाद् । एवमन्येऽपि हेतुदोषास्सन्ति । अतस्सद्धेतुनिरूपणानन्तरमसद्धेतवोऽप्यवश्यं निरूपयितव्याः । असद्धेतव एव हेत्वाभासा इत्युच्यन्ते" ।

तानेव हेत्वाभासान् सङ्कलय्य विभजते ग्रन्थकर्ता **सव्यभिचारे**त्यादिना-

## मूलम्

**सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः ।**

## विवरणम्

प्रसङ्गात् सद्हेतुनिरूपणानन्तरं प्रतिपक्षिणा प्रयुक्तहेतौ दोषोद्भावनाय स्वस्य प्रयोगे च दुष्टहेतोः निराकरणाय गौतमसूत्रक्रमानुरोधेन असद्धेतून् किंवा दुष्टहेतून् आह- **सव्यभिचारे**ति । हेत्वाभासाश्च सव्यभिचार-विरुद्ध-सत्प्रतिपक्ष-असिद्ध-बाधितभेदेन पञ्च सन्ति । यथाह सूत्रकारो गौतमः- **सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता हेत्वाभासाः ।**

सूत्रोक्तः प्रकरणसमः तर्कसङ्ग्रकारेण सत्प्रतिपक्षत्वेनोद्दिष्टः, साध्यसमश्च असिद्धत्वेन, कालातीतः पुनर्बाधत्वेनोक्त इति ज्ञेयम् । कारिकावलीकारेण विश्वनाथपञ्चाननेन हेत्वाभासा एवङ्क्रमेणोद्दिष्टाः-

**अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः ।**
**कालात्ययापदिष्टश्च हेत्वाभासाश्च पञ्चधा ॥**

अत्रादौ हेतुसामान्यलक्षणपुरस्सरं हेतुविशेषलक्षणं वितन्यते- सूत्रकारो गौतमो हेत्वाभासलक्षणं विनैव हेत्वाभासविभजनमकार्षीत् । भाष्यकारो वात्स्यायनस्तु हेत्वाभासविभाजकसूत्रपीठिकायां **हेतुलक्षणाभावादहेतवो हेतुसामान्याद् हेतुवदाभासमानाः** इत्यवोचत् । एतावता हेतोर्वस्तुगतलक्षणस्वरूपाभावेऽपि हेतुवद् भासिता एव हेत्वाभासा इति । वार्त्तिककारश्च वात्स्यायनमतमनुससार । तात्पर्यटीकाकारश्च पुनः ... **अहेतवो हेतुवदवभासन्त इति** ... एतादृशं वाक्यं वदन् तत् स्पष्टीकृतवान् । परिशुद्धिकार उदयनश्च तदेवानुचकार । भट्टजयन्तश्च **अहेतवो हेतुवदवभासमाना हेत्वाभासाः** इति भाषमाणोऽहेतुत्वेऽपि हेतुवद् आभासामाना एव हेत्वाभासा इति स्वविचारं प्रकटीचक्रे । प्राचीनधारामवलम्बमानोऽर्वाचीनो विद्वान् मिश्रकेशवश्च .... **हेतुवदाभासमाना हेत्वाभासा** इति व्याकुर्वन् भाष्यकारादिमतमवालम्बत । एतावता प्राचीनपद्धतौ दुष्टस्य लक्षणं कृतं लभ्यते । नवीनाश्च दोषस्य लक्षणमिति । तत्र गङ्गेशोपाध्यायेन दोषपरकं त्रितयं हेत्वाभासलक्षणं विहितम् । ततश्चाऽऽनन्तरकालिका विद्वांसश्च तदेवालम्बितवन्तः । तेषु त्रिषु लक्षणेषु **यद्विषयकत्वेन ज्ञानस्यानुमितितत्करणान्यतरप्रतिबन्धकत्वं तत्त्वम्** इत्याकारकं लक्षणं प्रायो विद्वांसो निष्कृष्टलक्षणत्वेन गृह्णन्ति । तदर्थश्च यद्विषयकं ज्ञानमनुमितिं तत्करणं व्याप्तिज्ञानं परामर्शं वा प्रतिबध्नाति, तदेव हेत्वाभासतत्त्वमिति । लक्षणसमन्वयश्चेत्थम्- 'पर्वतो वह्निमान् धूमात्, पर्वतो वह्न्यभाववान् जलादि'ति सत्प्रतिपक्षस्थले 'साध्याभावव्याप्यवान् पक्षः' इति दोषज्ञानेन 'साध्यवान् पक्ष'इत्याकारकानुमितिप्रतिबन्धो भवति, अतस्तादृशानुमितिप्रतिबन्धकं यथार्थज्ञानं 'साध्याभावव्याप्यवान् पक्षः' इत्याकारकम्, तद्विषयत्वं 'साध्याभावव्याप्यवान् पक्षः' इत्याकारके दोषे इति लक्षणसमन्वयः ।

दोषपरकोऽर्थो दुष्टपरको वार्थो भवतु, हेत्वाभासाश्च सव्यभिचार-विरुद्ध-प्रकरणसम(सत्प्रतिपक्ष)-साध्यसम(असिद्ध)-कालातीत(बाधित)भेदेन मूलतः पञ्चैव । तेषां भेदोपभेदैर्नैकान् हेत्वाभासान् परिगणयन्ति विद्वांसः । न्यायवार्त्तिककारश्च ... **कालपुरुषवस्तुभेदानुविधानेन अपरिसङ्ख्येयः । सामान्यतः साध्यवस्तूपग्रहेण हेतुहेत्वाभासभेदः प्रपञ्च्यमानः षट्सप्ततिशतम्** इत्यादिकमुक्त्वा षट्सप्ततिशतं (७६००) हेत्वाभासा भवन्तीति निर्दिदेश ।

तत्रोक्ताः पञ्च हेत्वाभासाः क्रमशोऽत्र विविच्यन्ते-

### (क) सव्यभिचारः

**मूलम्**

**सव्यभिचारोऽनैकान्तिकः । स त्रिविधः- साधारणासाधारणानुपसंहारिभेदात् ।**

**तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः । यथा 'पर्वतो वह्निमान् प्रमेयत्वाद्' इति । अत्र प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् ।**

**सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः। यथा 'शब्दो नित्यः शब्दत्वाद्' इति।** (अत्र) **शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्यभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति।**

**अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथा 'सर्वमनित्यं प्रमेयत्वाद्' इति। अत्र सर्वस्यापि पक्षत्वाद् दृष्टान्तो नास्ति।**

## विवरणम्

सव्यभिचारो नाम अनैकान्तिकः। एतन्नाम सव्यभिचारस्यैव अनैकान्तिक इति संज्ञान्तरम्। **व्यभिचारः = एकत्राव्यवस्थितिः** इति वात्स्यायनः। सह व्यभिचारेण वर्तत इति सव्यभिचारः। यथा 'पर्वतो धूमवान् वह्नेः' इत्यत्र हेतुभूतो वह्निर्न सद्हेतुरपितु सव्यभिचारो हेत्वाभासः। साध्यनिष्ठप्रतियोगितानिरूपकाभाववद्-वृत्तित्वं साधारणस्य लक्षणम्। अस्य च ज्ञानस्य तद्वत्ताबुद्धिं प्रति तदाभाववत्तानिश्चयमुद्रया पूर्वपक्षव्याप्तिज्ञानप्रतिबन्धकत्वम्। 'धूमवान् वह्नेः' इत्यत्र हेतुर्वह्निः। स वह्निर्यद्यपि धूमवति महानसादौ वर्तते एव, अथापि धूमाभाववति तप्तायःपिण्डादावपि वर्तते। एतावता वह्निरूपस्य हेतोः साध्यरूपधूमवत्तदभाववदित्येतदुभयत्र सत्त्वादयं हेतुः साध्यसाध्याभावसाधारणः। तेनान्यतरकोटिनिर्णयो न जायते। अतश्चायं दोषोऽनैकान्तिक इति। तथा च सभिव्यचारोऽनैकान्तिक इति उच्यमाने साधारणादीनां त्रयाणामनुगतं सामान्यलक्षणम्। ऐकान्तिको नामान्यतरकोटिनिर्णयावसानः। एक अन्ते वर्तते स एकान्तः। एकान्त एव ऐकान्तिकः। स्वार्थे ठक्। अत्र एको नाम निर्णयः सिद्धान्तो वा। अन्तश्चावसानम्। तथा च ऐकान्तिको नाम अन्यतरकोटिनिर्णयावसान इति। तद्विपरीतोऽनैकान्तिकः। निश्चये सति विचारस्यान्तो जायते- निश्चये जाते सति न विचारो वर्द्धते।

इत्थमपि व्याख्यातं लभ्यते- एकस्मिन् अन्ते निश्चयो नियत ऐकान्तिकः। तद्विपरीतोऽनैकान्तिकः। अन्तो नाम सिद्धान्तः। एतन्नाम यो हेतुरेकम्मिन् सिद्धान्ते नियतो वर्तते, स ऐकान्तिकः, न ऐकान्तिक इति अनैकान्तिकः। स एव सव्यभिचार इति।

कृष्णवल्लाभाचार्यश्चेत्थं व्याख्याति- एकः=साध्यमेव अन्तः= नियामकः=नियमस्य व्याप्त्यात्मकस्य निरूपको यस्य स एकान्तः, स एव ऐकान्तिकः, स्वार्थे ठक्, साध्यनिरूपितव्याप्तिमानित्यर्थः, न ऐकान्तिक इत्यनैकान्तिकः, साध्यनिरूपितव्याप्तिग्रहप्रतिबन्धकग्रहविषयविशिष्ट इत्यर्थः, व्यचिभारीति यावत्। तस्य च साधारणद्यन्यतमत्वं लक्षणं बोध्यम्।

सव्यभिचारस्त्रिविधः साधारणासाधारणानुपसंहारिभेदात्। तत्र साधारणः साध्याभाववद्वृत्तिः । यथा 'पर्वतो धूमवान् वह्ने'रित्यत्र धूमाभाववद्वृत्तिर्वह्निरिति व्यभिचारो दोषः। अयमेव साधारणः। एतस्य साधारणव्यभिचारस्य ज्ञानेन साक्षाद् व्याप्तिज्ञानं प्रतिबध्यते व्याप्तिज्ञानानुत्पत्तौ च परामर्शाभावादनुमितिरपि नोत्पद्यत इति परम्परयाऽनुमितिप्रतिबन्धकयथार्थज्ञानविषयः साधारणव्यभिचारो दोषः। सव्यभिचारपदस्य साधारणादित्रयसाधारणत्वेऽप्ययमेव 'सव्यभिचारः=व्यभिचारी' इति बहुलं व्यपदिश्यते। उपर्युक्ते व्यभिचारसामान्यलक्षणेऽपि तथैव जातम्। त्रिषु वर्तमानस्यैकस्य व्यावर्तकलक्षणस्याप्राप्तेः।

असाधारणः- सद्हेतुर्हि पक्षवृत्तिः, सपक्षवृत्तिः, विपक्षावृत्तिरपेक्षितः परं सर्वसपक्षविपक्षेभ्यो व्यावृत्तः पक्षमात्रवृत्तिस्तु हेत्वाभासो भवति । एतन्नाम सर्वेभ्यः सपक्षेभ्यः, सर्वेभ्यो विपक्षेभ्यश्च व्यावृत्तः पक्षमात्रवृत्तिरसाधारण इति । यथा 'शब्दो नित्यः शब्दत्वादि'त्यत्र पक्षीभूते शब्दे साध्यं नित्यत्वम् । हेतुश्च शब्दत्वम् । तच्च शब्दत्वं सर्वेषु नित्यत्ववत्सु सपक्षीभूतेषु अथ च सर्वेषु चानित्यत्ववत्सु विपक्षीभूतेषु नास्ति, अपितु पक्षीभूते शब्दे एव वर्तते । अतोऽयं शब्दत्वरूपो हेतुरसाधारणोऽनैकान्तिक इति ।

अनुपसंहारी- यत्र अन्वयदृष्टान्तोऽपि नास्ति व्यतिरेकदृष्टान्तोऽपि नास्ति, सोऽनुपसंहारी । 'सर्वमनित्यं प्रमेयत्वादि'त्यत्र पक्षीभूतं सर्वं वर्तते । साध्यञ्च अनित्यत्वम्, हेतुर्हि प्रमेयत्वम् । तत्र सर्वपदेन अशेषस्य पक्षत्वात् सपक्षविपक्षाभावाद् दृष्टान्ताभावः । दृष्टान्ताभावाच्चायं हेतुः सव्यभिचारः । यश्चानुपसंहारी व्यभिचारीति ॥

### (ख) विरुद्धः

#### मूलम्

**साध्याभावव्याप्तो हेतुर्विरुद्धः । यथा शब्दो नित्यः कृतकत्वाद्, घटवदिति ।** (अत्र) **कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तम् ।**

#### विवरणम्

द्वितीयो हेत्वाभासो विरुद्धः । साध्याभावस्य व्याप्तो हेतुर्विरुद्धो भवति । यो हेतुः नियमेन साध्याभावाधिकरणे एव तिष्ठति न कदापि साध्याधिकरणे तिष्ठति, एवँल्लक्षणयुक्तो हेतुर्विरुद्ध इति । यथा 'शब्दः नित्यः कृतत्वाद्' इत्यत्र साध्यं नित्यत्वम् । हेतुश्च कृतकत्वम् । यत्र यत्र कृतकत्वं तत्र तत्र न नित्यत्वमपितु नित्यत्वाभावः । अथ च 'यत्र यत्र नित्यत्वं तत्र तत्र न कृतकत्वमपितु कृतकत्वाभावः', प्रत्युत यत्र यत्र नित्यत्वाभावस्तत्र तत्र कृतकत्वम् । एतावता साध्याभावेन (नित्यत्वाभावेन) कृतकत्वं व्याप्तं भवति । अत उपर्युक्ते अनुमानाकारे प्रयुक्तः कृतकत्वहेतुर्विरुद्धो हेत्वाभासः । उक्तञ्च- साध्याभावव्याप्तो हेतुर्विरुद्ध इति । अत्र सद्धेतुवारणाय साध्याभावव्याप्त इति । एतन्नाम साध्याभावव्याप्त इति दलेऽनुक्ते 'हेतुर्विरुद्धः' इत्येतादृशं लक्षणं जायते, तथा सति सद्धेतौ अतिव्याप्तिर्जायते । अतः साध्याभावव्याप्त इति । अथ च असम्भववारणाय व्याप्तेति । एतन्नाम 'साध्याभावो हेतुर्विरुद्धः' इत्युक्ते सति असम्भवो जायते । यतो हि साध्याभावो हेतुरेव न भवति, अतो दोषस्य का कथा । परिष्कृतलक्षणन्तु- साध्याभावव्यापकीभूताभावप्रतियोगी हेतुर्विरुद्धः ।

सूत्रकारो गौतमश्चेत्थं सूत्रयति- **सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ।** भावोऽयम्- यस्य कस्यचित् पदार्थस्य स्वीकृतिं विधाय तद्विरुद्धीभूतपदार्थस्य हेतुतया ग्रहणे विरुद्धनामको हेत्वभासो भवतीति । यथा उपरितने उदाहरणे शब्दस्य नित्यत्वं स्वीकृत्य तद्विरोधी कृतकत्वहेतुः विरुद्धो भवति ।

### (ग) सत्प्रतिपक्षः

#### मूलम्

**यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते, स सत्प्रतिपक्षः । यथा 'शब्दो नित्यः श्रावणत्वाच्छब्दत्ववद्' इति, 'शब्दोऽनित्यः कार्यत्वाद् घटवद्' इति ।**

#### विवरणम्

'सन् प्रतिपक्षो = विरोधी यस्य सः' इति विग्रहे सत्प्रतिपक्षशब्दस्य दुष्टपरत्वम् । 'सँश्चासौ प्रतिपक्षश्चे'ति विग्रहे दोषपरत्वम् । वादिप्रतिवादिनोश्चर्चायाः 'कथा' इति संज्ञा । तत्र वादी स्वपक्षसाधनाय 'शब्दो नित्यः श्रावणत्वात् शब्दत्ववद्' इति प्रयुङ्क्ते । तदा अभ्रान्तोऽप्यन्यो जनः श्रावणत्वहेतुना शब्दे नित्यत्वं साधयितुं न शक्यमिति जानन्नपि प्रतिपक्षिप्रयुक्तश्रावणत्वहेतौ दोषोद्भावनाय शब्देऽनित्यत्वसाधनाय च हेत्वन्तरं कार्यत्वं प्रयुङ्क्ते । प्रथमः श्रावणत्वहेतुः सत्प्रतिपक्षः । एवञ्च 'साध्याभावव्याप्यप्रतिहेतुमत्पक्षकः सत्प्रतिपक्षः' इति फलितम् । इदञ्च दुष्टहेतुलक्षणम् । दोषलक्षणन्तु साध्याभावव्याप्यवत्पक्षत्वम् ।

अक्षरार्थस्तु पदकृत्यकारेण सम्यग् विहितः- **यस्य- हेतोः साध्याभावसाधकम्- साध्याभावस्य अनुमापकम् । हेत्वन्तरं प्रतिपक्षो हेतुः विद्यते, स हेतुः सत्प्रतिपक्ष इत्यर्थः ।** यथा एकेन 'शब्दो नित्यः श्रावणत्वाद्' इत्यत्र श्रावणत्वहेतुना शब्दे नित्यत्वे साध्ये सति तत्रैवेतरेण 'शब्दोऽनित्यः कार्यत्वाद्' इति अनुमानाकारं प्रयुञ्जानेन साध्याभावसाधकम् = अनित्यत्वसाधकम् 'कार्यत्वम्' इति हेत्वन्तरं प्रयुक्तमतः श्रावणत्वमपेक्ष्य कार्यत्वहेतुः सत्प्रतिपक्षः, अथ च कार्यत्वमपेक्ष्य श्रावणत्वहेतुः सत्प्रतिपक्ष इति ।

### (घ) असिद्धः

पक्षहेत्वादीनां स्वरूपस्यैवासिद्ध्या व्याप्तेरप्यसम्भावादेषामसिद्ध इति नाम । तर्कसङ्ग्रहकारेण असिद्धसामान्यस्य लक्षणं नोक्तम् । सूत्रकारो गौतमश्च पुनरसिद्धस्य कृते साध्यसमपदं प्रयुङ्क्ते- **साध्याविशिष्टः साध्यत्वात् साध्यसमः ।** अर्थाद् यथा साध्यः पक्षे सन्दिग्धत्वेनानुमानकालेऽसिद्धः = साध्यो भवति, तथैव हेतुरपि पक्षेऽवर्तमानः सन् सन्दिग्धत्वेनाप्रसिद्धत्वेन वा पक्षेऽसिद्धः = साध्यो भवति । सूत्रस्थं 'साध्याविशिष्टः' पदं व्याख्यायन् भाष्यकारो व्याचष्टे- **साध्येनाविशिष्टः साधनीयत्वादिति ।** यथा- 'छाया द्रव्यं गतिमत्त्वादि'त्यत्र गतिमत्त्वं असिद्धः हेत्वाभासः । यतो हि अत्र पक्षः छाया । तत्र द्रव्यत्वसाधनार्थं गतिमत्त्वं हेतुरुपात्तो वर्तते । परं यथा छायायां द्रव्यत्वं साध्यं, तथैव तत्र गतिमत्त्वमपि साध्यमेव । अतोऽयं साध्यसमो हेत्वाभास इति । साध्यसमञ्च नव्या असिद्धत्वेन व्यवहरन्ति ।

तर्कसङ्ग्रहकारेण असिद्धलक्षणस्यानुक्तत्वेऽपि पदकृत्यकारश्चन्दजसिंहः **आश्रयासिद्ध्याद्यन्यतमत्त्वमसिद्धत्वम्** इति असिद्धसामान्यलक्षणमवादीत् ।

तर्कसङ्ग्रहकारोऽन्नम्भट्टोऽसिद्धं विभजते-

**मूलम्**

**असिद्धस्त्रिविधः- आश्रयासिद्धः, स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति ।**

**विवरणम्**

उपर्युक्तरीत्या लक्षितोऽसिद्धहेत्वाभास आश्रयस्वरूपव्याप्यत्वभेदेन त्रिधा विभज्यते ।

(अ) **आश्रयासिद्धः**

क्रमप्राप्त्या आदौ आश्रयासिद्धहेत्वाभासं विवृणोति-

**मूलम्**

**आश्रयासिद्धो यथा- 'गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्' । अत्र गगनारविन्दमाश्रयः, स च नास्त्येव ।**

**विवरणम्**

आश्रयो नाम पक्षः । स एव यस्य हेतोरसिद्धः स हेतुराश्रयासिद्धः । एतन्नाम आश्रयस्य प्रकृतहेत्वाश्रयपक्षस्याभाव इति । यथा 'गगनारविन्दं सुरभ्यरविन्दत्वात्' । एवमेव 'काञ्चनमयपर्वतो वह्निमान् धूमाद्' इति । अत्र क्रमशो गगनारविन्दं काञ्चनमयपर्वतश्च आश्रयौ । तयोरभाव एव ।

पक्षतावच्छेदकाभाववत्पक्षकत्वम् आश्रयासिद्धस्य लक्षणम् । पक्षे यद् विशेषणं तत् पक्षतावच्छेदकमित्युच्यते । गगनसम्बन्धः काञ्चनमयत्वञ्चोक्तस्थले पक्षतावच्छेदकम् । यद्यप्यरविन्दत्वं पर्वतत्वञ्च धर्मितावच्छेदकविधया पक्षे विशेषणत्वात् पक्षतावच्छेदकमेव । तच्च विशेष्येऽरविन्दे पर्वते च वर्तते, अथापि विशेषणान्तरस्य गगनसम्बन्धस्य काञ्चनमयत्वस्य च विशेष्येऽभावाद् विशिष्टस्यैव पक्षत्वादप्रसिद्धिर्भवत्येवेति दोष एव ।

(आ) **स्वरूपासिद्धः**

क्रमप्राप्त्या स्वरूपासिद्धहेत्वाभासं विवृणोति-

**मूलम्**

**स्वरूपासिद्धो यथा- 'शब्दो गुणश्चाक्षुषत्वात्' । अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात् ।**

### विवरणम्

स्वरूपेण हेतुरसिद्ध एव स्वरूपासिद्धः । दोषदृष्ट्या इत्थञ्च वक्तुं शक्यम्- पक्षे हेत्वभावः किंवा हेत्वभाववत्पक्षः स्वरूपासिद्धिः । 'शब्दो गुणश्चाक्षुषत्वादि'त्यत्र पक्षः शब्दः तत्र गुणत्वं साध्यम् । शब्दे गुणत्वसाधनार्थं चाक्षुषत्वहेतुः प्रयुक्तः । शब्दस्य श्रावणत्वाच्चाक्षुषत्वं नास्ति । अतोऽत्र चाक्षुषत्वहेतुः स्वरूपेणासिद्धः । अतः स्वरूपासिद्धः । स्वरूपासिद्धश्च शुद्धासिद्धभागासिद्धविशेषणासिद्धविशेष्यासिद्धभेदेन चतुर्विधः ।

**(इ) व्याप्यत्वासिद्धः**

क्रमप्राप्त्या व्याप्यत्वासिद्धहेत्वाभासं विवृणोति-

### मूलम्

**सोपाधिको हेतुर्व्याप्यत्वासिद्धः । साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः । साध्यसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगित्वं साध्यव्यापकत्वम् । साधनवन्निष्ठाऽत्यन्ताभावप्रतियोगित्वं साधनाऽव्यापकत्वम् । यथा- 'पर्वतो धूमवान् वह्निमत्त्वाद्' इत्यत्राऽऽर्द्रेन्धनसंयोग उपाधिः । तथाहि- यत्र धूमस्तत्राऽऽर्द्रेन्धनसंयोग इति साध्यव्यापकता । यत्र वह्निस्तत्राऽऽर्द्रेन्धनसंयोगो नास्ति, अयोगोलके आर्द्रेन्धनसंयोगाभावादिति साधनाव्यापकता । एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वाद् आर्द्रेन्धनसंयोग उपाधिः । सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम् ।**

### विवरणम्

सोपाधिकः उपाधिसहितः । तादृशो हेतुर्व्याप्यत्वासिद्धः । व्याप्यो नाम व्याप्यत्वाश्रयः । व्याप्यत्वञ्च व्याप्तिः । व्याप्तेरसिद्धिरित्यर्थः । तत्र उपाधिश्च पुनः साध्यव्यापकत्वे सति साधनाव्यापकत्वम् । एतन्नाम साध्यस्य व्यापकः, साधनस्य च अव्यापकः (व्याप्यः) एवोपाधिः । यथा 'धूमवान् वह्नेरि'त्यत्र साध्यो धूमः साधनञ्च वह्निः । वह्निसत्त्वे द्विविधा स्थितिर्दृश्यते- एकत्र धूमसत्त्वम्, अन्यत्र च धूमाभावः । यथा महानसचत्वरादौ वह्निसत्त्वे धूमसत्त्वम्, अयोगोलकादौ वह्निसत्त्वेऽपि धूमाभावः । तत्र वह्निसत्त्वे एकत्र किमर्थं धूमोऽन्यत्र च किमर्थं नास्ति इति चेद् एकत्र सहयोगिसत्त्वाद्, अन्यत्र च सहयोगिनोऽभावादिति- महानसचत्वरादौ सहयोगिसत्त्वाद् अयोगोलकादौ सहयोगिनोऽभावात् । तत्र महानसचत्वरादौ वह्निसत्त्वे धूमसत्त्वार्थं न केवलं वह्निरेव हेतुरपितु तत्र आर्द्रेन्धनसंयोगश्च हेतुरिति- सहयोगी इति यावत् । तत्र वह्निना सह आर्द्रेन्धनसंयोगस्य सहयोगे लब्धे सति धूमो जायते, स आर्द्रेन्धनसंयोगः (सहयोगी) एव उपाधिः । स च साध्यव्यापकः, साधनस्य च अव्यापकः (व्याप्यः) । 'महानसचत्वरगोष्ठादिकं धूमवद् वह्नेः' इत्यत्र पक्षो महानसादिकम् । एवमेव साध्यो धूमः, हेतुश्च वह्निः । यत्र यत्र धूमो भवति तत्र यथा वह्निर्भवति, तथैव अवश्यमपि आर्द्रेन्धनसंयोगोऽपि भवत्येव, आर्द्रेन्धनसंयोगाभावे धूमाभावात् । एतावता यथा धूमो वह्नेर्व्याप्यस्तथैव आर्द्रेन्धनसंयोगस्यापि व्याप्य इति । तावता च साध्यनिरूपितम्=धूमनिरूपितं प्यापकत्वमार्द्रेन्धनसंयोगे सिद्ध्यति । एवमेव यत्र वह्निस्तत्र आर्द्रेन्धनसंयोगो नास्ति, यथा अयोगोलके । तावता च आर्द्रेन्धनसंयोगो वह्निरूपस्य साधनस्य

अव्यापकः सिद्ध्यति । तथा च सुतरां वह्नौ आर्द्रेन्धनसंयोगाव्याप्यत्वं सिद्धम् । एतावता साध्यव्यापकत्वे सति साधनस्याव्यापकत्वादार्द्रेन्धनसंयोग उपाधिः । तदुपाधिवशादेव धूमार्थं वह्निर्हेतुर्जातः । एतन्नाम सोपाधिना वह्निना एव धूमः साध्यते, न तु निरुपाधिना वह्निना । यो हि सोपाधिर्हेतुर्भवति, न स सद्धेतुरपितु व्याप्यत्वासिद्धो हेत्वाभास इति ।

**साध्यव्यापकत्वसाधानाव्यापकत्वविचारः**

(क) **साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्यापकत्वम्–**

साध्यस्य समानमधिकरणं यस्य अत्यन्ताभावस्य स साध्यसमानाधिकरणात्यन्ताभावः । यथा 'महानसादिकं धूमवद् वह्ने'रित्यत्र साध्यो धूमः । तस्य अधिकरणं महानसादिकम् । तत्रस्थोऽत्यन्ताभावो नार्द्रेन्धनसंयोगस्यापितु घटादेः । तथा च घटाद्यत्यन्ताभावस्य प्रतियोगी घटः । प्रतियोगित्वं घटे अप्रतियोगित्वञ्चार्द्रेन्धनसंयोगेऽतः प्रस्तुतप्रसङ्गे साध्यव्यापकः (धूमव्यापकः) आर्द्रेन्धनसंयोगः ।

(ख) **साधनवन्निष्ठाऽत्यन्ताभावप्रतियोगित्वं साधनाऽव्यापकत्वम्–**

प्रस्तुते 'धूमवान् वह्नेः' इत्यनुमानाकारे हेतुर्वह्निः । हेतुमच्च यथा महानसादिकन्तथैव तप्तायोगोलकमपि । एतावता साधनवत्तप्तायोगोलकम् । तन्निष्ठोऽत्यन्ताभावः आर्द्रेन्धनसंयोगस्य । तथात्यन्ताभावस्य प्रतियोगी आर्द्रेन्धनसंयोगः । तत्र प्रतियोगित्वं सिद्धमतस्तदेव साधनाव्यापकत्वमिति ।

### (ङ) बाधितः

#### मूलम्

**यस्य साध्याभावः प्रमाणान्तरेण पक्षे निश्चितः, स बाधितः । यथा 'वह्निरनुष्णो द्रव्यत्वाद्' इति । अत्रानुष्णत्वं साध्यम्, तदभाव उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यते इति बाधितत्वम् ।**

#### विवरणम्

यस्य हेतोः साध्यस्याभावः पक्षे प्रत्यक्षादिना प्रमाणान्तरेण निश्चतः स हेतुर्बाधितः । तथा च 'साध्याभाववत्पक्षो बाधः' इति बाधदोषस्य लक्षणम् । तादृशपक्षकत्वादुक्तो हेतुर्बाधित इति । यथा 'ह्रदो वह्निमान्' इत्यत्र 'वह्न्यभाववद्ध्रदः' इति बाधः । ह्रदे वह्न्यभावः प्रत्यक्षसिद्धः । एवमेव 'वह्निरनुष्णो द्रव्यत्वाद्' इत्यत्र 'वह्निरुष्णः' इति बाधः । वह्नेरुष्णत्वस्य स्पार्शनप्रत्यक्षेण गृह्यमाणत्वादिति ।

बाधितस्य कृते सूत्रकारः कालातीतपदं प्रयुङ्क्ते- **कालात्ययापदिष्टः कालातीतः ।** तदर्थं कुर्वन् भाष्यकारो वक्ति- **कालात्ययेन युक्तो यस्यार्थस्यैकदेशोऽपदिश्यमानस्य स कालात्ययापदिष्टः 'कालातीतः' इत्युच्यते ।** एतन्नाम अपदिश्यमानस्य यस्यार्थस्य हेतोरेकदेशः कालात्ययेन युक्तो भवति किंवा अवर्तमानो भवति, स

हेतुः कालात्ययापदिष्ट इति । यथा 'शब्दो नित्यः संयोगव्यङ्ग्यत्वात् किंवा भेरीदण्डसंयोगव्यङ्ग्यत्वाद्' इत्यत्र हेतोः घटकद्वयं वर्तते- भेरीदण्डसंयोगः व्यङ्ग्यत्वञ्च । यदा शब्दो गृह्यमाणो भवति, तदा शब्दे भेदीदण्डादिसंयोगो नास्ति, अतीतकालत्वात् । अतो संयोगव्यङ्ग्यत्वहेतुः कालात्ययापदिष्ट इति ॥

एवं दुष्टहेतूनां स्वरूपेऽवगते एभिर्हेतुभिः (असद्धेतुभिः) अनुमितिर्न जायते ।

## पदानामर्थपरिचयः

| | | |
|---|---|---|
| हेत्वाभासः | = | असद्धेतुः/दुष्टो हेतुः/हेतुदोषः । |
| साङ्गा | = | अङ्गसहिता । |
| निरूपिता | = | व्याख्याता/निरुक्ता । |
| वैकल्यम् | = | राहित्यम्/अभावः । |
| वितन्यते | = | व्याख्यायते/विश्लिष्यते । |
| प्राचीनधारा | = | प्राचीननैयायिकानां सरणी । |
| नवीनाः | = | नव्याः । |
| प्रतिबन्धः | = | निरोधः/अवरोधः । |
| प्रतिबन्धकः | = | निरोधकः/अवरोधकः । |
| निष्ठः | = | स्थितः । |
| अन्यतरकोटिनिर्णयावसानः | = | एकस्मिन् पक्षे निर्णयेन/निर्णयस्य अन्तः । |
| बहुलम् | = | बहुशः/भूरिशः । |
| व्यावृत्तः | = | पृथक्कृतः/भेदीकृतः/भिन्नः । |
| कृतकत्वम् | = | अनित्यत्वम् । |
| कार्यत्वम् | = | जन्यत्वम् । |
| वादी | = | प्रथममतावलम्बी । |
| श्रावणत्वम् | = | श्रोत्रविषयत्वम् । |
| अक्षरार्थः | = | अक्षरशोऽर्थः/पदशोऽर्थः । |
| उपात्तः | = | गृहीतः । |
| लक्षितः | = | लक्षणविषयीभूतः । |
| प्रकृतः | = | प्रस्तुतः । |
| गगनारविन्दम् | = | आकाशकमलम् । |
| काञ्चनमयम् | = | स्वर्णमयम् । |

| | | |
|---|---|---|
| चाक्षुषत्वम् | = | नयनविषयत्वम् । |
| उपाधिः | = | उप आधीयतेऽनेन (स्वस्मिन् विद्यमानं विशेषं स्वसन्निहिते वस्तुनि आरोपयितुं समर्थं वस्तूपाधिरिच्युते) । |
| व्यापकः | = | तद्वन्निष्ठात्यन्ताभावाप्रतियोगी । |
| अव्यापकः | = | तद्वन्निष्ठात्यन्ताभावप्रतियोगी । |
| व्याप्यः | = | तदभाववदवृत्तिः । |
| महानसम् | = | पाकशाला । |
| चत्वरः | = | चतुरङ्गणम् । |
| तप्तायोगोलकम् | = | तप्तो लौहपिण्डः । |

## अभ्यासः

### १. विवेचनात्मकमुत्तरं देयम्

(क) हेत्वाभासं परिचाय्य सभेदः सव्यभिचारो निरूप्यताम् ।

(ख) विरुद्धसत्प्रतिपक्षौ साधु विवेच्यौ ।

(ग) सभेदोऽसिद्धो विविच्यताम् ।

### २. वर्णनात्मकमुत्तरं देयम् ।

(क) धूमसाध्यत्वे वह्निर्हेतुः साधारणोऽसाधारणो वा सव्यभिचारः ? कथञ्चेति स्पष्टीक्रियताम् ।

(ख) उपाधिः साधु निरूप्यताम् ।

(ग) बाधितहेत्वाभासस्वरूपं प्रकाश्यताम् ।

### ३. अतिसङ्क्षिप्तमुत्तरं देयम्

(क) वार्त्तिककारेण कति हेत्वभासाः परिगणिताः ?

(ख) प्रसिद्धा हेत्वभासाः कति सन्ति ? के च ते ?

(ग) प्रथमः हेत्वाभासः कः ?

(घ) अनुपसंहारिस्वरूपं किम् ?

(ङ) विरुद्धलक्षणं किम् ?

(च) सत्प्रतिपक्षस्य लक्षणं किम् ?

(छ) असिद्धः कतिविधः ?

(ज) किंस्वरूपकं साध्यव्यापकत्वम् ?

(झ) साधनाव्यापकत्वञ्च किम् ?

(ञ) दुष्टहेतूनां स्वरूपेऽवगते किं न जायते ?

## ४. कक्षाभ्यासः/गृहाभ्यासः

(क) हेत्वाभासलक्षणविषये कक्षायां सतीर्थ्यैः सह विमर्शो विधीयताम् ।

(ख) सव्यभिचारहेत्वाभासम् आदाय गुरुणा सतीर्थ्यैश्च सह संवादो विधेयः ।

(ग) विरुद्धहेत्वाभासविषये एकं लेखं विरचय्य गुरवे प्रदर्श्यताम् ।

(घ) सत्प्रतिपक्षहेत्वाभासमादाय कक्षायां मित्रैः सह प्रश्नोत्तरकार्यं विधेयम् ।

(ङ) भेदपुरस्सरम् असिद्धहेत्वाभासविषये कक्षायां गुरुणा सतीर्थ्यैश्च सह संवादो विधेयः ।

(च) उपाधिविषयकमनुच्छेदद्वयं लेख्यम् ।

(छ) बाधितहेत्वाभासमादाय अनुच्छेदद्वयं लेख्यम् ।

# उपमानशब्दप्रमाणे

ग्रन्थकृदन्नम्भट्टोऽनुमानप्रमाणानन्तरं क्रमप्राप्तमुपमानप्रमाणनिरूपणमारभते-

## मूलम्

**उपमितिकरणमुपमानम् । संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः । तत्करणं सादृश्यज्ञानम् । अतिदेशवाक्यार्थस्मरणमवान्तरव्यापारः । तथाहि- कश्चिद् गवयपदार्थमजानन् कुतश्चिदारण्यकपुरुषाद् 'गोसदृशो गवयः' इति श्रुत्वा वनं गतो गोसदृशं पिण्डं पश्यन् वाक्यार्थं स्मरति, तदनन्तरम् 'असौ गवयशब्दवाच्यः' इत्युपमितिरुत्पद्यते ।**

## विवरणम्

अवसरप्राप्तम् उपमानप्रमाणं निरूपयति- **उपमिती**ति । उपमितिनिरूपितकरणत्वमुपमानस्य लक्षणम् । तत्र च सूत्रकारः- **प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ।** तदर्थकृद्भाष्यकारश्च **प्रज्ञातेन सामान्यात् प्रज्ञापनीयस्य प्रज्ञापनमुपमानमिति ।** यथा गवयपदार्थमजानन् कश्चित् पुरुषः कस्माच्चन आरण्यकाद् गवयज्ञात् पुरुषाद् 'गोसदृशो गवयः' इति वचनं श्रुत्वा अनन्तरं कुत्रचन अरण्यादौ गोसदृशपिण्डं पश्यति, तदनन्तरमारण्यकवचनं स्मृत्वा 'अयं गवयपदवाच्यः' इति तस्य ज्ञानं जायते । तदेवोपमितिः । उपमितेरभिलापकं वाक्यम्- **संज्ञासंज्ञिसम्बन्धज्ञान**मिति । यतो हि गवयमजानता पुरुषेण आरण्यकाद् गवयज्ञात् कस्माच्चन पुरुषाद् 'गवयो गोदृशो भवति' इति पदं श्रुतं भवति । तच्च संज्ञाज्ञानम् । ततो यदा तेन अरण्यादौ गवयपदार्थो दृष्टो भवति, तदा आदौ अतिदेशवाक्यार्थस्मरणं तस्य जायते । ततः 'मया यदपि गवय इति पदं ज्ञातमासीत्, तस्य वाच्योऽयं पुरतो दृश्यमानो गोसदृशः प्राणी' इति ज्ञानं तस्य जायते । एतदेव ज्ञानं संज्ञासंज्ञिसम्बन्धज्ञानमिति । तत्करणमुपमानम् । परिष्कृतलक्षणन्तु उपमितिनिरूपितकरणत्वमुपमानत्वम् । उपमितित्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वे सति उपमितिजनकव्यापारजनकत्वमिति यावत् । 'अयं (दृश्यमानः) प्राणी गवयपदवाच्यः' इत्यत्र लक्षणसमन्वयप्रकारश्चेत्थम्- उपमितित्वावच्छिन्ना या 'अयं प्राणी गवयपदवाच्यः' इत्याकारकगवयत्वावच्छिन्नविशेष्यकगवयपदवाच्यत्वप्रकारकोपमितौ विद्यमाना कार्यता, तन्निरूपिता 'अयं प्राणी (दृश्यमानः, यः गोसदृशः) गवयपदवाच्यः' इत्याकारकगोसदृशत्वावच्छिन्नविशेष्यकगवयपदवाच्यत्वप्रकारकज्ञानात्मकोपमाननिष्ठा कारणता, तदाश्रयत्वस्य, गोसदृशो गवय इत्याकारकातिदेशवाक्यार्थविषयकस्मरणरूपव्यापारजनकत्वस्य च 'अयं प्राणी (गोसदृशः) गवयपदवाच्य' इत्याकारकातिदेशवाक्यार्थज्ञानरूपोपमाने सत्त्वमिति । तथा च 'अयं प्राणी (गोसदृशः) गवयपदवाच्यः' इति ज्ञानमुपमानफलम्=उपमितिः । 'गोसदृशो गवयः' इति वृद्धवाक्यार्थस्मरणं व्यापारः । गवये गोसादृश्यज्ञानमुपमानमिति विवेकः ॥

उपमानप्रमाणानन्तरं ग्रन्थकृदन्नम्भट्टः क्रमप्राप्तं शब्दप्रमाणनिरूपणमारभते-

## मूलम्

**आप्तवाक्यं शब्दः ।**

## विवरणम्

क्रमप्राप्तं शब्दप्रमाणं निरूपयति- **आप्तवाक्यमि**ति। शब्दप्रमाणं किमित्यत्र न ध्वनिः। केवलं ध्वनिना न कस्यापि शाब्दप्रमाया जन्यत्वात्। न वा वर्णः, तस्यापि तथैव स्थितेः। न वा केवलं शब्दः, तस्यापि शाब्दबोधजनकत्वाभावात्। अनाप्तवाक्यमपि न शब्दप्रमाणम्। तादृशस्य वाक्यस्य शाब्दप्रमाकरणत्वरहितत्वात्। तर्हि किं शब्दप्रमाणमित्यत्र सूत्रकारो गौतममुनिः **आप्तोपदेशः शब्दः ।** तदेवानुवदति तर्कसङ्ग्रहकारः- **आप्तवाक्यं शब्दः ।** तथा च आप्तप्रयुक्तत्वे सति वाक्यत्वं शब्दप्रमाणत्वम्। तेनाप्तोक्तेन वचनेन यज्ज्ञानं जायते तच्छाब्दज्ञानम्, तत्करणं शब्दप्रमाणम्। तच्च दृष्टादृष्टभेदेन द्विविधम्। तथा चाह सूत्रकारः- **स द्विविधो दृष्टादृष्टार्थत्वात् ॥**

'आप्तवाक्यं शब्दः' इत्यत्र घटकत्वेन आप्तपदमागतम्। अतोऽत्र कोऽयमाप्तः ? इति जिज्ञासां परिहर्तुं ग्रन्थकृदाह-

## मूलम्

**आप्तस्तु यथार्थवक्ता ।**

शब्दलक्षणं वदता तर्कसङ्ग्रहकारेण 'आप्तवाक्यं शब्दः' इत्युक्तं वर्तते। तत्र आप्तस्य वाक्यमिति विग्रहः। तावता आप्तवाक्यम् इत्यत्र घटकीभूतमाप्तपदं व्याकुर्वन् अन्नम्भट्टः 'आप्तस्तु यथार्थवक्ता' इत्यवोचत्। तत्र आप्तो नाम न केवलं मित्रम्। किंवा न यथार्थज्ञानयुक्तो जनः। कदाचन कामक्रोधलोभादिवशात् तदुक्तेश्च अयथार्थत्वसम्भवात्। कस्तर्हि आप्तः ? इत्यत्रोच्यते आप्तश्च यथार्थवक्ता। तस्योपदेश एव शब्दः। ननु सदैवाप्तत्वं कुत्रापि कस्मिन्नपि नैव प्राप्यते कादाचित्केन आप्तत्वेन प्रायशोऽयथार्थज्ञानं भवति, अतो नैव तत्प्रमाणलक्ष्यमुचितमिति चेत्, सत्यम्। परं कश्चन जनो यदा सत्यं वक्ति तदैव तस्मिन् आप्तत्वम् एवञ्च तेनोक्तं वाक्यं प्रामाणिकम्। एवमेवात्र इदमप्यवधार्यम्- यत्र स्वयं भ्रान्तोऽपि तदजानन्नेव सत्यं मत्वा वक्ति, तदा स नाप्तः। अतो ज्ञात्वा यथार्थवक्ता एव आप्त इति। एतावता सर्वत्र आर्यम्लेच्छादिषु चाप्तत्वं समानरूपेण स्थातुं शक्नोति, फलतः सर्वे यथार्थवक्तार आप्ता भवितुं शक्नुवन्ति। यथाह भट्टजयन्तः-

**चिख्यापयिषया युक्त इत्युक्ता वीतरागता ।**
**उपदेष्टेत्यनेनोक्तं प्रतिपादनकौशलम् ॥**

**तस्य च प्रतिपाद्येऽर्थे वीतरागत्वमिष्यते ।**
**सर्वथा वीतरागस्तु पुरुषः कुत्र लभ्यते ॥**
**ऋष्यार्यम्लेच्छसामान्यं वक्तव्यं चाप्तलक्षणम् ।**
**एवं हि लोकेऽप्याप्तोक्त्या व्यवहारो न नङ्क्ष्यति ॥**

भाष्यकारो वात्स्यायनश्च **आप्तः खलु साक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा, साक्षात्करणमर्थस्याऽऽप्तिः, तया प्रवर्तते इत्याप्तः । ऋष्यार्यम्लेच्छानां समानं लक्षणं तथा च सर्वेषां व्यवहाराः प्रवर्तन्ते** इत्याह ।

ननु तदापि आप्तत्वे ज्ञाते सत्येव यथार्थत्वं ज्ञायते, यथार्थत्वे ज्ञाते सत्येव आप्तत्वं ज्ञायते इत्येतादृशान्योन्याश्रयदोष एवेति चेदपि सत्यं, परन्तु आप्तश्चासौ उपदेश इत्येतादृशे समासे कृते उक्तो दोषो निवर्तते ॥

'आप्तवाक्यं शब्दः' इति घटकीभूतमाप्तपदं विविच्य **वाक्यमि**त्यादिना वाक्यपदं विवृणोति-

### मूलम्

**वाक्यं तु पदसमूहः । यथा गामानयेति । शक्तं पदम् ।**

### विवरणम्

पदानां समूह एव वाक्यम् । पदञ्च पुनः शक्तिविशिष्टोऽकारादिवर्णसमुदाय इति । एतन्नाम शक्तपदसमूह एव वाक्यम् । शक्त्या किञ्चिदर्थबोधकत्वं पदलक्षणम् ।

वैयाकरणास्तु परस्परान्वयिभावापन्नक्रियाकारकवाचकपदसमुदायो वाक्यमिति वदन्ति । तार्किकमते तु पदसमूहमात्रस्य वाक्यत्वेन क्रियापदसमभिव्याहारनियमाभावाद् 'नीलो घटः' इति क्रियावाचकपदप्रयोगविरहस्थलेऽपि वाक्यत्वं सम्मतमेव । वस्तुतस्तु तार्किकमते 'घटः' इत्यपि वाक्यमेव । सुप्रत्ययेन एकत्वस्य, घटपदेन घटस्य च बोधेन 'एकत्वविशिष्टो घटः' इति विशिष्टबोधजननात् ॥

शक्तं शक्तियुक्तम् । नैयायिकैर्वैशेषिकैश्च शक्तेरतिरिक्तपदार्थत्वस्यानङ्गीकारात् 'शक्तमि'ति कथमुच्यते ? इत्यत्राह-

### मूलम्

**अस्मात् पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः ।**

## विवरणम्

'ईश्वरसङ्केतः शक्ति'रिति शक्तेः स्वरूपम् । ईश्वरसङ्केतस्य अभिलापकम् = प्रदर्शकं वाक्यञ्च 'अस्मात् पदादयमर्थो बोद्धव्यः' इति ।

प्रसङ्गेऽत्र आलोककर्तुर्वाक्यमिदं सङ्गच्छते । तदेवात्रोपन्यस्यते- "लोके हि गवादिशब्दाः सर्वदेशकालेषु सर्वेषामपि सास्नादिमत्प्राणिविशेषबोधजनका दृश्यन्ते । कथमेवमविसंवादेन शब्दप्रयोगः, शाब्दबोधश्च ? पूर्वपूर्वपुरुषाणां परम्परया तथा प्रयोगवशादिति चेत्, प्रथमप्रयोगः कस्येति वक्तव्यम् । 'गावो वा एतत्सत्रमासत' इत्यादिषु वैदिकप्रयोग एव प्रथमप्रयोग इति चेद्, वेदस्येश्वरोपदेशरूपत्वाद्, ईश्वर एवैतादृशबोधजनकेच्छया एतानि पदानि प्रयुक्तवानिति ज्ञायते । यथा गुणवृद्ध्यादिसंज्ञाः पाणिनिना तत्तदर्थबोधेच्छया सङ्केतिता इदानीमपि तथैव प्रयुज्यन्ते । ततश्च 'गुणवृद्ध्यादिपदं तत्तदर्थबोधजनकं भवतु' इति पाणिनीच्छापूर्वकं यथा, तथैव गवादिपदान्यपि तदुच्चारयितुरीश्वरस्येच्छया तत्तदर्थबोधनसमर्थानि भवन्तीति 'अस्मात्पदादयमर्थो बोद्धव्यः' इतीश्वरेच्छैव शक्तिपदार्थो नातिरिक्ता शक्तिः" ॥

उपरिष्टात् 'पदसमूहो वाक्यम् । आप्तवाक्यं पुनः शब्दः प्रमाणम्' इत्यादिकं प्रादर्शि । प्रमाणं तावत् प्रमाकरणम् इत्यपि स्पष्टीकृतम् । प्रमा च यथार्थानुभवः । अनुभवो नाम नवीनं ज्ञानमिति । ननु तर्हि 'रामः, गृहं, पुस्तकं मन्दिरम्' इति रामादिपदसमूहोऽपि वाक्यं वर्तते, इतोऽपि नवीनानुभवः स्यात् । परं न तथानुभूयते । भवत्येव तत्र रामाद्यर्थानां बोध इति चेत्, नायं बोधः, परमर्थस्मरणमात्रम् ... इत्यादिशङ्कां निराचिकीर्षुराह- 'आकाङ्क्षे'ति । अत्रापि प्रसङ्गे आलोककर्तुरधस्तनं वाक्यमवधेयम्-

"ननु गवादिपदसमूह एव चेद् वाक्यम्, तर्हि 'गौरश्वः पुरुषो हस्ती' इत्यादिपदसमूहादपि कश्चन बोधः स्यात् । भवत्येव तत्र गवाद्यर्थानां बोध इति चेत्, नायं बोधः । किन्त्वर्थस्य स्मरणमात्रम् । शाब्दबोधो नाम शब्दजन्यः परस्परान्वितार्थविषयको यथार्थानुभवः । चतुर्विधयथार्थानुभवेषु हि 'शाब्दः' इति विभागः प्रादर्शि । 'गौरश्वः' इत्यादिवाक्याच्छाब्दबोधो न भवितुमर्हति, किन्तु विशकलितपदार्थस्मृतिरेव । एवम् 'अग्निना सिञ्चति' इति वाक्ये श्रुतेऽपि शाब्दबोधो न जायते, बाधितार्थकत्वात् । एवं प्रातः 'घटपदम्' उक्त्वा सायम् 'आनय' इति पदप्रयोगेऽपि शाब्दबोधो न भवति, पदानामत्यन्तं व्यवधानात् । एवं कोशादावपि पदानामर्थोपस्थितिमात्रं भवति । एषु स्थलेषु वाक्ये श्रुतेऽपि शाब्दबोधः कुतो न जायते ? इति शङ्कायाम्, तेषु स्थलेषु शाब्दबोधानुत्पत्तेः कारणान्याह- 'आकाङ्क्षे'त्यादिना'-

## मूलम्

**आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञानहेतुः ।**

## विवरणम्

वाक्यार्थज्ञानार्थं पदानां परस्परमाकाङ्क्षा, परस्परबाधाभावो योग्यता, पदानामविलम्बेनोच्चारणं सन्निधिश्चेति

त्रितयमपेक्षितं भवति । एतावता पदज्ञानम्, पदार्थोपस्थितिः, तात्पर्यज्ञानमथ च उपर्युक्तं त्रितयमित्येतदादाय षण् मिलित्वा शाब्दबोधं जनयन्ति । अत आकाङ्क्षादीनि वाक्यार्थज्ञाने हेतुत्वेन वर्तन्ते । उक्तेषु स्थलेषु वाक्ये श्रुतेऽपि शाब्दबोधाभावस्तु आकाङ्क्षादिकारणानामभावादिति जानीहि ॥

आकाङ्क्षादीनामुद्देशानन्तरं तेषां लक्षणान्याह-

## मूलम्

**पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षा । अर्थाबाधो योग्यता । पदानामविलम्बेनोच्चारणं सन्निधिः । आकाङ्क्षादिरहितं वाक्यमप्रमाणम् । यथा 'गौरश्वः पुरुषो हस्ती'ति न प्रमाणम्, आकाङ्क्षाविरहात् । 'अग्निना सिञ्चती'ति न प्रमाणं, योग्यताविरहात् । प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणं, सान्निध्याभावात् ।**

## विवरणम्

ननु आकाङ्क्षा नाम इच्छा, योग्यता नाम उत्कर्षसम्पादकसद्गुणवत्त्वम्, सन्निधिश्च सामीप्यम्, द्वयोरेकत्र समावेश इति यावत् । एते चाचेतने शब्दे कथं स्युः ? किञ्च श्रोतृनिष्ठानामेतेषां कारणत्वे शाब्दबोधेच्छारहितस्य, अयोग्यस्य, वक्तृसमावेशरहितस्यापि शाब्दबोधोत्पत्त्या नैतेषां कारणत्वकथनं युक्तमिति शङ्कायां क्रमेणाकाङ्क्षादीन् निर्वक्ति- **पदस्ये**ति । पदस्य = कस्यचित्पदस्य । पदान्तरम् = अन्यत् समीपस्थं पदम्, तद्व्यतिरेकस्तदप्रयोगः । तत्प्रयुक्तम्= तन्निबन्धनम् – तत्पदे सति बोधः, तदभावे च न बोध इत्येवंरूपम्, अन्वयाननुभावकत्वम् = परस्परान्वयविशिष्टविषयकशाब्दबोधाजनकत्वं यदा भवति, तदा तयोः पदयोराकाङ्क्षा । यथा क्रियापदे श्रुते, कर्त्राकाङ्क्षा, कर्तृवाचकपदे प्रयुक्ते क्रियाकाङ्क्षा च भवति । तद्वाचकपदाभावे च शाब्दबोधो न भवति । एवं सकर्मकधातुश्रवणे कर्माकाङ्क्षा, विशेष्यविशेषणवाचकपदादीनां परस्परमाकाङ्क्षादि च ज्ञेयम् ।

योग्यता- अर्थबाधाभावो योग्यता । एतन्नाम अर्थस्य अबाधो बाधनिश्चयाभावः । अत्र 'एकपदार्थे' इत्याध्याहार्यम् । तथा च एकपदार्थे अपरपदार्थबाधनिश्चयाभावो योग्यता इति पर्यवसितम् । वह्निना सिञ्चतीत्यत्र सेककरणत्वस्य जलादिधर्मस्य वह्नौ बाधनिश्चयसत्त्वान्न तादृशवाक्याच्छाब्दबोधः ।

अविलम्बितप्रवृत्तिकं पदोच्चारणं सन्निधिः । पदानामविलम्बेनोच्चारणमावश्यकम् । तदभावादेव प्रातः 'गाम्' इत्युच्चार्य, सायम् पुनर् 'आनय' इत्युच्चारिते सति तयोरन्वयबोधो न भवति । तयोः सान्निध्याभावादिति ।

उक्तमस्माभिरुपरिष्टाद् 'आप्तवाक्यं शब्दः प्रमाणमि'ति । तच्च वाक्यमाकाङ्क्षादियुतमपेक्षितम् । आकाङ्क्षादिरहितं वाक्यं प्रमाणं भवितु नार्हति ।

एतावता कतिपयेषु वाक्येषु पदज्ञाने सत्यपि, सत्यपि च शक्तिज्ञाने आकाङ्क्षाद्यन्यतमकारणाभावान्न शाब्दबोधः सकलकारणसन्निधाने सत्येव कार्योदयसम्भवात् । 'गौरश्वः पुरुषो हस्ती' इत्यत्र तेषां पदानां परस्परमाकाङ्क्षाया अभावान्न शाब्दबोधः । यथा 'भूतले घटः' इत्युक्ते घटभूतलयोराधाराधेयभावाद् आधारस्याधेयाकाङ्क्षा, आधेयस्याधाराकाङ्क्षा च वर्तते, तथा न हि गोपदार्थस्याश्वपदार्थस्य च परस्परमाकाङ्क्षा काचिद्वर्तते, एवमेव पुरुषस्य हस्तिपदार्थस्य चेति । अत आकाङ्क्षाभावान्न शाब्दबोधः । अत एव कोशान्न शाब्दबोधः, परस्पराकाङ्क्षाभावात् । एवमन्यत्राप्यूह्यम् ॥

'आप्तवाक्यं शब्दः' इत्युक्तम् । तत्र वाक्यन्तावत् कतिविधम् ? किं किं वाक्यं प्रमाणम् ? इति जिज्ञासां परिहर्तुमाह-

## मूलम्

**वाक्यं द्विविधम्- वैदिकं लौकिकं च । वैदिकमीश्वरोक्तत्वात् सर्वमेव प्रमाणम् । लौकिकं त्वाप्तोक्तं प्रमाणम् । अन्यदप्रमाणम् । वाक्यार्थज्ञानं शाब्दज्ञानं, तत्करणं शब्दः ।**

## विवरणम्

वैदिकलौकिकभेदेन द्विविधं वाक्यं भवति । वैदिकं नाम ईश्वरोच्चरितत्वे सति अर्थबोधकपदसमूहत्वम् । एतावता ईश्वरोक्तवाक्यं वैदिकवाक्यम् । लौकिकत्वं नाम प्रयोगहेतुभूतयथार्थज्ञानवत्पुरुषोच्चरितत्वे सति अर्थबोधकपदसमूहत्वम् । एतावता पुरुषोच्चरितं वाक्यं लौकिकम् । वैदिकञ्च सर्वमपि प्रमाणत्वेन गृह्यते चेल्लौकिकं पुनराप्तोक्तत्वे सति प्रमाणं तदितरन्तु अप्रमाणमिति । वाक्यतो जायमानमर्थज्ञानमेव शाब्दज्ञानम् । तस्य ज्ञानस्य व्यापारवद् असाधारणं कारणं शब्द इति ॥

## पदानामर्थपरिचयः

| | | |
|---|---|---|
| अवसरप्राप्तम् | = | अवसरलब्धम् । |
| गवयः | = | गलकम्बलाभाववान् गोसदृशः प्राणी । |
| आरण्यकः | = | वनेचरः । |
| प्रसिद्धम् | = | ज्ञातम्/दृष्टम् । |
| साधर्म्यम् | = | सादृश्यम् । |
| अजानन् | = | अज्ञः । |
| अभिलापकम् | = | प्रदर्शकम् । |
| संज्ञा | = | नाम । |
| संज्ञी | = | नामवान् । |

| | | |
|---|---|---|
| घटकः | = | अंशः । |
| विशिष्टः | = | युक्तः । |
| शाब्दबोधः | = | शब्दजन्यो बोधः । |
| परिहर्तुम् | = | निराकर्तुम् । |
| चिख्यापयिषा | = | वक्तुमिच्छा । |
| वैयाकरणाः | = | व्याकरणज्ञाः । |
| विशकलितम् | = | पृथक् पृथक् कृतम्, खण्डीकृतम् । |
| नवीनम् | = | अभूतपूर्वम् । |
| ऊह्यम् | = | कल्प्यम् । |
| वैदिकम् | = | वेदसम्बद्धम्, वेदस्थितम् । |

## अभ्यासः

**१. विवेचनात्मकमुत्तरं देयम्**

(क) उपमितिप्रक्रिया विविच्यताम् ।

(ख) शब्दप्रमाणं किं साधूपपाद्यताम् ।

(ग) वाक्यार्थज्ञानहेतुमुद्दिश्य आकाङ्क्षा विविच्यताम् ।

**२. वर्णनात्मकमुत्तरं देयम्**

(क) 'संज्ञासंज्ञिसम्बन्धज्ञानम्' इत्यस्य तात्पर्यं स्फुटीक्रियताम् ।

(ख) आप्तो निरूप्यताम् ।

(ग) शक्तिः केति स्पष्टीक्रियताम् ।

(घ) योग्यता केति स्फुटीक्रियताम् ।

(ङ) सन्निधिः परिचाय्यताम् ।

(च) वाक्यं कतिविधम् ? कथं किं किं प्रमाणमिति निरूप्यताम् ।

**३. अतिसङ्क्षिप्तमुत्तरं देयम् ।**

(क) उपमानं किम् ?

(ख) उपमितिः का ?

(ग) उपमितौ व्यापारः कः ?

(घ) शब्दप्रमाणं किम् ?

(ङ) आप्तः कः ?

(च) किं नाम वाक्यम् ?

(छ) पदस्वरूपं किम् ?

(ज) का नाम शक्तिः ?

(झ) वाक्यार्थज्ञाने हेतुः कः ?

(ञ) आकाङ्क्षा का ?

(ट) का नाम योग्यता ?

(ठ) सन्निधिः कः ?

(ड) वाक्यं कतिविधम् ?

(ढ) कीदृशं लौकिकं वाक्यं प्रमाणम् ?

## ४. कक्षाभ्यासः/गृहाभ्यासः

(क) उपमितिप्रक्रियाविषये कक्षायां सतीर्थ्यैः सह विमर्शः क्रियताम् ।

(ख) 'संज्ञासंज्ञिसम्बन्धज्ञानम्' इत्यनेन किं बुध्यते/बोध्यते ? इत्यत्र गुरुणा सतीर्थ्यैश्च सह संवादो विधेयः ।

(ग) शब्दप्रमाणविषये एकं लेखं विरचय्य गुरवे प्रदर्श्यताम् ।

(घ) आप्तविषये कक्षायां मित्रैः सह प्रश्नोत्तरकार्यं विधेयम् ।

(ङ) पदस्वरूपं शक्तिञ्चादाय कक्षायां गुरुणा सतीर्थ्यैश्च सह संवादो विधेयः ।

(च) आकाङ्क्षायोग्यतासन्निधिविषयकममनुच्छेदत्रयं लेख्यम् ।

(छ) वाक्यं कतिविधम् ? कीदृशञ्च वाक्यं प्रमाणम् ? इति विषयमादाय अनुच्छेदद्वयं लेख्यम् ।

# अवशिष्टपरिच्छेदः

प्रत्यक्षादीनामनुभवानां याथार्थ्यायथार्थ्यभेदेन द्वैविध्यं वर्तते । तत्र प्रत्यक्षादयो यथार्था निरूपिताः । भेदपुरस्सरमयथार्थनिरूपणमारभते 'अयथार्थानुभवः' इत्यादिना-

### मूलम्

**अयथार्थानुभवस्त्रिविधः, संशयविपर्ययतर्कभेदात् ।**

### विवरणम्

तद्वति तत्प्रकारकोऽनुभवो यथार्थः । सैव प्रमेत्युच्यते । तदभाववति तत्प्रकारकोऽनुभवश्चायथार्थः । अयथार्थानुभवश्च संशयविपर्ययतर्कभेदात् त्रिविध इति ।

**अप्रमा–** उपरिष्टादयथार्थानुभवस्य वैविध्यमुक्तम् । अवसरसङ्गत्या तदत्र विचार्यते- अयथार्थानुभवो नाम अप्रमा। अयथार्थानुभवश्च तदभाववति तत्प्रकारक इति । यथा घटे पटज्ञानम्। पटे च घटज्ञानमिति। न्यायशास्त्रे संशयविपर्ययतर्कभेदेन त्रिविधा अप्रमा उक्ता वर्तते । वैशेषिके पुनः संशयविपर्ययानध्यवसायस्वप्नभेदेन चतुर्विधा अविद्या परिगणिता वर्तते । यथाह प्रशस्तदेवः– **तत्राविद्या चतुर्विधा– संशयविपर्ययानध्यवसायस्वप्नलक्षणा ।** तत्रायथार्थानुभवार्थमविद्यापदस्य प्रयोगः कृतो वर्तते ॥

प्रसङ्गेऽत्र न्यायदृष्टयाऽप्रमा विविच्यते । तत्रादौ संशय उपक्रम्यते-

### मूलम्

**एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहि ज्ञानं संशयः । यथा स्थाणुर्वा पुरुषो वेति ।**

### विवरणम्

कस्मिँश्चन वस्तुनि दृष्टे तस्य चान्येन सह समानधर्मस्य ज्ञाने विशेषधर्मस्य च स्मृतेः विशेषस्य चाप्राप्तेः किंस्विदिदम् ? जानीयामिति काचिदिच्छा जागरिता भवति । तस्य च द्रष्टुः सन्देहो जायते- पुरो दृश्यमानं वस्तु एतद्वा तद्वेति ? तथा सन्देह एव संशयः । न्यायसूत्रकारेणोक्तम्- **समानाऽनेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ।** वस्तुतः संशयस्तावद् **विशेषापेक्षो विमर्श** इत्येव । अत्र विमर्शो नाम किंस्विदिदमिति जानीयामिति । अतस्तस्य विशेषणत्वेन विशेषापेक्ष इति । तत्र हि तथा विमर्शश्च समानधर्मोपपत्तितः, अनेकधर्मोपपत्तितः, विप्रतिपत्तितः,

उपलब्ध्यव्यवस्थातः, अनुपलब्ध्यव्यवस्थातो जायते । एतावता संशयस्य पञ्च कारणानि चेद् 'विशेषापेक्षो विमर्शः संशयः' इत्येव संशयस्य लक्षणमिति ज्ञेयम् ।

अत्रान्नम्भट्टः 'एकस्मिन् वस्तुनि विरुद्धानां नैकेषां धर्माणां बोध एव संशयः' इति भाषते । वस्तुतस्तथा विरुद्धानां नैकेषां धर्माणां बोधमात्रं न संशयः । अथापि तथा बोधे सति वस्तुतो नैकस्मिन् वस्तुनि विरुद्धा नानाधर्माः सम्भवन्ति, प्रत्युतैक एव धर्मः । स च कः स्यात्, एतद् वा तद्वा स्यात् तज्जानीयाम् इति मानसो व्यापार एव संशयः । कणादश्च 'सामान्यधर्मस्य प्रत्यक्षाद् अथ च विशेषधर्मस्य अप्रत्यक्षाद् विशेषधर्मस्य स्मृतेश्च संशयो जायते' इत्याह- **सामान्यप्रत्यक्षाद् विशेषाप्रत्यक्षाद् विशेषस्मृतेश्च संशयः ।** अत्र सामान्यधर्मपदेन नैकेषु स्थिता धर्मा ज्ञेयाः, विशेषधर्मपदेन चैकस्मिन्नेव वस्तुनि स्थितो धर्म इति । अत्र संशयो न लक्षितोऽपितु संशयकारणमेव प्रदर्शितम् । संशयश्च 'प्रसिद्धानेकविशेषयोः सादृश्यमात्रदर्शनादुभयविशेषानुस्मरणादधर्माच्च किंस्विदित्युभयावलम्बी विमर्शः' इति ॥

संशयनिरूपणानन्तरं क्रमप्राप्तं विपर्ययनिरूपणमारभते-

### मूलम्

**मिथ्याज्ञानं विपर्ययः । यथा शुक्ताविदं 'रजतम्' इति ।**

### विवरणम्

भ्रम एव विपर्ययः । किंवा मिथ्याज्ञानमेव विपर्ययः । घटे पटत्वज्ञानम्, पटे च घटत्वज्ञानम् । ज्ञानानुसारिण्याः प्रवृत्तेः फलवत्त्वे ज्ञानस्य याथार्थ्यञ्चेद् विपरीते तु विपर्ययत्वं सिद्ध्यति । प्रशस्तपादेन **अतस्मिँस्तदिति प्रत्ययो विपर्ययः ।** .... **मिथ्याप्रत्ययो विपर्ययः** इत्यादिभिर्वाक्यैर्विपर्ययः परिचायितो लभ्यते । योगशास्त्रे चायं विपर्ययो मिथ्यज्ञानत्वेन परिचायितो वर्तते । वस्तुनोऽभावेऽपि जायमानं ज्ञानमेव विपर्यय इति पतञ्जलिः- **विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ।** ब्रह्मसूत्रस्याऽध्यासभाष्येऽतस्मिन् तद्बुद्धिरेवाध्यासः- **अध्यासो नाम अतस्मिँस्तद्बुद्धिः ।** अयमेव विपर्यय इति नैयायिका वैशेषिकाश्चोपपादयन्ति ॥

विपर्ययनिरूपणानन्तरं क्रमप्राप्तं तर्कनिरूपणमारभते-

### मूलम्

**व्याप्यारोपेण व्यापकारोपस्तर्कः । यथा यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति ।**

### विवरणम्

**तर्कोऽनिष्टप्रसङ्गः ।** यथा 'पर्वतोऽयं साग्निरुतानग्निरि'ति जिज्ञासायां यदि कश्चन मन्येताम् अनग्निरिति तदा तं प्रति 'यद्ययमनग्निरभविष्यत् तदाऽनग्नित्वादधूमोऽप्यभविष्यद्' इति अधूमवत्त्वप्रसञ्जनं क्रियते ।

अयमेवानिष्टप्रसङ्गः । तर्कसङ्ग्रहकारेण तूक्तम्- **व्याप्यारोपेण व्यापकारोपस्तर्कः ।** 'पर्वतो वह्निमान् धूमाद्' इत्यत्र वह्निर्व्यापको धूमश्च व्याप्यः । तद्विपरीततया वह्न्यभावो व्याप्यः, धूमाभावश्च व्यापकः । पर्वतो साग्निरुतानग्निरिति विचारे केनचन 'पर्वतः साग्निर्धूमवत्त्वाद्' इत्युक्ते सति अन्येन 'धूमस्य सत्त्वमात्रेण वह्निसत्त्वं कथं निश्चीयते' ? इति जिज्ञास्यते । तत्रोच्यते- 'यदि वह्निर्न स्यात् किंवा वह्न्यभावः स्यात्, तर्हि धूमोऽपि न स्यात्= धूमाभावोऽपि स्यात्' । तत्र पर्वते वह्नेर्धूमस्य च सत्त्वेऽपि 'यदि वह्निर्न स्यात्' इति कल्पयित्वा वक्तव्यम् । एतादृशकल्पनात्मकं ज्ञानं 'आरोपः' इत्युच्यते । एवमेव 'धूमोऽपि न स्याद्' इत्यपि आरोप एव । धूमस्यापि सत्त्वात् तथा वक्तुमशक्यत्वमेव । अथापि आरोपो विहितः । अतो व्याप्यारोपेण व्यापकारोपस्तर्कः = वह्न्यभावरूपव्याप्यारोपेण धूमाभावरूपव्यापकारोपस्तर्कः । न्यायशास्त्रे यद्यपि तर्को विपर्ययत्वेन परिगण्यतेऽथापि अस्य प्रमाणानुग्राहकत्वमस्त्येव ॥

'सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानम् । सा द्विविधा स्मृतिरनुभवश्च' इत्यादिरीत्या बुद्धेर्द्वैविध्यविभजपूर्वकं यथार्थायथार्थभेदेनानुभवस्यापि द्वैविध्यमुक्त्वा निरूपितञ्च सर्वमपि साधु । एवमेव तत्रैव प्रसङ्गे 'संस्कारमात्रजन्यं ज्ञानं स्मृति'रित्युक्तमासीत् । अधुना च ग्रन्थकृत् 'स्मृतिरपि' इत्यादिना तस्याः स्मृतेः भेदनिरूपणमारभते-

### मूलम्

**स्मृतिरपि द्विविधा- यथार्था अयथार्था च । प्रमाजन्या यथार्था । अप्रमाजन्या अयथार्था ।**

### विवरणम्

यथार्थायथार्थभेदेनानुभवस्यापि द्वैविध्यं प्रतिपादितपूर्वमेव । एवञ्च 'संस्कारमात्रजन्यं ज्ञानमि'त्येवंरूपा स्मृतिरपि यथार्थायथार्थभेदेन द्विधा वर्तते । यथार्थानुभवजन्या स्मृतिर्यथार्था चेद् अयथार्थानुभवजन्या स्मृतिरयथार्थेति विवेकः ॥

बुद्धेरनन्तरं क्रमप्राप्तं सुखादिगुणनिरूपणमारभते-

### मूलम्

**सर्वेषामनुकूलतया वेदनीयं सुखम् । प्रतिकूलतया वेदनीयं दुःखम् । इच्छा कामः । क्रोधो द्वेषः । कृतिः प्रयत्नः । विहितकर्मजन्यो धर्मः । निषिद्धकर्मजन्यस्त्वधर्मः । बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः । बुद्धीच्छाप्रयत्ना नित्या अनित्याश्च । नित्या ईश्वरस्य । अनित्या जीवस्य ।**

### विवरणम्

सर्वेषामनुकूलवेदनीयं नाम सर्वात्मनामनुकूलमिति वेद्यं यत्तत्सुखमित्यर्थः । सुखं ह्यनुकूलस्वभावतया स्वविषयानुभवं कारयत् पुरुषमनुगृह्णाति । अत एव **अनुग्रहलक्षणं सुख**मिति प्रशस्तपादः ।

सर्वेषां प्रतिकूलवेदनीयं नाम दुःखं ह्युपजातं प्रतिकूलस्वभावतया स्वविषयानुभवं कारयद् आत्मानमुपहन्ति । अत एव **उपघातलक्षणं दुःख**मिति प्रशस्तदेवः ।

'स्वार्थं परार्थं वाप्राप्तप्रार्थना' इच्छा । एतन्नाम अप्राप्तवस्तुनः स्वार्थं प्रति 'इदं मे भूयाद्' इति प्रार्थना, परार्थं वा प्रति 'इदमस्मै/तस्मै भूयादि'ति प्रार्थनैवेच्छा ।

प्रज्वलनात्मको द्वेषः । यस्मिन् सति प्रज्वलितमिवात्मानं मन्यते, स द्वेषः । क्रोधो द्रोहो मन्युरक्षमाऽमर्ष इति द्वेषभेदाः ।

प्रयत्नत्वजातिमान् प्रयत्नः । प्रयत्नः संरम्भ उत्साह इति पर्यायाः । जीवनपूर्वक-इच्छाद्वेषपूर्वकभेदेन प्रयत्नो द्विविधः ।

कर्तुः प्रियादीनां यो हेतुः स धर्मः । अयञ्च पुरुषगुणः । अतीन्द्रियः । अन्त्यसुखसंविज्ञानविरोधीति । अधर्मश्च कर्तुरहितप्रत्यवायहेतुः । अयमप्यात्मगुणः । अतीन्द्रियः । अन्त्यदुःखसंविज्ञानविरोधीति ।

बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा आत्ममात्रगुणाः- बुद्ध्यादयोऽष्टौ गुणा आत्मतेरावृत्तिगुणा इत्यर्थः । जीवमात्रनिष्ठानां कर्माधीनानां तेषामनित्यत्वम् । बुद्धीच्छाप्रयत्नानामीश्वरगतानां नित्यत्वं जीवगतानाञ्चानित्यत्वमिति बोधयति- **बुद्धीच्छाप्रयत्ना** .... इति । केचन ईश्वरस्य नित्यसुखमपि स्वीकुर्वन्ति ॥

संस्कारगुणनिरूपणमारभते-

## मूलम्

**संस्कारस्त्रिविधः- वेगो भावना स्थितिस्थापकश्चेति । वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः । अनुभवजन्या स्मृतिहेतुर्भावना । आत्ममात्रवृत्तिः । अन्यथाकृतस्य पुनस्तदवस्थापादकः स्थितिस्थापकः । कटादिपृथिवीवृत्तिः ।**

## विवरणम्

तर्कसङ्ग्रहे संस्कारस्य लक्षणमकृत्वैव विभजनं कृतं वर्तते । पदकृत्यकारः चन्द्रजसिंहस्तु **सामान्यगुणात्मविशेषगुणोभयवृत्तिगुणत्वव्याप्यजातिमान् संस्कार** इत्याचष्टे । दीपिकायां पुनः **संस्कारत्वजातिमान् संस्कार** इत्युक्तं लभ्यते ।

संस्कारश्च वेगभावनास्थितिस्थापकभेदेन त्रिविधः । तत्र वेगत्वं नाम गुरुत्वादिभिन्नत्वे सति द्वितीयादिपतनासमवायिकारणत्वमिति । वेगश्च मूर्त्तिमत्सु पञ्चसु द्रव्येषु निमित्तविशेषापेक्षात् कर्मणो जायते ।

भावनाख्यः संस्कारः आत्मगुणो दृष्टश्रुतानुभूतेष्वर्थेषु स्मृतिप्रत्यभिज्ञानहेतुर्भवति। अतश्चोच्यते- अनुभवजन्यत्वे सति स्मृतिप्रत्यभिज्ञानहेतुत्वं भावानाया लक्षणम्।

स्थितिस्थापकस्तु पूर्वकालसम्बन्धिविलक्षणसंस्थानजातीयायाः स्थापकः पुनरुत्पत्तिजनक इति। अयञ्च संस्कारः स्पर्शवद्द्रव्येषु वर्तमानो घनावयवसन्निवेशविशिष्टेषु कालान्तरावस्थायिषु स्वाश्रयमन्यथाकृतं यथावस्थितं स्थापयति॥

गुणनिरूपणानन्तरं सभेदं कर्म निरूपते-

## मूलम्

**चलनात्मकं कर्म। ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम्। अधोदेशसंयोगहेतुरपक्षेपणम्। शरीरसन्निकृष्टसंयोगहेतुराकुञ्चनम्। विप्रकृष्टसंयोगहेतुः प्रसारणम्। अन्यत्सर्वं गमनम्।**

## विवरणम्

चलनमेव कर्म। अतश्चोक्तं चलनात्मकं कर्मेति। चलति इति प्रतीतिसिद्धक्रियात्वरूपजातिमत्त्वं कर्मत्वम्। तच्च कर्म उत्क्षेपण-अवक्षेपण-आकुञ्चन-प्रसारण-गमनभेदेन पञ्चविधं वर्तते इति कणभुग्- **उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि।** तर्कसङ्ग्रहादौ अपक्षेपणपदस्य प्रयोगो वर्तते चेत् सूत्रकारेण पुनरवक्षेपणमित्युक्तम्।

चलने जाते सति पूर्वदेशाद् वस्तुनो विभागो जायते। ततः पूर्वसंयोगो नाश इति। तत उत्तरदेशसंयोगोत्पत्तिः। तत्र ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणात्मकं कर्म। एवमेव अधोदेशसंयोगहेतुरपक्षेपणात्मकं कर्म। अथ च शरीरसन्निकृष्टसंयोगहेतुराकुञ्चनात्मकं कर्म। एवमेव विप्रकृष्टसंयोगहेतुस्तु प्रसारणात्मकं कर्म। ततोऽतिरिक्तं यावदमपि कर्म जायते, तत् सर्वं गमनात्मकमिति विवेकः॥

कर्मनिरूपणानन्तरं क्रमप्राप्तं सामान्यं निरूपते-

## मूलम्

**नित्यमेकमनेकानुगतं सामान्यम्। द्रव्यगुणकर्मवृत्ति। तद् द्विविधं परापरभेदात्। परं सत्ता, अपरं द्रव्यत्वादि।**

## विवरणम्

वैशेषिकदर्शनेषु स्पष्टमुक्तेषु न्यायदर्शने चाभिमतेषु सप्तपदार्थेषु चतुर्थः पदार्थः सामान्यम्। तल्लक्षणन्तु नित्यत्वे सति अनेकसमवेतत्वमिति। जातिः सामान्यमिति पर्यायः। सामान्यञ्च द्रव्यगुणकर्मसु भवति। तच्च पर-अपरभेदेन द्विविधमिति तर्कसङ्ग्रहकारः। परापरभेदेन तृतीयमपि प्रसिद्धम्। परत्वं व्यापकत्वम्,

अपरत्वं व्याप्यत्वम् । सत्तायाः व्यापकत्वम् । घटत्वपटत्वादिजातीनां व्याप्यत्वम् । द्रव्यत्वपृथित्वादिजादीनां सत्तापेक्षया व्याप्यत्वं घटत्वाद्यपेक्षया व्यापकत्वञ्च भवति । सर्वमेतत् प्रतिपादितम् अधस्तनाभिः कारिकाभिर्विश्वनाथपञ्चाननभट्टाचार्येण-

**सामान्यं द्विविधं प्रोक्तं परं चापरमेव च ।**

**द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥**

**परभिन्ना च या जातिः सैवापरतयोच्यते ।**

**द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥**

**व्यापकत्वात् परापि स्यात् व्याप्यत्वादपरापि च ।**

इदञ्च सामान्यं द्रव्यगुणकर्ममात्रवृत्ति इत्यपि स्पष्टीकृतमेव । अस्य उपर्युक्ते लक्षणे च नित्यत्वमात्रोक्तौ गगनादौ, अनेकसमवेतत्वमात्रोक्तौ घटादौ संयोगादौ चातिव्याप्तिरिति द्वयोर्दलयोरादानम् । नित्यत्वे सति समवेतत्वमात्रोक्तौ गगनपरिमाणादावतिव्याप्तिरतोऽनेकेति । नित्यत्वे सति अनेकवृत्तित्वमत्यन्ताभावेऽप्यस्ति अतो वृत्तित्वसामान्यं विहाय समवेतत्वमिति उक्तम् ।

ननु तथापि नित्यसंयोगेऽतिव्याप्तिरिति चेन्न, नित्यसंयोगानङ्गीकारात् । अन्यथा तुल्ययुक्त्या नित्यविभागस्यापि सिद्धिप्रसङ्गात् । अथवा तत्रातिव्याप्तिवारणाय संयोगभिन्नत्वे सतीति देयम् । अथवा अनेकसमवेतत्वमित्यत्र अनेकपदं बहुपरं, नित्यसंयोगश्च द्विसमवेत एव, न बहुसमवेत इति न दोषः ।

ननु निस्सामान्यत्वे सति विशेषान्यत्वे सति समवेतत्वं सामान्यलक्षणं प्राचामभिमतम् । तत्र घटादौ अतिव्याप्तिवारणाय प्रथमसत्यन्तम् । विशेषेऽतिव्याप्तिवारणाय द्वितीयम् । समवायाभावयोरतिव्याप्तिवारणाय विशेष्यदलम् । ततश्च आकाशत्वं जातिरिति प्रतीयते नित्यत्वे सति अनेकसमवेतत्वं लक्षणन्तु चात्राव्याप्तमिति चेन्न, एकमात्रवृत्तिधर्मस्य जातित्वानभ्युपगमाद् इति ॥

सामान्यनिरूपणानन्तरं क्रमप्राप्तं विशेषनिरूपणमारभते-

## मूलम्

**नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः ।**

## विवरणम्

नित्यद्रव्येषु स्थितः कश्चन भेदकः पदार्थो विशेषः- **नित्यद्रव्यवृत्तयो विशेषाः ।** स च अनन्तः । विशेषपदार्थः स्वतो भेदकः सिद्धः, अन्यथानवस्था स्यात् । अतश्च स्वतो व्यावर्तकरूपेणायं विशेषपदार्थो वैशेषिकदर्शने स्वीक्रियत इति । अयञ्च अन्त्यः । अन्ते भवः अन्त्यः । सामान्यतो अन्तो नाम परमाणुरथापि तेन पदेन आकाशकालादीनामपि ग्रहणम् । तथा च अन्तेषु भवाः=स्थिता अन्त्याः । स्वाश्रयभेदकत्वाद्

विशेषाः। यथाह प्रशस्तदेवः- **अन्तेषु भवा अन्त्याः, स्वाश्रयविशेषकत्वाद् विशेषाः। विनाशारम्भरहितेषु नित्यद्रव्येष्वण्वाकाशकालदिगात्ममनस्सु प्रतिद्रव्यमेकैकशो वर्तमाना अत्यन्त-व्यावृत्ति-बुद्धिहेतवः।** कारिकावलीकारो विश्वनाथश्चेदमेव स्पष्टीकरोति-

**अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्त्तितः।**

विशेषनिरूपणानन्तरं क्रमप्राप्तं समवायं निरूपयति-

## मूलम्

**नित्यसम्बन्धः समवायः। अयुतसिद्धवृत्तिः। ययोर्द्वयोर्मध्ये एकमविनश्यदवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ, यथा अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति।**

## विवरणम्

वैशेषिकदर्शने स्पष्टमुक्तेषु न्यायदर्शने चाभिमतेषु सप्तपदार्थेषु षष्ठः पदार्थः समवायः। तल्लक्षणञ्च **नित्यत्वे सति सम्बन्धत्वमिति।** विशेष्यमात्रोक्तौ संयोगादौ, विशेषणमात्रोक्तौ गगनादौ चातिव्याप्तिरित्युभयपदोपादानम्। अथवा अयुतसिद्धसम्बन्धत्वं समवायस्य लक्षणम्। 'यु मिश्रामिश्रणयोः' इति धातोः युतौ = अमिश्रितौ सिद्धौ = युतसिद्धौ = पृथक् सिद्धौ, तद्भिन्नौ अयुतसिद्धौ, सम्बद्धावेव सिद्धौ। अयुतसिद्धयोः वृत्तिः = सम्बन्धः समवायः। तादृशसम्बन्धत्वं समवायस्य लक्षणमित्यर्थः। अत्र चोक्तं खल्वेतत्- 'ययोर्द्वयोर्मध्ये एकमविनश्यदवस्थम् अपराश्रितमेवावतिष्ठते तावयुतसिद्धौ'। तदर्थश्च ययोः = घटकपालयोर्मध्ये एकं घटात्मकं वस्तु, अविनश्यदवस्थम् = विनाशावस्थाम् अनापन्नं सद्, अपराश्रितमेव = कपालाश्रितमेव, अवतिष्ठते। तौ घटकपालौ अयुतसिद्धौ। एवम् अवयविगुणक्रियाजातिविशेषाणां कदाचिदपि अवयवगुणिक्रियावद्व्यक्तिनित्यद्रव्याणि हित्वा पृथगवस्थितेरभावाद् अवयवावयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्ये चेति अयुतसिद्धपञ्चकं बोध्यम्। एतच्चोक्तं कारिकावल्याम्-

**घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः।**
**तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः॥**

समवायत्वे प्रमाणन्तु 'गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वाद् 'दण्डी पुरुषः' इति विशिष्टबुद्धिवद्' इत्यनुमानम्। पृथक्सिद्धद्रव्ययोरेव संयोग इति नियमाद् अत्र संयोगबाधात् समवायसिद्धिः॥

तर्कसङ्ग्रहेऽभावसामान्यलक्षणं कृतं नास्ति। तत्र लक्षणमकृत्वैव विभजनं विहितं वर्तते। वस्तुतस्तु न भाव इति अभावः, भावभिन्न इति यावत्। अतश्च भावभिन्नत्वमभावत्वमिति अभावसामान्यलक्षणम्। स च प्रथमं तावत् संसर्गान्योन्याभावभेदाद् द्विविधः। आद्यश्च पुनः प्रागभाव-प्रध्वंसाभाव-अत्यन्ताभावभेदात् त्रिविधः। आहत्य चतुर्विधोऽभावः। एतदेवोक्तं कारिकावल्याम्-

**अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।**

**प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥**

**एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते ॥**

**एतावता आहत्य चतुर्धा विभक्तान् अभावान् निरूपते-**

## मूलम्

**अनादिः सान्तः प्रागभावः । उत्पत्तेः पूर्वं कार्यस्य । सादिरनन्तः प्रध्वंसः । उत्पत्त्यनन्तरं कार्यस्य । त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः । यथा भूतले घटो नास्तीति । तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः । यथा घटः पटो नेति ।**

## विवरणम्

अनादिः सान्तो विनाश्यभावो वा प्रागभावः, यथा 'घटो जातः' इति । वस्तुन उत्पत्तेः पूर्वं तस्य योऽभावो भवति, स प्रागभावः । स च वस्तुन उत्पत्त्यनन्तरं न भवति । तस्योत्पत्तिः कदेति वक्तुं न शक्यते अतोऽनादिरिति ।

वस्तुन उत्पत्तेरनन्तरन्तु तस्य नाशोऽतः सान्त इति । सादिरनन्तो जन्याभावो वा प्रध्वंसाभावः, यथा घटो नष्टः । यदा कश्चन पदार्थ उत्पद्यते, तदा तस्याभावो न भवति, यदा च तस्य नाशो जायते ततस्तस्याभावो जायते । वस्तुनो ध्वंसतो जायमानत्वादयमभावो ध्वंसाभावः प्रध्वंसाभावो वेति । वस्तुतो ध्वंस एवाभाव इति ।

नित्यसंसर्गाभावत्वमत्यन्ताभावत्वम् । अथवा त्रैकालिकसंसर्गावच्छिन्न-प्रतियोगिताकोऽभावोऽत्यन्ताभावः । एतन्नाम नित्याभावोऽत्यन्ताभावः ।

अत्यन्ताभावलक्षणे न्यायबोधिनीकारः- **प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वे सत्यन्योन्याभावभिन्नत्वे सति अभावत्वमत्यन्ताभावस्य लक्षणम् ।**

त्रैकालिकः = कालत्रयवर्त्ती यः संसर्गाभावः = तत्तत्सम्बन्धनिषेधरूपोऽभावः = अत्यन्ताभावः । 'भूतले घटो नास्ति' इत्युक्ते भूतले घटनिषेधो घटसम्बन्धनिषेध एव, न तु घटस्यैव निषेधः, अन्यत्र घटस्य सत्त्वात् । अत एव 'शशशृङ्गं नास्ति' इत्यादि व्यवहारो घटो नास्तीति प्रतीतिवत् न प्रामाणिकः । प्रमेयदृष्ट्या घटनिषेधोऽन्यः घटसंसर्गनिषेधोऽन्यः । उभयोः पर्यायता च स्थूलदृष्ट्या । अतोऽत्यन्ताभावः सम्बन्धावच्छिन्नप्रतियोगिताक इति । प्रागभावप्रध्वंसाभावौ तु न संसर्गावच्छिन्नप्रतियोगिताकौ, तयोस्सम्बन्धाभानात् । अत्यन्ताभावस्य उदाहरणन्तु 'अत्र घटो नास्ति', 'वायौ रूपं नास्ती'ति ।

ननु अत्यन्ताभावः कथं नित्यः ? यत्र भूतलादौ घटोऽपसारितः पुनरानीतश्च तत्र पूर्वं सतो घटात्यन्ताभावस्य घटानयनेन नाशात् । तत्र तदानीमपि अत्यन्ताभावस्य सत्त्वे घटानयनानन्तरमपि प्रमात्मकघटात्यन्ताभावबुद्धेः प्रसङ्गाद् इति चेन्न, तत्र घटाभाववद्भूतलमिति ज्ञानकालीनभूतलस्वरूपसम्बन्धाभावेन घटात्यन्ताभाववद्-भूतलमिति प्रतीतेरयोगात् । घटकालस्य तत्सम्बन्धाघटकत्वात् । केचित्तु 'घटापसारणेनोत्पद्यमानो घटानयनेन नश्यन् उत्पादविनाशशाली सामयिकाभावो नाम चतुर्थोऽयं संसर्गाभावः' इत्यप्याचक्षते ।

अत्र प्राचीना घटादिध्वंसप्रागभावाधिकरणे कपालादौ घटो नास्तीति प्रतीतिसम्भवेऽपि तत्र नात्यन्ताभावमङ्गीकुर्वन्ति । श्यामघटे रक्तो नास्ति रक्तघटे श्यामो नास्तीति धीश्च प्रागभावं ध्वंसाभावञ्चावगाहते न तु तदत्यन्तभावं तयोर्विरोधात् । नवीनास्तु तत्र विरोधे मानाभावाद् ध्वंसादिकालावच्छेदेनाप्यत्यन्ताभावो वर्तते इति वदन्ति ।

तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः । यथा घटः पटो नेति । पटश्च घटो नेति । तस्य (पदार्थस्य) आत्मा स्वरूपं तदात्मा, तदात्मनो भावस्तादात्म्यम् अभेद इत्यर्थः । तादृशतादात्म्यसम्बन्धावच्छिन्ना प्रतियोगिता यस्य स एतादृशोऽभाव इत्यर्थः । तादात्म्यसम्बन्धे घटः स्वस्मिन्नेव वर्तते, पटश्च स्वस्मिन्नेव वर्तते । घटः पटो नेति = तादात्म्येन नेत्यर्थः । अर्थात् पटाद्भिन्नो घटः । एतावता पटस्य भेदो घटे वर्तते । भेदो नाम अभावविशेषः । यस्याभावः स प्रतियोगीति रीत्या पटः प्रतियोगी । प्रतियोगिता पटे । तस्या अवच्छेदकं पटत्वम् । एतावता पटनिष्ठायाः प्रतियोगिताया अवच्छेदकधर्मो पटत्वञ्चेत् प्रतियोगितायाः अवच्छेदकः सम्बन्धः तादात्म्यमिति- तादात्म्येन पटो नेति उक्तेः । तथा हि 'घटः पटो ने'त्यस्य तादात्म्यसम्बन्धावच्छिन्न-पटत्वावच्छिन्न-पटनिष्ठप्रतियोगिताकाभाव(अन्योन्याभावः=भेदवान् घट इत्यर्थः । एवञ्च पटश्च घटो नेत्यत्र पुनर् उपर्युक्तरीत्यैव तादात्म्यसम्बन्धावच्छिन्न-घटत्वावच्छिन्न-घटनिष्ठप्रतियोगिताकाभाव-अन्योन्याभावः=भेदवान् पट इत्यर्थः ।

विशेषटिप्पणी- ननु अभावानामधिकरणात्मकत्वं लाघवादिति चेन्न, अनन्ताधिकरणात्मककल्पनापेक्षया अतिरिक्ताभावकल्पनाया एव लघीयस्त्वात् । किञ्चाभावस्याधिकरणात्मकत्वे आधाराधेयपदार्थयोः प्रत्येकयोरभावेन घटाभाववद्भूतलमिति प्रामाणिकप्रतीतिर्न स्यात्, अपि च अभावस्याधिकरणात्मकत्वे पृथिव्यां वर्तमानस्य शब्दाभावस्य श्रोत्रेण ग्रहणं न स्यात् । श्रोत्रस्य पृथिवीग्राहकत्वाभावेन तद्भिन्नशब्दाभावस्याप्यग्राहकत्वप्रसङ्गात् । एवमेव गन्धरसाद्यभावानामपि तत्तदिन्द्रियग्राह्यत्वं न स्यात् । अतोऽभाव अतिरिक्त एवाङ्गीकरणीय इति दिक् ॥

ग्रन्थकृदन्नम्भट्टः सर्वानपि पदार्थानुक्तेषु सप्तस्वेव पदार्थेष्वन्तर्भावयति-

### मूलम्

**सर्वेषामपि पदार्थानां यथायथमुक्तेष्वन्तर्भावात् सप्तैव पदार्था इति सिद्धम् ।**

## विवरणम्

ननु सप्तैव पदार्था इति कथमुक्तम् ? शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वात् । तथा हि- चन्द्रकान्तमण्यादिसमवहितेन वह्निना दाहो न जन्यते तच्छून्येन तु जन्यते, तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्नाश्यते उत्तेजकेन मण्याद्यपसारणेन च जन्यत इति कल्प्यते । एवं सादृश्यमपि अतिरिक्तः पदार्थः, तच्च न षट्त्सु भावेष्वन्तर्भवति सामान्येऽपि सत्त्वाद् यथा गोत्वं नित्यं तथाश्वत्वमपि नित्यमिति सादृश्यप्रतीतेरिति चेन्न, मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति स्वातन्त्र्येण मण्यभावादेरेव वा हेतुत्वं कल्प्यते, अनेनैव सामञ्जस्ये अनन्तशक्तीनां तत्प्रागभावध्वंसानाञ्च कल्पना न युक्ता । उत्तेजकसूर्यकान्तमण्यादौ सति प्रतिबन्धकसद्भावेऽपि दाहोत्पत्त्या उत्तेजकाभावविशिष्टो यो मण्यादिः, तदभावो दाहं प्रति कारणमिति वक्तव्यम् ।

ननु तथापि सादृश्यमपि अतिरिक्तपदार्थोऽस्ति इत्यपि न किन्तु तद्भिन्नत्वे सति तद्गतभूयो धर्मवत्त्वम्, यथा चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वं मुखे चन्द्रसादृश्यमिति ।

किञ्च न्यायसूत्रे उक्तानां प्रमाणप्रमेयादीनां द्रव्याद्यतिरिक्तत्वे सति सप्तैव पदार्थाः कथमित्यपि न, तेषामपि तत्रैवान्तर्भावादिति । एतावता सप्तैव पदार्थास्तत्रैव यथायथमन्तर्भाव इति सिद्धम् ।

### पदानामर्थपरिचयः

| | | |
|---|---|---|
| अनुभवः | = | स्मृतिभिन्नं ज्ञानम्/नवीनं ज्ञानम् । |
| प्रमा | = | यथार्थानुभवः । |
| अप्रमा | = | अयथार्थानुभवः । |
| संशयः | = | नानार्थावमर्शः/विशेषापेक्षो विमर्शः । |
| विपर्ययः | = | मिथ्याज्ञानम् । |
| तर्कः | = | अनिष्टप्रसङ्गः । |
| सुखम् | = | अनुकूलतया वेद्यम् । |
| दुःखम् | = | प्रतिकूलतया वेद्यम् । |
| कर्म | = | चलनम् । |
| कणभुक् | = | वैशेषिकसूत्रकर्ता कणादः । |
| अभिमतम् | = | सम्मतम् । |

| | | |
|---|---|---|
| व्यापकत्वम् | = | तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वम् । |
| व्याप्यत्वम् | = | तदभाववदवृत्तित्वम् । |
| एकमात्रवृत्तिः | = | एकस्मिन् वस्तुनि एव स्थितः । |
| भेदकः | = | भेदकारकः । |
| युतसिद्धौ | = | पृथक्सिद्धौ । |
| अयुतसिद्धौ | = | अपृथक्सिद्धौ । |
| आहत्य | = | सर्वान् आदाय, एकीकृत्य । |
| अभावः | = | प्रतियोगिज्ञानाधीनज्ञानविषयः । |

## अभ्यासः

### १. विवेचनात्मकमुत्तरं देयम्

(क) यथार्थानुभवं विभज्य संशयो विविच्यताम् ।

(ख) भेदपुरस्सरं संस्कारो निरूप्यताम् ।

(ग) सभेदं सामान्यं वर्ण्यताम् ।

(घ) सभेदोऽभावो विविच्यताम् ।

(ङ) सर्वे पदार्थाः कथं सप्तस्वेवान्तर्भवन्तीति स्पष्टीक्रियताम् ।

### २. वर्णनात्मकमुत्तरं देयम्

(क) तर्को वर्ण्यताम् ।

(ख) स्मृतिर्नाम का ? कतिविधा च सा स्पष्टीक्रियताम् ।

(ग) कोऽयं विशेषः ? इति प्रकाश्यताम् ।

(घ) सभेदं कर्म स्पष्टीक्रियताम् ।

(ङ) समवायः कः ? सम्यक् प्रकाश्यताम् ।

(च) कोऽयं प्रागभावः ? स्पष्टीक्रियताम् ।

### ३. अतिसङ्क्षिप्तमुत्तरं देयम्

(क) विपर्ययः कः ?

(ख) सुखं किम् ?

(ग) द्वेषस्य लक्षणं किम् ?

(घ) धर्मः कः ?

(ङ) अधर्मः कः ?

(च) आत्मविशेषगुणाः के ?

(छ) वेगाख्यसंस्कारस्य स्वरूपं किम् ?

(ज) प्रसारणकर्मणः स्वरूपं किम्?

(झ) समवायो नित्यो वा अनित्यः?

(ञ) अन्योन्याभावस्यैकमुदाहरणं दीयताम् ।

(च) अत्यन्ताभावो नित्यो वानित्यः ?

## ४. रिक्तस्थानपूरणं विधीयताम्

(क) स्मृतिः ..... भेदेन द्विविधा ।

(ख) संस्कारः ...... भेदेन त्रिविधः ।

(ग) कर्म ..... भेदेन पञ्चविधम् ।

(घ) ... सामान्यम् ।

(ङ) नित्यद्रव्यवृत्तयः .... विशेषाः ।

(च) अनादिः ... प्रागभावः ।

(छ) सादिः ... प्रध्वंसः ।

## ५. कक्षाभ्यासः/गृहाभ्यासः

(क) अयथार्थानुभवविषये कक्षायां सतीर्थ्यैः सह विमर्शः क्रियताम् ।

(ख) स्मृतिविषये एकं लेखं विरचय्य गुरवे प्रदर्श्यताम् ।

(ग) सभेदं संस्कारमादाय गुरुणा सतीर्थ्यैश्च सह संवादो विधेयः ।

(घ) सभेदं कर्मादाय कक्षायां मित्रैः सह प्रश्नोत्तरकार्यं विधेयम् ।

(ङ) सामान्यमादाय कक्षायां स्वविचारः प्रकटनीयः ।

(च) विशेषस्य वैशिष्ट्यविषयकमनुच्छेदद्वयं लेख्यम् ।

(छ) समवायमादाय अनुच्छेदद्वयं लेख्यम् ।

(ज) कक्षायां भेदसहितस्याभावस्य विषये लक्षणोदाहरणपूर्वकः संवादो विधेयः ।

# पारिभाषिकपदार्थपरिचयः

पौरस्त्यदर्शनक्षेत्रे वैदिकत्वेन प्रथितेषु दर्शनेष्वन्यतमं न्यायदर्शनम् । अस्य च दर्शनस्य प्रणेता महर्षिर्गौतमः । महर्षिणा गौतमेन न्यायसूत्रप्रणयनद्वाराऽस्य दर्शनस्य पल्लवनं कृतम् । न्यायसूत्राख्ये ग्रन्थे प्रमाणादयः षोडशपदार्था उद्देशलक्षणपुरस्सरं परीक्षिता इति । अस्य च न्यायनयस्य द्वे सरण्यौ स्तः । तत्राद्या प्राचीनन्यायनाम्ना प्रसिद्धा, सूत्रभाष्यक्रमेण षोडशपदार्थप्रतिपादिका प्रमेयनिरूपणप्रधाना व्यावहारिकपदबहुला चास्ति चेद् द्वितीया नव्यन्यायनाम्ना प्रथिता, विशेषतो गङ्गेशोपाध्यायजृम्भिता, वर्द्धमानरघुनाथगदाधरादिभिराचार्यैः सेविता प्रमाणनिरूपणप्रधाना प्रमाणक्रमेणार्थप्रतिपादिका प्रतियोगितानुयोगिताकार्यताकारणतादिपारिभाषिकपदबहुला परिष्कारप्रधाना च वर्तते ।

एवमेव वैदिकत्वेन प्रथितेषु दर्शनेषु अन्यतमं वैशेषिकदर्शनञ्च । अस्य च दर्शनस्य प्रणेता महर्षिः कणभुक् । अनेन काणादसूत्रजृम्भणपूर्वकं दर्शनमिदं प्रकाशितम् । दर्शनमिदं प्रशस्तपाद-उदयन-श्रीधरादिभिः सेवितम् । अत्र च द्रव्यादयः सप्त पदार्था व्यालोडिताः । न्यायवैशेषिकयोः समानतन्त्रत्वं प्रथितं वर्तते । एतदेव मनसि निधाय दाक्षिणात्येन अन्नम्भट्टाख्येन विदुषा न्यायाभिमतं प्रमाणचतुष्टयं वैशेषिकाभितं पदार्थसप्तकञ्चाऽऽदाय तर्कसङ्ग्रहनामा ग्रन्थो व्यरचि । तत्र च पदकृत्य-दीपिका-न्यायबोधिन्यादयो राजन्ते ग्रन्थग्रन्थिस्फोटका यथास्थिति नव्यशैल्यवलम्बिन्यो व्याख्याः । यथावश्यकं सटीकैतद्ग्रन्थप्रतिपाद्यविषयाणां परिज्ञानाय पारिभाषिकपदानामर्थज्ञानमावश्यकमिति धिया जिज्ञासूनां छात्राणां पारिभाषिकपदानामर्थबोधायार्थाद्येषां परिभाषयैवार्थबोधो भवति न तु शक्त्यादिवृत्त्येति हृदि निधाय तत्र प्रथितानां केषाञ्चन पारिभाषिकपदानामर्थास्तेषां प्रयोगविधिश्चात्र प्रस्तूयते ।

ध्येयमत्रेदम्- पाठ्यक्रमे 'न्यायवैशेषिकशास्त्रयोः प्रथिताः केचन पारिभाषिकशब्दाः' इति वाक्योपन्यासपुरस्सरं न्यायवैशेषिकसम्बद्धानां केषाञ्चन प्रथितानां पारिभाषिकशब्दानां प्रथमपाठे निर्धारितत्वेऽपि पारिभाषिकशब्दानामन्ते पाठनेन पाठनन्तावदधिकं फलबद् भवतीति धिया न्यायवैशिषिकसम्बद्धाः पाठ्यक्रमे निर्धारिताः पारिभाषिकशब्दाः प्रस्तुते पञ्चमे पाठे समाविष्टा इति ।

**साध्यम्** = साधयितुं योग्यं साध्यम् ।

(पक्षे यदपि साध्यते तदेव साध्यम् । सामान्यतः साध्यं अज्ञातमेव परं न तथा सदैव । अत्र प्राचीननवीनयोर्मतभेदो दृश्यते । साध्यन्तावद् अज्ञातं भवेद् जिज्ञास्यञ्च भवेत्, ज्ञातत्वे जिज्ञासाभावे च न साध्यम् । अतोऽज्ञातत्वे सति जिज्ञासाविषयीभूतत्वं साध्यत्वमिति प्राचीनाः । नवीनास्तु ज्ञातत्वेऽपि जिज्ञास्यत्वे साध्यत्वम् । अतः

'प्रत्यक्षपरिकलितमप्यर्थम् अनुमानेन बुभुत्सन्ते तर्करसिकाः' इति आभाणकं प्रसिद्धम् । किञ्च जिज्ञासाभावेऽपि अनुमितिविषयत्वे तु साध्यत्वमेव । एतन्नाम 'अमुकं स्थलम् अमुकवन्न वे'ति जिज्ञासाभावेऽपि 'अमुकं स्थलममुकवद्' इति ज्ञाने जाते सति ज्ञानविषयः साध्य एव । यथा अज्ञातत्वेऽपि अथ च जिज्ञासाभावेऽपि गृहमध्यस्थस्य पुरुषस्य अञ्जसा घनगर्जनश्रवणाद् 'गगनं मेघवदि'इत्यत्र गगने मेघवत्त्वं साध्यमिति विवेकः) ।

**दृष्टान्तः** = लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः ।

(यमर्थं लौकिकाः = अज्ञा बुध्यन्ते, तथैव परीक्षका अपि, सोऽर्थो दृष्टान्त उच्यते । यथा महानसम् इति । अवयवेषु उदाहरणवाक्येन यदुच्यते, तदेव दृष्टान्तः । एतावता वचनमुदाहरणञ्चेत् पदार्थो दृष्टान्त इति फलितार्थः)

**हेतुः** = लिङ्गवचनं हेतुः ।

(उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः । पञ्चम्यन्तं तृतीयान्तं वा

लिङ्गप्रतिपादकं वचनं हेतुः । यथा 'पर्वतो वह्निमान् धूमाद्' इत्यत्र 'धूमाद्' इति हेतुवचनम्, वस्तुतस्तु हेतुस्तु धूमः । अवयवानां वाक्यात्वात् किंवा वाक्यघटकत्वाद् हेतुवचनमेव हेतुरुच्यते ।

**पक्षतावच्छेदकधर्मः** = येन धर्मेण पक्षता अवच्छिन्ना भवति, स पक्षतावच्छेदकधर्मः ।

(यत्र किञ्चन साध्यते, तत् पक्षत्वेन व्यवह्रियते । पक्षे पक्षता स्वाभाविकी । सा च केनचन धर्मेण अवच्छिन्ना भवति, पक्षता येन धर्मेण अवच्छिन्ना भवति, सः पक्षतावच्छेको धर्मः । पुनर्दृढीभवामः- पक्षश्च कश्चन स्थलविशेषः । यथा पर्वतादिः । पर्वते पक्षे सति तत्रस्था पक्षता पर्वतत्वेनाऽवच्छिन्ना भवति, अतोऽत्र प्रसङ्गे पर्वतत्वं पक्षतावच्छेदको धर्मः । गगनं पक्षश्चेद् गगनत्वं पक्षतावच्छेदको धर्मः । एवमेवान्यत्राप्यूह्यम्) ।

**हेतुतावच्छेदकधर्मः** = येन धर्मेण हेतुता अवच्छिन्ना भवति, सः हेतुतावच्छेदकधर्मः ।

(यदा किञ्चन साध्यते, तदा कश्चन पदार्थः साधको हेतुर्वा भवति । हेतौ हेतुता स्वाभाविकी । सा च केनचन धर्मेण अवच्छिन्ना भवति । हेतुता येन धर्मेण अवच्छिन्ना भवति, सः हेतुतावच्छेको धर्मः । पुनर्दृढीभवामः- हेतुश्च कश्चन पदार्थविशेषः । यथा धूमादिः । धूमे हेतौ सति तत्रस्था हेतुता धूमत्वेन अवच्छिन्ना भवति, अतोऽत्र प्रसङ्गे

धूमत्वं हेतुतावच्छेदको धर्मः । पुस्तकं हेतुश्चेद् पुस्तकत्वं हेतुतावच्छेदको धर्मः । एवमेवान्यत्राप्यूह्यम्) ।

**हेतुतावच्छेदकसम्बन्धः** = येन सम्बन्धेन हेतुः पक्षे तिष्ठति, सः हेतुतावच्छेदकः सम्बन्धः तेन च सम्बन्धेन हेतुना अवच्छिन्ना भवति ।

(यदा किञ्चन साध्यते, तदा कश्चन पदार्थः साधको हेतुर्वा भवति । हेतौ हेतुता स्वाभाविकी । सा च यथा केनचन धर्मेण अवच्छिन्ना, तथैव केनचन सम्बन्धेनापि अवच्छिन्ना भवति । एतन्नाम यत्र पक्षे केनचन हेतुना किञ्चन साध्यं साध्यते, तदा तत्र पक्षे सः हेतुः केनचन सम्बन्धेन स्थितो भवति किंवा केनचन सम्बन्धेन स्थाप्यते, येन च सम्बन्धेन स्थितो भवति स्थाप्यते वा, स एव सम्बन्धो हेतुतावच्छेदकः सम्बन्धः । पुनर्दृढीभवामः- हेतुश्च कश्चन पदार्थविशेषः । यथा वह्नेः साध्यत्वे धूमादिर्हेतुः । पर्वतादौ वह्निसाध्यत्वे तत्रैव धूमो गृह्यते । स च धूमः पर्वतरूपे पक्षे संयोगेन तिष्ठति अतो धूमनिष्ठा हेतुता तैनैव संयोगसम्बन्धेन अवच्छिन्ना भवति । ज्ञानहेतुना समवायसम्बन्धेन आत्मत्वादौ साध्ये ज्ञाननिष्ठा हेतुता समवायसम्बन्धेन अवच्छिन्ना भवति । एवमेवान्यत्राप्यूह्यम्) ।

**व्याप्तिः** = 'यत्र यत्र धूमस्तत्र तत्र वह्निः' इति साहचर्यनियमो व्याप्तिः ।

('साहचर्यनियमः' इति व्याप्तेर्लक्षणम् । तदभिलापकं वाक्यम् 'यत्र धूमस्तत्राग्निः' इति । साहचर्यं सामानाधिकरण्यम् । तस्य नियमः- अव्यभिचारः । कादाचित्कं साहचर्यं न व्याप्तिः । सार्वकालिकं साहचर्यमपेक्षितं भवति । यथा वह्निधूमयोः । यत्र यत्र धूमः स्यात्, तत्र सर्वत्रापि वह्निरपि स्यात् । एतादृशं वह्निसाहचर्यं धूमे वर्तत इति वह्निव्याप्तिर्धूमे वर्तते । तेन च धूमो वह्निव्याप्यो भवति । एवं ययोरव्यभिचरितः संबन्धो भवति, तयोर्व्याप्तिर्भवत्येव । यत्र तु कादाचित्कं साहचर्यम्, तत्र तु न व्याप्तिः । यथा लेखनीपुस्तिकयोः) ।

**पक्षता** = सिषाधयिषाविरहविशिष्टसिद्ध्यभावः ।

(साधयितुमिच्छाभावविशिष्टसिद्धेरभावः पक्षतेति । पक्षताविषये प्राचीननवीनयोर्मतभेदो दृश्यते । प्राचीनाः 'साध्यप्रकारकसन्देहविशेष्यत्वं पक्षत्वम्' इत्याचक्षते । एतन्नाम सन्दिग्धं साध्यं यत्र भवति, स पक्षः, तस्य भावः पक्षता । इदमत्राकूतम्- पक्षतार्थं साध्यसन्देहोऽनिवार्यः किंवा अनुमितेः पूर्वं साध्यसन्देहो नियमेन जायते इति प्रचीनानां हृदयम् । एतावता 'अमुकं स्थलं साध्यवन् न वे'ति सन्देहविषयीभूतसाध्याश्रयत्वमेव पक्षत्वमिति फलितार्थः । परं नवीनास्तु सन्देहाभावेऽपि गेहमध्यस्थपुरुषस्य

घनगर्जनश्रवणेनैव 'गगनं मेघवदि'त्यनुमितेः दर्शनाद् अनुमित्युद्देश्यत्वं पक्षत्वमिति लक्षणं निष्कर्षन्ति । एतदेवादाय विश्वनाथेन- 'सिषाधयिषया शून्यायाः सिद्धेरभावः' इति निष्कृष्टम् । तथा सिद्धेरभाव एव पक्षतेति जानीहि) ।

**परामर्शः** = व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः ।

(व्याप्तिविशिष्टस्य धूमादेः पक्षे यद् वृत्तित्वज्ञानं जायते, तदेव परामर्श इत्युच्यते । परामर्शज्ञानञ्च द्विविधं भवति- एकं समानाधिकरणविषयकम्, यथा 'वह्निव्याप्यधूमवान् पर्वतः' इति । इतरच्च व्यधिकरणविषयकम्, यथा पर्वते वह्निव्याप्यधूम इति । द्विविधात् परामर्शादनुमितिरपि द्विविधैव भवति) ।

**व्याप्यत्वम्** = तदभाववदवृत्तित्वम् (साध्याभाववदवृत्तित्वम्) ।

(अत्र तत्पदेन साध्यो गृह्यते । तदभाववाँश्च साध्याभाववान् । तद्वृत्तित्वाभाव एव व्याप्यत्वम् । यथा 'पर्वतो वह्निमान् धूमाद्' इत्यत्र साध्यो वह्निः । तद्वान् महानसादिः । तदभाववान् जलह्रदादिः । तत्र वृत्तित्वं मीनादेः, अवृत्तित्वञ्च धूमस्येति) ।

**व्यापकत्वम्** = तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वम्/

साधनवन्निष्ठात्यन्ताभावाप्रतियोगित्वम्/ हेतुवन्निष्ठात्यन्ताभावाप्रतियोगित्वम् ।

(अत्र तत्पदेन हेतुर्ग्राह्यः । तद्वान् हेतुमान् । तन्निष्ठात्यन्ताभावस्य यद् अप्रतियोगित्वं भवति, तदेव व्यापकत्वम् । यथा वह्निधूमयोर्वह्निर्व्यापकः । धूमश्च व्याप्यः । तत्र तत्पदेन धूमो गृह्यते । तद्वान् धूमवान् यथा पर्वतादिः । तन्निष्ठात्यन्ताभावो घटादेस्तस्य प्रतियोगी घटादिरप्रतियोगित्वं वह्नाविति) ।

**लिङ्गम्** = (हेतुः) व्याप्तिबलेन साध्यगमकं लिङ्गम्,

अज्ञातार्थगमकमेव लिङ्गम्) ।

(लिङ्ग्यते = ज्ञाप्यते अर्थोऽनेन लिङ्गम् / लीनम् अज्ञातमर्थं गमयति इति लिङ्गम् । अवयवेषु द्वितीयावयवत्वेन हेतुर्गृहीतो वर्तते । स च वचनरूपः । एतन्नाम अवयवत्वेन गृहीतो हेतुस्तावद्वचनरूपः । तदर्थत्वेन गृह्यमाणे सति तदेव लिङ्गमिति) ।

**अन्वयः** = साध्यसाधनयोः सहचारः अन्वयः ।

(अन्वयो नाम सम्बन्धः । सम्बन्धश्चात्र कार्यकारणयोः, तदर्थश्च

कारणसत्त्वे कार्यसत्त्वम् इति अन्वयसहचारः, अन्वयसहचाराच्चान्वयव्याप्तिर्गृह्यते । यथा धूमसत्त्वे वह्निसत्त्वमित्यन्वयसहचाराद् 'वह्न्यभाववदवृत्तिः धूमः' इत्यन्वयव्याप्तिर्गृह्यते । अन्वयसहचाराच्च कार्यकारणभावोऽपि ग्रहीतुं शक्यते । यथा दण्डादिसत्त्वे घटसत्त्वमित्यन्वयसहचारज्ञानाद् दण्डादीनि घटस्य कारणानीति घटदण्डादीनां कार्यकारणभावो निश्चीयते) ।

**व्यतिरेकः** = साध्यसाधनयोः सहचाराभावो व्यतिरेकः ।

(व्यतिरेको नामाभावः । अभावयोः परस्परसम्बन्धोऽपि व्यतिरेकपदवाच्यः । तेन च व्यतिरेकसहचारो गृह्यते । यथा कारणाभावे कार्याभाव इत्यभावयोः साहचर्यम् । तस्य ज्ञानाच्च व्यतिरेकव्याप्तिर्गृह्यते । व्यतिरेकसहचारज्ञानात् कार्यकारणभावोऽपि गृह्यते) ।

**पक्षः** = सन्दिग्धसाध्यवान् पक्षः ।

(पक्षविषये प्राचीननवीनयोर्मतभेदो दृश्यते । प्राचीनाः 'साध्यप्रकारकसन्देहविशेष्यं पक्षः' इत्याचक्षते । एतन्नाम सन्दिग्धं साध्यं यत्र भवति, स पक्षः । इदमत्राकूतम्- पक्षतार्थं साध्यसन्देहोऽनिवार्यः किंवा अनुमितेः पूर्वं साध्यसन्देहो नियमेन जायते इति प्राचीनानां हृदयम् । एतावता 'अमुकं स्थलं साध्यवन् न वे'ति सन्देहविषयीभूतसाध्याश्रय एव पक्ष इति फलितार्थः । परं नवीनास्तु सन्देहाभावेऽपि गेहमध्यस्थपुरुषस्य घनगर्जनश्रवणेनैव 'गगनं मेघवदि'त्यनुमितेः दर्शनाद् अनुमित्युद्देश्यत्वं पक्षत्वमिति लक्षणं निष्कर्षन्ति । एतदेवादाय विश्वनाथेन- **सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते, स पक्षः** इति निष्कृष्टम्) ।

**सपक्षः** = निश्चितसाध्यवान् सपक्षः ।

(साध्यप्रकारकनिश्चयविशेष्यं सपक्षः । निश्चयश्च 'महानसं वह्निमद्' इत्याकारकः । पक्षेऽतिव्याप्तिवारणाय निश्चितेति । एवमेव साध्येऽतिव्याप्तिवारणाय साध्यवानिति । एतावता 'पर्वतो वह्निमान् धूमाद्' इत्यत्र महानसादिः सपक्षः) ।

**विपक्षः** = निश्चितसाध्याभाववान् विपक्षः ।

(साध्याभावप्रकारकनिश्चयविशेष्यं विपक्षः । 'पर्वतो वह्निमान् धूमाद्' इत्यत्र साध्यो वह्निः, साध्याभावश्च वह्न्यभावः । वह्न्यभावनिश्चयश्च ह्रदे (महाह्रदे) । अतः 'ह्रदः (महाह्रदः) वह्न्यभाववान्' इत्याकारको बोध एव निश्चयात्मक इति । तथा च

साध्याभावप्रकारको निश्चयविशेष्यको विपक्ष इति) ।

**प्रतियोगिता** = यस्याभावः स प्रतियोगी, तस्य भावः प्रतियोगिता ।

(न्यायशास्त्रे यस्याभावः स प्रतियोगी तस्य भावः प्रतियोगित्वमिति व्यवह्रियते, यथा घटो नास्ति, घटो नेत्यादिस्थलेऽभावो घटाभावोऽत एतस्याऽभावस्य प्रतियोगी घटः । प्रतियोगिता च घटे इति । यस्याभावः स प्रतियोगीति आदाय विचारोऽयं प्रवृत्तः, सम्बन्धविषयको विचारश्चान्यत्र द्रष्टव्यः) ।

**अनुयोगिता** = यस्याभावः स प्रतियोगी । तस्य प्रतियोगिनोऽभावोऽनुयोगी । यथा

घटाभावस्य घटः प्रतियोगी । घटभावश्च घटस्याऽनुयोगीति । न्यायशास्त्रे सम्बन्धविषयकोऽनुयोगी अपि चर्च्यते, तत्तु ग्रन्थान्तरे द्रष्टव्यम् ।

## पदानामर्थपरिचयः

| | | |
|---|---|---|
| पारिभाषिकं पदम् | = | परिभाषयार्थबोधकं पदम् । |
| पल्लवनम् | = | विस्तारः । |
| प्रणेता | = | आरम्भकर्ता । |
| उद्देशः | = | नाममात्रेण वस्तुसङ्कीर्त्तनम् । |
| लक्षणम् | = | असाधरणो धर्मः । |
| परीक्षा | = | लक्षितस्य लक्षणं सम्भवति न वेति विचारः । |
| वैशिष्ट्यम् | = | सम्बन्धः । |
| सरणी | = | पन्थाः । |
| प्रथिता | = | प्रसिद्धा । |
| जृम्भिता | = | आरब्धा, वर्द्धिता, प्रसारिता । |
| कणभुक् | = | वैशेषिकसूत्रकर्ता कणादः । |
| व्यालोडिताः | = | विवेचिताः । |
| समानतन्त्रत्वम् | = | समानशास्त्रत्वम् । |
| फलवत् | = | अर्थवत्, सार्थकम् । |

## अभ्यासः

### १. वर्णनात्मकं/टिप्पण्यात्मकमुत्तरं देयम्

(क) पक्षलक्षणं विलिख्य कुत्रचिल्लक्ष्ये समन्वयः क्रियताम् ।

(ख) हेतुलक्षणं विलिख्य तस्यैकमुदाहरणं प्रस्तूयताम् ।

(ग) सोदोहरणौ अन्वयव्यतिरेकयोः पदयोरर्थौ स्पष्टीक्रियेताम् ।

(घ) उदाहरणसहितौ पक्षतावच्छेदकहेतुतावच्छेकधर्मौ परिचाय्येताम् ।

(ङ) केयं व्याप्तिः ? उदाहरणपुरस्सरं निरूप्यताम् ।

(च) लिङ्गमुदाहरणपूर्वकं परिभाष्यताम् ।

(छ) पक्षलक्षणं विलिख्य उदाहरणपूर्वकं स्पष्टीक्रियताम् ।

(ज) सपक्षविपक्षौ सोदाहरणौ निरूप्येताम् ।

### २. अतिसङ्क्षिप्तमुत्तरं देयम्

(क) पक्षस्य लक्षणं किम ?

(ख) पक्षतावच्छेदकधर्मः कः ?

(ग) कः हेतुतावच्छेदकः सम्बन्धः ?

(घ) साध्यं किम् ?

(ङ) कोऽयं दृष्टान्तः ?

(च) हेतोः लक्षणं किम् ?

(छ) व्याप्तिः का ?

(ज) परामर्शस्य लक्षणं किम् ?

(झ) व्याप्यत्वं किम् ?

(ञ) लिङ्गं किम् ?

(ट) किञ्च व्यापकत्वम् ?

(ठ) अन्वयः कः ?

(ड) को व्यतिरेकः ?

(ढ) कः सपक्षः ?

(ण) विपक्षः कः ?

(त) प्रतियोगितायाः लक्षणं किम् ?

(थ) अनुयोगिता का ?